IMPACT FACTOR : 2.815

ISSN : 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Peer Reviewed Sanskrit Research Journal

Vol. XII April, 2019 - September, 2019 Issue No. 1

वर्षम् १२ अप्रेल २०१९ - सितम्बर २०१९ अङ्कः - प्रथमः

# प्राचीसुधा

# PRACI SUDHA

**A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL**

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

**सम्पादकः सञ्चालकश्च**

**प्रो. विश्वनाथस्वाईँ**

**सहसम्पादकाः**

डॉ.युधिष्ठिरसाहुः

डॉ. विघ्नेश्वरमिश्रः

**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा**

**PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY**

**SARVODAYA NAGAR, PURI - 752002, ODISHA**

**Website : www.pracisudha.in**

IMPACT FACTOR: 2.815 PRACI SUDHA ISSN : 2249 - 2313

A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्**

**Purusottam Research Academy of Indology**

Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588

E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com

**संरक्षका:**

श्रीमहन्त: डॉ.वृन्दावनविहारिदासकाठियाबाबामहाराज:, सुखचर: कोलकाता

श्रीमहन्त: श्रीरामकृष्णदासमहाराज:, पुरी

श्रीमहन्त: श्रीश्रीनिवासदासमहाराज:, पुरी

त्रिदण्डी स्वामी भक्तिस्वरूपश्रीधरमहाराज:, पुरी

स्वामी श्रीत्र्यम्बकेश्वरमहाराज:, काशी

**परामर्शदातृमण्डलम्**

प्रो.अलेखचन्द्रषडङ्गी(पूर्वकुलपति:), प्रो.अद्वैतचरणधल:,

महामहोपाध्याय: द्वारिकानाथत्रिपाठी, प्रो.गङ्गाधरपण्डा(पूर्वकुलपति:),

प्रो.प्रफुल्लकुमारमिश्र:(पूर्वकुलपति:), प्रो.चन्द्रशेखरमिश्र:,

प्रो.विन्ध्येश्वरप्रसादहिमांशु:, प्रो.ललितकुमारसाहु:, श्रीज्ञानेन्द्रत्रिपाठी,

डॉ.पूनमलखनपाल, प्रो.नागवरप्रसाद राव चन्द्रपाटी,

**पुनरीक्षणसमिति: (PEER REVIEW COMMITTEE)**

महामहोपाध्याय: प्रो.सुधाकराचार्यत्रिपाठी, चौ.च.वि.वि., मेरठ (यू.पी.)

प्रो.विक्रमकुमार:, पञ्जाबविश्वविद्यालय:, चण्डीगड़

प्रो.सरोजकौशल:, जयनारायणव्यासविश्वविद्यालय:, जोधपुर (राजस्थान)

प्रो.कमलेश सि चोक्सि, अहमदाबादविश्वविद्यालय:, अहमदाबाद (गुजरात)

**सम्पादकमण्डलम्**

प्रो.प्यारीमोहनपट्टनायक:, प्रो.हरेकृष्णमहापात्र:,

प्रो.सूर्यमणिरथ:, डॉ.कान्हुचरणपण्डा, डॉ.निर्मलापाणिग्राही, डॉ.शत्रुघ्नपाणिग्राही

प्रो.प्रभातरञ्जनमहापात्र:, डॉ.वसन्तकुमारमिश्र:, प्रो.विश्वनाथस्वाईँ

**सम्पादक: सञ्चालकश्च**

प्रो.विश्वनाथस्वाईँ

**सहसम्पादका:**

डॉ.युधिष्ठिरसाहु

डॉ. विघ्नेश्वरमिश्र:

ISSN 2249 - 2313

# पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य प्रतिष्ठातृसदस्याः

| क्र.सं. | सदस्यानां नामानि, सङ्केताश्च |
| --- | --- |
| १. | प्रो.डॉ.विश्वनाथस्वाईँ(प्रतिष्ठाता, महासचिवः), सेवानिवृत्तः प्राचार्यः, श्रीज.वे.क.म., पुरी, ओडिशा |
| २. | प्रो.प्यारीमोहनपट्टनायकः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ३. | प्रो.अद्वैतचरणधलः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ४. | प्रो.अलेखचन्द्रषडङ्गी, पूर्वकुलपतिः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ५. | प्रो.सूर्यमणिरथः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| ६. | डॉ.काह्नुचरणपण्डा, रा.सं.म.वि., ब्रह्मपुरम्, गञ्जाम, ओडिशा |
| ७. | श्रीज्ञानेन्द्रत्रिपाठी, वालिचन्द्रपुर, याजपुर, ओडिशा |
| ८. | प्रो.हरेकृष्णमहापात्रः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| ९. | प्रो.गौरप्रियादासः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| १०. | प्रो.प्रभातरञ्जनमहापात्रः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ११. | श्रीविश्वमोहनमहारणा, पुरी, ओडिशा |
| १२. | डॉ.शत्रुघ्नपाणिग्राही, श्रीसोमनाथ सं.वि.वि., वेरावल, गुजरात |
| १३. | प्रो.रघुनाथपण्डा, उत्कलविश्वविद्यालयः, भुवनेश्वरम्, ओडिशा |
| १४. | प्रो.ललितकुमारसाहुः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| १५. | डॉ.वसन्तकुमारमिश्रः,श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा |
| १६. | प्रो.विक्रमकुमारः, पञ्जाब-विश्वविद्यालयः, चण्डीगढ, पञ्जाब |
| १७. | प्रो.गङ्गाधरपण्डा, कुलपतिः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| १८. | प्रो.चन्द्रशेखरमिश्रः, ला.व.सा.स्मा.म.वि.आनन्दनगर, महाराजगञ्ज,यू.पी. |
| १९. | डॉ.युधिष्ठिरसाहुः, रेभेन्सा-विश्वविद्यालयः, कटक, ओडिशा |
| २०. | प्रो.अनुपमापृष्टिः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| २१. | डॉ.नरेशचन्द्रदाशः, नी.ना.आ.चतुष्पाठी म.वि., पुरी, ओडिशा |
| २२. | श्रीहृषीकेशदाशः, ब्रह्मपुरम्, गञ्जाम, ओडिशा |
| २३. | प्रो.प्रफुल्लकुमारमिश्रः, कुलपति, उत्तरओडिशा वि.वि., मयूरभञ्ज, ओडिशा |
| २४. | डॉ.देवराजपाणिग्राही, त्रिपुराविश्वविद्यालयः, अगरताला, त्रिपुरा |
| २५. | डॉ.पूर्णचन्द्रपाढी, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| २६. | डॉ.भारतेन्दुपाण्डेयः, दिल्लीविश्वविद्यालयः, दिल्ली |
| २७. | प्रो.एम्.वसन्ता, एस्.एस्.यु.एस्., कोइलाण्डी, केरल |
| २८. | आचार्यः रामस्वरूपशास्त्री, राजकीयसंस्कृतमहाविद्यालयः, ग्वालियर, म.प्र. |
| २९. | प्रो.छायारानी, दी.द.उ.गोरखपुरविश्वविद्यालयः, गोरखपुर, यू.पी. |
| ३०. | डॉ.जयन्तकुमारत्रिपाठी, गङ्गाधरमेहेरकॉलेज्, सम्बलपुर, ओडिशा |
| ३१. | प्रो.सङ्गीता अग्रवाल, आर्यकन्या पी.जी.कॉलेज, हापुड, यू.पी. |
| ३२. | प्रो.नागवरप्रसाद राव चन्द्रपाटी, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| ३३. | डॉ.मेधा कुमारी, संस्कृतविभागः, सामसीमहाविद्यालयः, सामसी, प.ब. |
| ३४. | डॉ.विष्णुप्रसाददाशः, संस्कृतविभागः, पात्रसायरमहाविद्यालयः, प.ब. |
| ३५. | प्रो.पूनमलखन पाल, रघुनाथ-कन्या पीजी कॉलेज्, मेरठ, यू.पी. |
| ३६. | डॉ.निर्मला पाणिग्राही, शिक्षाशास्त्रविभागः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |

.............................. अवशिष्टांशः - ९९ पृष्ठाङ्के

IMPACT FACTOR: 2.815 PRACI SUDHA ISSN : 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्
Purusottam Research Academy of Indology
Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588
E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com



## सम्पादकीयम्

ॐ "तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।।" इति शाश्वती श्रुतिः ।

अथात्र राजते बुद्धिमत्सु जीवेषु अग्रगण्यः मननशीलः मनुष्यः । अल्पज्ञस्य एतस्यापि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च । एतेषां सर्वेषामिन्द्रियाणां प्रवर्त्तकं मनश्चाप्यत्र मनुष्ये दृश्यते । इन्द्रियैः सह मनसः सम्बन्ध इतिकृत्वा मनः उभयात्मकम् । मनश्चापि सङ्कल्पात्मकं विकल्पात्मकञ्च । सङ्कल्पात्मकं सदात्मकं मनः आदरणीयम् । मनोनिग्रहवान् नरः एव ऐश्वर्याधिकारी । मनोनिग्रहस्तु न सहजसाध्यः । भद्रक्रतुसम्पादनेनैव मनोनियन्त्रणं सम्भवमितिकृत्वा ऋषयः मुनयश्च सततं सम्यक् सङ्कल्पयत्नपरायणाः वेदाधिगमध्यायिनः वैदिककर्मयोगप्रवणाः। तपः एव क्रतुः । तपः एव अध्ययनाध्यापनादि । सश्रद्धं साग्रहञ्च एतत् अनुष्ठेयं यत् खलु अस्माकं विद्वांसः यथासाध्यम् आचरन्ति । तथापि कर्मात्मानः एते संसारमोहप्रवणाः दृश्यन्ते । ये खलु अधीराः अस्थिराः एते संसारकृते अशान्तिकारणम् । सर्वज्ञस्य सर्वशक्तेः शाश्वतीं विराजमानताम् एते ज्ञातुं न प्रवृत्ताः । अतः एतादृशान् मनुष्यान् भगवती श्रुतिः अत्र संदिशति -

"उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत ।
दधाना इन्द्र इद्दुवः ।।" इति ।

एतस्मिन् अवसरे अस्माकं समाहारे विद्वांसः विलसन्ति । एतेषां रचना: यथा - आतङ्कवादप्रशमने संस्कृतसाहित्यम्, आयुर्वेदे जन्तुविज्ञानम्, अश्वमेधयागे ब्रह्मोद्यप्रसङ्गः, श्रीमद्भगवद्गीतायाः सर्वदर्शनोपजीव्यत्वम्, बृहदारण्यकोपनिषदि वह्निस्मरणम्, ध्वन्यालोकस्य अनुप्राणकता चेत्यादयः अत्र अधुना **"प्राचीसुधा"** संस्कृतशोधपत्रिकायां विलसन्ति।

सुखसञ्चारे नवनवप्रतिभासम्भारे प्रोक्ताः विचारधाराः अत्र **राष्ट्रियमूल्याङ्कितायां पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य षाण्मासिकि-संस्कृतशोधपत्रिकायां प्राचीसुधायां** रमन्ते । "प्राचीसुधा"-संस्कृतशोधपत्रिकायाः अयं एकविंशतितमबिन्दुः (वर्षम्-१२, अङ्कः -१, अप्रेल-२०१९ – सितम्बर-२०१९) । प्रकाशनमिदं सर्वजनहृद्यं भवेदिति ।

विदुषां वशंवदः
**प्रो.विश्वनाथस्वाईँ**
**सम्पादकः सञ्चालकश्च, प्राचीसुधा**
**तथा च महासचिवः,**
**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा**

**श्रीजगन्नाथपुरी**
३०.०९.२०१९

IMPACT FACTOR: 2.815 PRACI SUDHA ISSN : 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL
एकादशवर्षम् द्वितीयसंख्या

# विषयसूची


| विषया: | लेखका: | पृष्ठाङ्का: |
|---|---|---|
| सम्पादकीयम् | प्रो.विश्वनाथस्वाइँ | ३ |
| आतङ्कवादप्रशमने संस्कृतसाहित्यम् | डॉ.वसन्तकुमारमिश्र: | ५- ९ |
| व्यञ्जनाव्यापरविमर्शने विश्वनाथ: | डॉ. लक्ष्मीनारायणबेहेरा | १० - १४ |
| आयुर्वेदे जन्तुविज्ञानम् | डॉ.विघ्नेश्वरमिश्र: | १५ - १९ |
| अश्वमेधयागे ब्रह्मोद्यप्रसङ्ग: | डॉ. शत्रुघ्नपाणिग्राही | २० - २५ |
| व्याकरणाध्ययनस्य प्राचीनविधिपरामर्श: | डॉ.जयश्री दाश: | २६-३४ |
| धर्मशास्त्रे दायविभाग: | डॉ.प्रकाशकुमार शतपथी | ३५-४१ |
| भारतीय ज्योतिषशास्त्रे गुरुत्वाकर्षणसिद्धान्तस्य प्राचीनता | डॉ.रमेशचन्द्रबाबूलालशुक्ल: | ४२ - ४४ |
| सुरापानप्रायश्चित्तविमर्श: | डॉ. दयानिधिमिश्र: | ४५ - ५० |
| प्रेतादिदेहसम्बन्धा: | डा.उमाराहुल | ५१ - ५२ |
| गुरुतल्पगमनप्रायश्चित्तम् | डॉ. मानसीरथ: | ५३ - ५६ |
| बृहदारण्यकोपनिषदि वह्निस्मरणम् | महामहोपाध्याय: डॉ.द्वारिकानाथ त्रिपाठी | ५७ - ६० |
| श्रीमद्भगवद्गीताया: सर्वदर्शनोपजीव्यत्वम् | डॉ. युधिष्ठिरसाहु: | ६१-६६ |
| आनन्दवर्धनसूक्तिसारसौरभम् | डॉ. मेधाकुमारी | ६७- ७० |
| स्मृतिवाङ्मये नैतिकशिक्षा | डॉ. प्रियदर्शिनी मेकाप | ७१-७३ |
| ध्वन्यालोकस्य अनुप्राणकता | डॉ.शिवप्रसादवेहेरा | ७४- ७६ |
| व्याकरणवाङ्मये अलङ्कारविवेचनम् | डॉ. हेमन्तकुमारमुदुलि: | ७७ - ७९ |
| सुदर्शनाचार्य्यकृत श्रीजगन्नाथाष्टोत्तरशतकसमीक्षा | मितालिमधुच्छन्दा सेनापति: | ८०- ८४ |
| निर्विवादमिदं वाच्यं रस: काव्यस्य जीवितम् | ड. जितेन्द्रकुमार दाश: | ८५-९२ |
| नारदीयोत्क्रान्ति: | डॉ.सन्तोषकुमारी | ९३ |
| अग्निपुराणे मोक्षावधारणा | तरणीकुमारपण्डा | ९४-९९ |
| Declaration | | १०० |

# आतङ्कवादप्रशमने संस्कृतसाहित्यम्

डॉ.वसन्तकुमारमिश्रः

आतङ्कवादस्वरूपम् -

आतङ्कवादस्य किं स्वरूपमिति विचारप्रस्तावे लोकेऽकल्याणजनकत्वम् आतङ्कवादत्वमिति वक्तुं शक्यते। सृष्टिविघटनात्मकः वादः आतङ्कवादः। आतङ्को नाम त्रासः आयासस्य। एतत्कार्यान्वयनमातङ्कवादस्य कर्म। अस्य वादस्य समर्थका आतङ्कवादिन उच्यन्ते। मारण-ताडन-धर्षण-लुण्ठन - अपहरणादीनि एतेषां प्रमुखकार्याणि ।

आतङ्कवादकार्यकरणे हेतुः -

सर्वे अमृतस्य पुत्रा इति ऋषिभिरुच्यते । तर्हि जायमानः निष्पापः गच्छता कालेन समाजे किमर्थमातङ्कं प्रसारयतीति विचार्यते चेत् निम्नाङ्किताः बिन्दवः अक्षिलक्ष्यीभवन्ति-

१. विषयैषिणां सदा प्रभूता धनप्राप्तीच्छा प्रभुत्वविस्तारभावना च।

२. उच्चशिक्षानन्तरमुद्योगाभावः।

३. दारिद्र्यम्।

४. असत्सङ्गः च कथ्यते - "असतां सङ्गदोषेण को न याति रसातलम्।"

१. समधिकधर्मान्धभावना।

२. मानवहृदि विद्यमानाः लोभ-मोह-द्वेषस्वभावाः च अनैतिककारणे हेतवः भवन्ति।

१. सत्त्वगुणावरोधात् वृद्धिं गतयोः रजस्तमसोः प्रभावात् परिवारे समाजे देशे च लोभ-प्रमाद-मोह- अशान्तिप्रभृतयः भावाः प्रादुर्भवन्ति। तदर्थमसामाजिकतत्त्वानि प्रचरन्ति।

२. अत्यधिकस्वार्थपरभावनाऽऽतङ्कवादस्य कारणरूपा।

३. आधुनिककाले विज्ञानं मानवजीवनं यन्त्रवत् चालयति। धर्म-नीति-सदाचारादिभावरहिताः जनाः समाजस्य क्षतिं कुर्वन्ति। एतत् कर्म आतङ्कवादस्य।

प्रोक्तानि कारणानि समादाय सारांशतः आतङ्कवादस्य प्रमुखं कारणं भोतिकसुखलिप्सा भवति, या विश्वशान्तेः महती अन्तरायाऽस्तीति वक्तुं शक्यते।

संस्कृतसाहित्येऽऽतङ्कवादनिराकरणोपायाः -

अत्र व्यवहृतं साहित्यपदं समष्ट्यर्थपरकम्। एतेन सर्वेषां शास्त्राणां सर्वासां विद्यानां वा ग्रहणम्। तत्तच्छास्त्रेषु आतङ्कवादिनाम् आतङ्कवादस्य वा निराकरणोपाया: यत्र तत्र सन्निवेशिता: दृश्यन्ते। तदत्र दिङ्मात्रमुपस्थाप्यते।

आङ् इति उपसर्गात् तङ्धातो: घञ्प्रत्यये कृते आतङ्क इति पदं निष्पद्यते। यस्यार्थ: रोग: व्यथा त्रास: भयमिति वा भवति।[१] अमरकोषे "रुक्तापशङ्कास्वातङ्का" इति उक्तमस्ति, यत्र रुक् ताप: शङ्कण: आतङ्क: चेति शब्दचतुष्टयं पर्य्यायवाचकमस्य कथितमस्ति। समाजे तापं रुजं शङ्कणं भयं त्रासं च यो जनयति स आतङ्की आतङ्कवादी वा उच्यते। वस्तुत: इदानीमातङ्कवादी इति कथनेन यो भाव: अवगम्यते तदर्थवाचक: शब्द: पुरा आततायी अपराधी वाऽऽसीत्। राक्षसवृत्तित्वमातङ्कवादित्वमिति गदनेन पुरा सर्वेऽपि राक्षसा: शिशुपालादय: आतङ्कवादिन आसन् इति कथयितुं शक्यते। तन्नियमनमपि देवै: विभिन्नोपायै: कृतमिति संस्कृतशास्त्राणामध्ययनेन ज्ञानं भवति ।

प्राचीनभारते आतङ्कवादिनां कृते दण्डव्यवस्था अपराधानुरूपाऽवर्त्तत। "शठे शाठ्यं समाचरेत्" इति नीति: महाभारतीययुगे आसीत्। तदा साधुस्वभाव: साधुस्वभावेनोपगन्तव्य:, खलस्तु मायाचारेण अपकारेण निग्रहेण वोपगन्तव्य इति नीतिरासीत्। तदुक्तं महाभारते[२] -

"यस्मिन् यथा वर्त्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्म: ।
मायाचारो मायया वर्त्तितव्य: साध्वाचार: साधुना प्रत्युपेय:।।" इति।

आततायिन: दण्डनीया इति मनुना उक्तम्। के ते आततायिन इति अपेक्षायां धर्मशास्त्रभाष्यकार:[३] मेधातिथि: उद्धरति -

"अग्निदो गरदश्चैव शस्त्रोन्मत्तो धनापह:।
क्षेत्रदारहरश्चैतान् षड् विद्यादाततायिन:।।" इति।

विषयेऽस्मिन् मनो:[४] मतं मूलमेव। तन्मतेन एते निर्विचारं विना हन्तव्या:। याज्ञवल्क्यस्मृतौ राज्ञा साम-दान-भेद-दण्डनीतिभि: राज्यं शासनीयमिति नीतिरस्ति। यत्र एता: नीतय: असफला: तत्र साक्षात् दण्डनीति: प्रयुक्तव्या ।[५] तदुक्तम् -

"उपाया: साम दानं च भेदो दण्डस्तथैव च।
सम्यक् प्रयुक्ता: सिद्धेयुर्दण्डस्त्वगतिका गति:।।" इति।

आतङ्कवादिनां निराकरणार्थं कौटिल्यस्य अर्थशास्त्रे स्पष्टं निर्दिष्टमस्ति। तस्य

शास्त्रस्यानुसरणमिदानीन्तनैः नेतृभिः नूनं करणीयम्। तदुक्तम् -

[६]"आरब्धारस्तु हिंसायां गूढजीवास्त्रयोदश।
प्रवास्या निष्क्रयार्थं वा दद्युर्दोषविशेषतः।।" इति।

अस्यायमेवार्थः यत् हिंसायाः लोकोपद्रवस्य कर्त्तारः स्वदेशतः निष्कासयितव्याः, दोषविशेषं विचार्य दण्डं चापि दद्युः। अपि च निष्कासनानन्तरं कदाचित् ते दुष्टाः प्रतिशोधपरायणाः भविष्यन्ति , अतः तत्र समाहर्त्तृसिद्धतापसादिव्यञ्जकान् चरान् नियुञ्जीत।

कवेर्भारती आतङ्कप्रशमनोपायान् शास्त्रान्तरवत् प्रकाशयति। तत्र दृश्यकाव्ये श्रव्यकाव्ये चायं विषयः कविभिः प्रत्यक्षं परोक्षं वा उत्थापितः । तत्र किरातार्जुनीये कविः भारविः द्रौपदीमुखेन शठे शाठ्यं समाचरेदिति भावमभिव्यनक्ति। तदुक्तम् -

[७]"व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि ध्नन्ति शठास्तथाविधानसंवृताङ्गन्निशिता इवेषवः।।" इति।

एवमेव महाकविः माघोऽपि शिशुपालवधे आतङ्कवादिनः शत्रुरूपेण परिगणय्य तेषां दमनोपायं बलरामादिमुखैः विविधदृष्टान्तपुरःसरं प्रतिपादितवान्। यथा रोगः सर्वादौ उपशमनीयः तथा शत्रुरपि। श्रीकृष्णमुखेन एतत् प्रतिपाद्यते । यथा-

[८]"उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च।।" इति।

शस्त्रास्त्रप्रयोगं विनाऽपि आतङ्कवादः शमयितुं शक्यः। तदर्थं नेतॄणां बुद्धिः तथाविधा निर्मला सूक्ष्मा च स्यात् । तेषां मन्त्रणाऽपि बहिः न प्रकटीभवेत्। दूताः विश्वस्ताः भवेयुः। तदुक्तम् -

[९]"बुद्धिशस्त्रः प्रकृत्यङ्गो धनसंवृतिकञ्चुकः।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः।।" इति।

इदमपि माघेन स्पष्टीकृतं यत् यदि कश्चन राज्ञा स्वदेशं निरातङ्ककर्त्तुमिच्छेत् तर्हि सः प्रभाव-उत्साह-मन्त्रशक्तिबलैः सन्धि-विग्रह-यान-आसन-संश्रय-द्वैधीभावादिगुणान् प्रयुञ्जीत। तेन तस्य देशस्य कानिचन अङ्गानि (स्वामि-अमात्य-जन-दुर्ग-कोश-दण्ड-मित्रादीनि) सुदृढानि स्युः। तदुक्तं शिशुपालवधे -

[१०]"षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षी रसायनम्।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च।।" इति।

पुरा गुप्तचरव्यवस्था दृढा आसीत्। गुप्तचराणां कार्ये विश्वसनीयतां परीक्षितुमपि विश्वस्ता: केचन नियुक्ता: अभवन्। शत्रो: सर्वविधमपि कार्यं राजा चारै: ज्ञातुं प्रभवति स्म। किन्तु इदानीं प्रौद्योगिके युगेऽपि शत्रो: देशस्य जनप्रतिनिधे: वा कार्यमज्ञेयं भवति। गुप्तचरवृत्ति: असफला भवति। आतङ्कवादिनां भारतदेशमध्ये प्रवेशनं संसदभवने प्रवेशनविषयमपि ज्ञातुं न प्रभवति। प्रसङ्गेऽस्मिन् उद्धवस्य श्रीकृष्णं प्रति यदुचितकथनमनुकरणीयमस्माभि:। तन्मते -

[११]"कृत्वा कृत्यविदस्तीर्थेष्वन्त: प्रणिधिय: पदम्।<br>
विदांकुर्वन्तु महतस्तलं विद्विषदम्भस:।।" इति।

अत्र तीर्थपदेन मन्त्रि-पुरोहित-सेनापति-युवराज-प्रभृतीनामष्टादशतीर्थानां विषयग्रहणम्। एतेषां समेषां वृत्ति: गुप्तचरैर्ज्ञातव्या । एतेन आतङ्कवादकार्यकरणस्य अवसर: न भवति। एवं निराकरणोपायेषु केचन उदाहृता:। एतेषामाधारेण आतङ्कवाद: उन्मूलयितुं शक्य:। दण्डनीति: कठोरा भवेच्चेत् भविष्ये ये पुन: आतङ्कवादसंघटने प्रविशन्ति ते न प्रविशेयु:। अपि चात्रावधेयं यत् ये आतङ्कवादिन: निगृहीता: सन्त: कारावरुद्धा: भवन्ति तेभ्य: सच्छिक्षा प्रदेया। जीवनपथप्रदर्शिका: सूक्तय: नीतयश्च पाठनीया: । संस्कृतिज्ञानेन जीवन्मुक्तो भवति मानव इति ज्ञानं प्रदेयम्। विषयासक्ते: दुष्परिणामत्वं ज्ञापनीयम्। यथा उक्तं श्रीमद्भगवद्गीतायाम् -

[१२]"ध्यायतो विषयान् पुंस: सङ्गस्तेषूपजायते।<br>
सङ्गात् सञ्जायते काम: कामात् क्रोधोऽभिजायते।।<br>
क्रोधाद् भवति संमोह: संमोहात् स्मृतिविभ्रम:।<br>
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।।" इति।

अपि च -

[१३]"श्रेयान् स्वधर्मो विगुण: परधर्मात् स्वनुष्ठितात्।<br>
स्वधर्मे निधनं श्रेय: परधर्मो भयावह:।।" इति।

इतीत्थं भावोद्दीपकानां श्लोकानामुच्चारणं कारयित्वा तदर्थ: सरलभाषया प्रबोधनीय:।

किं बहुना ? बहुजनहिताय बहुजनसुखाय चेति या भारतीया संस्कृति: विश्ववासिभि: यदि समाद्रियते, यस्या: समाश्रयणेन दस्युरपि रत्नाकर: आदिकवि: वाल्मीकि: भवति

तर्हि तस्याः ज्ञानेन नूनं देशस्था आतङ्कजनकाः परिवर्त्तेरन्, इदमाशास्महे। अतः संस्कृतेः तद्वाहिकायाः संस्कृतभाषायाः संस्कृतसाहित्यस्य च प्रचारः करणीयः सर्वैः देशवासिभिः येन देशोऽस्माकं निरातङ्को भवेदिति।

---

**सन्दर्भाः -**


१. अमरकोषस्य नानार्थवर्गः -१०

२. महाभारतम् उद्योगपर्व - ३७.७

३. संगृहीतम्, मनुस्मृतिग्रन्थस्य पादटीकातः, पृ-४३९

४. मनुस्मृतिः, ८.३५०

५. याज्ञवल्कयस्मृतिः, ३४६

६. कौटिलीय- अर्थशास्त्रम्, चतुर्थाधिकरणम्

७. किरााताार्जुनीयम् १.३०

८. शिशुपालवधम् - २.१०

९. तदेव - २.८२

१०. तदेव २.९३

११. तदेव २.१११

१२. श्रीमद्भगवद्गीता २.६२, ६३

१३. तदेव- ३.३५


—०—


*उपाचार्यः*

*स्नातकोत्तरसाहित्यविभागस्य।*

*श्रीजगन्नथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा।*

# व्यञ्जनाव्यापरविमर्शने विश्वनाथः

*डॉ. लक्ष्मीनारायणबेहेरा*

संस्कृतसाहित्यजगति अलङ्कारशास्त्रस्य विशिष्टस्थानं वर्त्तते। अत्र गुणालङ्काररीतिवृत्तीत्यादीनां विषये यथा सारगर्भिकी चर्चा कृताऽस्ति तथा शब्दशक्तेः उपरि सुविस्तृतं व्यापकं च आलोचनं दरीदृश्यते। शब्दशाक्तिं प्रतिपादयितुं प्रामुख्येन अभिधा-लक्षणा-व्यञ्जनेति व्यापारत्रयं उट्टङ्कितम्। तत्रापि व्यापारत्रयेषु व्यञ्चनायाः किञ्चन विशिष्टस्थानं वर्त्तते। काव्यात्मभूतस्य रसस्य अभिव्यक्तिः केनोपायेन सम्भवतीति विचार्यमाणे विषये नैके विद्वांसः पृथक् पृथक् मतं परिपोषयन्ति। केनचिदुच्यते अभिधाव्यापारेण रसादिव्यङ्ग्यार्थानां प्रतीतिर्भवति, केनचिच्य लक्षणया सम्भवतीति उच्यते। पुनश्च व्यङ्ग्यार्थस्य प्रतिभानं तात्पर्येण अनुमानेन ना सम्भवतीति उच्यते। पुनश्च व्यङ्ग्यार्थस्य प्रतिभानं तात्पर्येण अनुमानेन वा सम्भवतीति प्रभाकर-महिमभट्टादयः स्वीकुर्वन्ति। परन्तु आनन्दवर्धनमम्मटविश्वनाथादयः व्यञ्जनावृत्तेः एव महत्त्वाधिक्यम् अङ्गीकुर्वन्ति। विश्वनाथः साहित्यदर्पणस्य पञ्चमपरिच्छेदे व्यञ्जनावृत्तेः स्थापनाय विविधालङ्कारिकाणाम् अभिमतं सयुक्तिकं विखण्ड्य स्वाभिमतमुपस्थापयति। तदत्रालोच्यते। विश्वनाथः प्रतिपादयति -

**वृत्तीनां विश्रतान्तेरभिधातात्पर्यलक्षणाख्यानाम्।**
**अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम्** ।।१

अर्थात् अभिधा-लक्षणा-तात्पर्याख्याः वृत्तयः स्वार्थान् प्रतिपाद्य "**शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभावः**" २ इत्यनेन नियमेन विश्रानताः भवन्ति। तदानीं वस्तु अलङ्कार-रसादीनां व्यङ्ग्यार्थानामवगमनाय व्यञ्जनावृत्तिः स्वीकर्त्तव्या।

विश्वनाथः अभिधायाः व्यङ्ग्यबोधनक्षमत्वं निरस्यति। तेनोक्तं, अभिधाव्यापारेण केवलं मुख्यार्थावगतिः सम्भवति, न तु व्यङ्ग्यार्थावगमः। अभिधाशक्तिः केवलं सङ्केतितार्थं प्रतिपाद्य विरमति। अतः व्यपारस्य विश्रान्तेरनन्तरं वस्त्वलङ्काररसादिव्यङ्ग्यार्थाः कथमात्मानं परिस्फुटयिष्यन्ति? रसः सङ्केतितार्थोऽपि न भवति। केवलं विभावादीनाम् अभिधानेन रसः नैव निष्पद्यते। पुनश्च रसस्य स्वशब्देनाभिधानं दोषाय भवति। यथा श्रृङ्गाररसोऽयं इति कथनेन श्रृङ्गाररसः नैव परिस्फुटति। अतः अभिधाव्यापारेण व्यङ्ग्यार्थावबोधः न सम्भवतीति सिद्ध्यति।

अभिधावादानुगामीनः भट्टलल्लोटादयः स्वीकुर्वन्ति यत्-

"सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः।" [३]

अर्थात् बाणतुल्यः अभिधाव्यापार दीर्घात् दीर्घतरो भूत्वा सकलार्थान् प्रकाशयति। यथा निक्षिप्तः वाणः वेगरुपव्यापारेण शत्रोः वक्षस्थलं संभिद्य प्राणान् अपि हरति तथैव अभिधा सङ्केतितार्थां प्रतिपाद्य दीर्घतरो भूत्वा व्यङ्ग्यार्थमपि प्रकाशयति। पुनश्च दशरूपककारेण धनिकेन उच्यते - तात्पर्यव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।

यावत्कार्यप्रसारित्वत्तत्पर्यं न तुलाधृतम्।।[४]

अर्थात् तात्पर्यम् एव व्यञ्जकम्। व्यङ्ग्यार्थः तात्पर्येणैव अवगम्यते। अतः तात्पर्यवृत्तेः अतिरिक्तं व्यञ्जनावृत्तिविशेषं किमपि नास्तीति ज्ञानव्यम्। तात्पर्यवृत्या एव पदार्थान्वयबोधः, व्यङ्ग्यार्थावबोधश्च भवति।

भट्टलल्लोट - धनिकयोः व्यङ्ग्यबोधनक्षमत्वं अभिधया तात्पर्येण वा भवतीति मतं खण्डयितुं विश्वनाथः पूर्वाचार्यमतम् उपस्थापयति यत्-

शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः।

अर्थात् केवलं सङ्केतितार्थं प्रतिपाद्यं अभिधा विरमति, पुनश्च पदार्थानाम् अन्वयम् अवबोध्य तात्पर्यवृत्तिः विश्रान्ता भवति । अतः अभिधया तात्पर्येण वा व्यङ्ग्यार्थावबोधः नैव सम्भवति।

भट्टलल्लोटमतं खण्डयितुं विश्वनाथः भिन्नयुक्तिमपि उपस्थापयति। यदि अभिधा एव दीर्घदीर्घतरा भूत्वा लाक्षणिकार्थस्य प्रकाशनं करोति तर्हि पृथक् रूपेण लक्षणाव्यापारस्य स्वीकारः कथं क्रियते ? लक्षणया व्यङ्ग्यार्थावगमः उदाहरणमुपस्थापयति-

"ब्राह्मण! पुत्रस्ते जात, कन्या ते गर्भिणी" इति ।

एतस्मात् वाक्यात् प्रतीयमानः हर्षशोकाद्यर्थः वाच्यायमानः न भवति। अर्थात् हर्षशोकाद्यर्थः न वा अभिधया, न च लक्षणया स्वीकर्त्तव्या। अतः लक्षणया व्यङ्गबोधनं भवतीति युक्तिः असमीचिना।

अभिहितान्वयवादी प्रभाकरः स्वीकरोति यत् अभिधया एव व्यङ्ग्यार्थावगमः भवति। "यत्परः शब्दः स शब्दार्थः" इति न्यायात् अभिधया एव रसादिव्यङ्ग्यार्थाः अवगम्यन्ते। यस्मिन् अर्थे यस्य शब्दस्य तात्पर्यं वर्त्तते स एव शब्दार्थः इति तेन उच्यते। अत्र विश्वनाथः "तत्परत्वं" इति शब्दस्योपरि सन्देहास्पदो भूत्वा वदति "तत्परत्वं" इत्यस्योद्देश्यं यदि तात्पर्यवृत्या बोधकत्वं स्वीक्रियते तर्हि का सा तात्पर्यवृत्तिः ?

अभिहितान्वयवादीनां तात्पर्यवृत्तौ तादृशी क्षमता नास्ति। यतो हि "शब्दबुद्धि कर्मणां विरम्य व्यापाराभावः" इति न्यायेन अन्वयपरकार्थं प्रकाश्य व्यापारः तत्रैव विरमति। यदि तत्परत्वम् इत्यनेन कश्चन भिन्नार्थः गृह्यते अर्थात् भिन्ना काचित् तात्पर्यवृत्तिः स्वीक्रियते तर्हि न काऽपि विप्रतिपत्तिः। यतो हि भिन्ना तात्पर्यवृत्तिरेव व्यञ्जना व्यापारः। केवलं नाममात्र विवादः इति ज्ञातव्यम्।

पुनश्च तात्पर्यवृत्या व्यङ्ग्यार्थावगमः भवतीति स्वीक्रियते चेत् रसनिष्पत्तौ तत्परीक्षणं कर्त्तव्यम्। तात्पर्यवृत्या रसनिष्पत्तौ विभावादीनां संसर्गः रसादीनां प्रकाशनं सहैव भवति। परन्तु वास्तविकस्थितिः तद्भिन्ना वर्त्तते। कारणरूपविभावानाम् उपस्थितेः अनन्तरमेव कार्यरूपरसस्य निष्पत्तिः भवति। अतः तात्पर्यवृत्या रसास्वादः निष्पत्तिः वा नैव सम्भवति।

पुनश्च लक्षणावृत्तौ व्यङ्ग्यार्थावगतिः भवतीति ये स्वीकुर्वन्ति तेषां मतखण्डनार्थं विश्वनाथः वदति तेषां कृते "गङ्गायां घोषः" इत्युदाहरणमेव पर्यात्पम्। "गङ्गायां घोषः" इति कथनेन लक्षणया केवलं तटाद्यर्थमेव अवबोध्य लक्षणाव्यापारः विरमति। अर्थात् तटाद्यर्थस्य प्रकाशनादनन्तरं यदि व्यापारः विरमति तर्हि शीतत्व-पावनत्वादिकस्य अर्थविशेषस्य प्रकाशनार्थं काचित् भिन्ना वृत्तिः आवश्यकी या तु व्यञ्जना वृत्तिः इत्युच्यते।

अपि च अभिधावृत्या प्रतिपाद्यवाच्यार्थात् व्यञ्जनावृत्या प्रतिपाद्यः व्यङ्ग्यार्थः भिन्नतां विभर्त्ति। एतत् प्रतिपादयितुं विश्वनाथेनोक्तम् -

बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम्।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः।।[५]

अर्थात् बोद्धा-स्वरूप-संख्या-निमित्त-कार्य -प्रतीति-काल-आश्रय-विषयादिभेदेन व्यङ्ग्यार्थः अभिधेयार्थात् भिन्नतां विभर्त्ति।

बोद्धृ भेदस्य तात्पर्यं वर्त्तते यत् पदपदार्थमात्रज्ञाननिपुणाः वैयाकरणाः व्यङ्ग्यार्थज्ञाननिपुणेभ्यः सहृदयेभ्यः भिन्नाः भवन्ति । तथैव स्वरूप-संख्यादिभेदेन व्यङ्ग्यार्थः वाच्यार्थात् भिन्नः भवति।

पुनश्च लक्षणया रसास्वदः नैव सम्भवतीति प्रतिपादयितुं विश्वनाथः भिन्नमतमुपस्थापयति। सः वदति यत् लक्षणायां मुख्यार्थस्य बाधः भवति एव। परन्तु व्यङ्ग्यार्थे मुख्यार्थबाधस्य अनिवार्यता नास्ति। यथा "शून्यं वासगृहं....." इत्यादिषु स्थलेषु लक्षणाभावेऽपि व्यङ्ग्यप्रतीतिः शृङ्गारप्रतीतिः वा भवति। अतः लक्षणातः व्यञ्जना पूर्णतया भिन्ना भवतीति ज्ञातव्यम्।

**"रसवस्त्वलङ्कारूपस्य ध्वनेरनुमित्या अननुमेयरूप एव ध्वन्यर्थः"**[६] इति शङ्कुक-महिमभट्टादिमतं दूषयता ध्वनिवादिना प्रतिपद्यते-

लिङ्गलिङ्गिभावसम्बन्धेन दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान् शकुन्तलारूप-विभावादिमत्त्वात्, विलक्षणकटाक्षादिमत्त्वाद् वा यो नैवं स नैवं यथाऽहम् इत्यनुमानात् रसध्वनेरनुमेयत्वकथनं न साम्प्रतम्। यतो हि पूर्वोक्तानुमाने व्यतिरेकदृष्टान्तेन सहृदयस्यैव रसानुभवप्रतिषेधो भवति। एवमेव वस्तुध्वनिस्थले

भ्रम धार्मिक विश्वस्तस्स श्वाद्य मरितस्तेन।
गोदावरीनदीकच्छकुञ्जवासिना दृप्तसिंहेन।।[७]

इत्यादौ गोदावरीतीरं भीरुभ्रमणायोग्यं भयकारणसिंहोपलब्धे दृप्त यत् यत् भीरूभ्रमणयोग्यं तत्तद् भयकारणाभाववत्। इत्यादि अनुमानेन भ्रमणनिषेधरूपं वस्तु व्यङ्ग्स्यानुमेयत्वमपि व्यभिचारासिद्धबाधितरूपहेत्वाभासेन नैव सम्भाव्यते। एवमेव अलङ्कारध्वनिस्थले -

लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्
स्मेरेऽधुना तव मुखे तरलायताक्षि!
क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव ज(ड)लराशिरयं पयोधिः।। [८]

इत्यादौ तन्वीवदनारविन्दं चन्द्रतुल्यं चन्द्रो वा (पयोधौ क्षोभात्) क्षोभाभावेन जडत्वात्, इत्यद्यनुमानेन उपमारूपकादिध्वनेरनुमेयत्वमपि न युक्तं, समुद्रे क्षोभस्य कारणान्तरतोऽपि सम्भवात् हेतोर्व्यभिचारात्।

एवं प्रकारेण विश्वनाथेन महिमभट्टस्य अनुमानेन व्यङ्ग्यार्थागमः भवतीति सिद्धान्तमपि सयुक्तिकं पूर्णतया विखण्डितम्। पुनश्चार्थापत्तौ ध्वनिर्नास्तीति ज्ञातव्यम् । उपपदज्ञानेन उपपादकस्य अर्थस्य आपत्तिः कल्पनमर्थापत्तिः। येन विना यदनुपपन्नं तत् तेनाक्षिप्यते इति रीत्या पीनश्चैत्रो दिवा नात्ति इत्यत्र भोजनं विना पीनत्वानुपपत्या रात्रिभोजनं यथा अर्थपत्या प्रतीयते तथा सर्वत्र अनुपपन्नम्। यथा -

निश्शेषच्युतचन्दनं स्तनतटं निमृष्टरागोऽधरो
नेत्र दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति! बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्।।[९]

इत्यादौ अधमपदप्रकाशितो ध्वनिवादिनां दूत्या नायकसमीपगमनरूपः ध्वन्यर्थः अपि नन्दनच्यवनादेः अन्यथानुपपत्या नायकान्तिकगमनरूपस्यार्थस्य अर्थापत्त्यैव बोधनात्

विधिरूपो वाच्यार्थ एवेति मीमांसकमतं दूषयन् ध्वनिवादि प्राह-

अर्थापत्तिस्तु नेवेह प्रमाणन्तरमिष्यते।[१०]

अत्र अनुमाने एव अर्थापत्तेः गतार्थतया यथा अनुमाने ध्वनेरन्तर्भावो न भवति,तथैव अर्थापत्तावपि तस्यन्तर्भावो भवितुं न शक्नोति।

अपरञ्च निश्शेषच्युतचन्दनमित्यादौ नन्दनच्यवनादेः स्नानकार्येणापि सम्भवात् तदन्तिकगमनरूपध्वन्यर्थः अर्थापत्या नैव बोध्यो भवेत् । अतः एतादृशस्थलेषु पृथक् ध्वन्यार्थः मन्तव्यः एव । एतत्सर्वं प्रतिपाद्य विश्वनाथः वदति केयं नवीना वृत्तिः या तु वस्त्वलङ्कारसगुणीभूतव्यङ्ग्यादीनां प्रकाशने समर्था भवति। तेनोक्तम् -

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रस व्यक्तौ पुनवृत्तिं रसनाख्या परे विदुः।।[११]

अर्थात् एषा नवीना वृत्तिः व्यञ्जनेति ज्ञातव्या । रसप्रतिपादनसामर्थ्यत्वात् रसना वृत्तिः अपि एतस्याः नामान्तरम्।।

---

**सन्दर्भाः**

१. साहित्यदर्पणम्, पञ्चमपरिच्छेदः, कारिका
२. अभिधावृत्तमातृका
३. अभिधावृत्तमातृका
४. दशरूपकम्
५. साहित्यदर्पणम्, प्रथमपरिच्छेदः, का- २
६. व्यक्तिविवेकः
७. ध्वन्यालोकः
८. व्यक्तिविवेकः, दशरूपकम्
९. काव्यप्रकाशः (प्रथमोल्लासः)
१०. मुक्तावलिः, कारिका १४४ ।
११. साहित्यदर्पणम्, पञ्चमपरिच्छेदः, कारिका ५।

—०—

*अध्यापकः शिक्षाशास्त्रविभागः,*
*श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी , ओडिशा ।*

# आयुर्वेदे जन्तुविज्ञानम्

**डॉ.विघ्नेश्वरमिश्रः**

आयुर्वेदशास्त्रमन्यतममेकं विज्ञानमिति यच्च वैद्यकशास्त्रमिति प्रख्यातं प्राचीनैर्भारतीयैः मुनिभिराविष्कृतम् । आयुर्वेद इति शब्दश्रवणसमनन्तरमेवास्यार्थप्रतीतिः प्रस्फुटा भवति । जीवनसूचकः आयुः इति शब्दः ज्ञानार्थको हि वेदशब्दः । तत्र सुश्रुतः आयुरस्मिन् विद्यतेऽनेन वा आयुर्विन्दतीत्यायुर्वेदः[१] इति प्रतिपादयति । चरकस्तु आयुर्वेदयतीति[२] आयुर्वेदः इति व्याख्याति तेन चास्य शास्त्रस्य प्राधान्यं जगति सुविदितमेव । आयुरनेन विन्दति वेत्ति वेत्यायुर्वेद इति। अष्टादशविद्यान्तर्गतधन्वन्त-रिप्रणीतविद्याविशेष इति। वैद्यकशास्त्रं चिकित्साशास्त्रं वेति। प्राणिनामापत्काले इदं हि शास्त्रमात्मानं प्रकटयति उद्धरति च । वस्तुतस्तु रोगाः भवन्ति प्राणिनामायुः नाशे कारणस्वरूपभूताः । अथ चास्ति भीतिः प्राणिनाम् एतेभ्यः, यस्मात् रक्षति इदं शास्त्रम् सर्वेषामपि रोगजातानां मूलकारणं शरीरस्य पर्यावरणस्य च विकृतिरेव वैद्यकग्रन्थेषु प्रतिपाद्यते । अतः सम्पूर्णस्य पर्यावरणस्य महत्त्वं साधितम् । प्रसङ्गेऽस्मिन् जन्तूनां पक्षोऽपि स्वीकृतः बहुधा आलोचितश्च ।

वस्तुतः नानार्थद्योतकोऽयं जन्तुशब्दः । जायते उद्भवतीति जन्तुः । कमिमनिजनीति उणादिसूत्रेण "तु" प्रत्यये कृते जन्तुरिति रूपनिष्पत्तिः । अस्यार्थः प्राणी इत्यमरः । यथोक्तममरकारेण-"**प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः**"। अमरकोशानुसारं प्राण्यर्थे सहृदयप्राणिनः अर्थे, जन्तुमात्रे शरीरिण्यर्थे च जन्तुशब्दो व्यवह्रियते । यस्मिन्नर्थे संस्कृतभाषायां जन्तुशब्दोपयुज्यते तस्मिन्नेवार्थे आङ्गलभाषायाः Animal शब्दोऽपि । अनेनापि पदेन प्राणिमात्रं गृह्यते । Oxford कोशानुसार A living organism which feeds on organic matter, usually one with specilized sense organs & a nervous system & able to respond rapidly to stimili. किन्तु लोकव्यवहारे यदि वयं पश्यामः तर्हि ज्ञायते यत् संस्कृतभाषायाः जन्तुशब्दः तथा आङ्ग्लभाषायाः Animal शब्दः पश्वर्थे एवोपयुज्यते अर्थात् सिंह-व्याघ्र-गो-गज-हस्ति-शृगालेत्यादीनां चतुष्पादिनामर्थे एव प्रयुक्तो भवति । कणादः भाषारत्ने पशून् एवं परिभाषते - "लोमवल्लाङ्गूलवत्वम्" अर्थात् केशयुक्तः पुच्छयुक्तश्च जन्तुः एव पशुः । सुश्रुतसंहिता-चरकसंहिता-गजायुर्वेदाश्चायुर्वेदीत्यादिषु आयुर्वेदग्रन्थेषु जन्तूनां स्वरूपस्वभाववर्णनपराः विचाराः विकीर्णा समुपलभ्यन्ते ।

**सुश्रुतसंहिता -** सुश्रुतसंहितायां प्रमुखरूपेण क्षीरवर्गे, दधिवर्गे, घृतवर्गे, मूत्रवर्गे, मांसवर्गे च जन्तुसम्बद्धतत्वानि वर्णितानि सन्ति । क्षीरवर्ग: - क्षीरवर्गे अज-गो-उष्ट्र-अविक-अश्वेत्यादीनां दुग्धस्य महत्वं समवर्णि । यथा - अजादुग्धस्य गुणान् वर्णयन् संहिताकार: यत् अजादुग्धं गोदुग्धमिव हितकारि: भवति, एतत् राजयक्ष्माया: रोगिणां कृते महदुपकारि भवति । अजादुग्धं काशस्य रक्तपित्तस्य चापि नाशकम् सुश्रुतसंहितानुसारमेतत् सर्वव्याधिहरम् । यथोक्तम् -

गव्यतुल्यगुणं त्वाजं विशेषोच्छोषिणां हितस्य ।
दीपनं लघु सङ्ग्राहि श्वासकाशास्त्रपित्तनुत् ।।
अजानामप्यकामत्वात् कटुतिक्तनिषेवणात् ।
नात्यम्बुपानाद्व्यायामात्सर्वव्याधिहरं पय: ।।[३]

दधिवर्ग: - दधिवर्गे गो-उष्ट्र महिषी-चाविकेत्यादीनां दध्न: गुणा: वर्णिता: । सुश्रुतसंहितानुसारं महिष्य: दधिवातपित्तप्रशामकं कफवर्धकं स्निग्धं च भवति । यथोक्तम् -

विपाके मधुरं वृष्यं वातपित्तप्रसादनम् ।
बलसंवर्धनं रुच्यं धात्वग्निबल वर्द्धनम् ।।[४]

किन्तु सर्वविधदधिषु गोदधि एव श्रेष्ठम् -

दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ।
विज्ञेयमेवं सर्वेषु गव्यमेव गुणोत्तरम् ।।[५]

घृतवर्ग: - घृतवर्गे गो-उष्ट्र-महिष-अविकेत्यादीनां घृतस्य गुणानामुपयोगितायाश्च वर्णनं समुपलभ्यते । गोघृतं यथा -

विपाके मधुरं शीतं वात्तपित्तविषापहम् ।
चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिगुणोत्तरम् ।।[६]

**मूत्रवर्ग: -** मूत्रवर्गे गर्दभ-अश्व-हस्ति-महिषेत्यादीनां मूत्रस्य गुणानाम् उपयोगितायाश्च वर्णनं कृतमस्ति । सुश्रुतमतानुसारं गोमुत्रमतीवलाभदायकं भवति । एतत् कटु तीक्ष्णं च भवति तथा अनेकरोगान् नाशयति । यथोक्तं संहिताकारेण गोमुत्रं कटु तीक्ष्णोष्णं साक्षारत्वान्न वातलम् । लघ्वाग्निदीपनं मेध्यं पित्तलं कफवातजित् ।

शूलगुल्मोदरानाह विरेकास्थापनादिषु ।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ।।[७]

**मांसवर्ग: -** मांसवर्गे जन्तुप्रकाराणां वर्णनं वर्तते । मांसवर्गे वर्णिता जन्तव: सन्ति - जलेशया:, अनुपा:, ग्राम्या:, क्रव्यभुजा:, एकशफा, जांगला:, विष्कारा:, प्रस्तुदा:,

प्रसहाः, बिलेशयाः, कुलचराः, प्लवाः, कोषस्थाः, पादिनः, नादेयाः, सामुद्राः इत्यादयः । सुश्रुतसंहितायाः कल्पस्थाने जन्तूनां विस्तृतं वर्णनमुपलभ्यते । अस्मिन् अध्याये विषवर्णनप्रसङ्गे सर्प-मूषक-लूता-वृश्चिक-मण्डुक-पिपीलिका-मक्षिका-मशक-कीटेत्यादिनां जन्तूनां विभिन्नप्रजातीनां वर्णनं कृतं वर्तते । अत्र महर्षिणा सुश्रुतेन जन्तूनां भेदप्रभेदानां वर्णनं सम्यक् कृतवान् ।

**सर्पाणां वर्गीकरणम्** -सर्पस्य प्रकाराणां वर्णनं कुर्वन् कथयति संहिताकारः यत् सर्पस्य अशीति प्रमुखाः प्रकाराः भवन्ति । ते दर्वीकर - मण्डलि-राजीमत-निर्विषवैकररञ्जकरूपेण विभक्तास्सन्ति । दर्वीकरसर्पस्य २६ प्रकाराः, मण्डलीसर्पस्य २२, राजीमन्तस्य १०, निर्विषस्य १२, वैकरञ्जकस्य ३ प्रकाराः भवन्ति । वैकरञ्ज मण्डालीन राजमन्तानां संसर्गात् ७, अन्यसर्पाः उद्भवन्ति । अनेन प्रकारेण सर्पस्य "अशीतिप्रकाराः" ८ उक्ताः इति ।

**चरकसंहिता** - चरकसंहितायाः सूत्रस्थानस्य मांसवर्गे जन्तूनां वर्णनक्रमे जन्तूनां विविधसमुहेषु विभाजनं कृतं वर्त्तते । जन्तुवर्गे मृग-वारिशय-वारिचर-विष्कर-प्रभुतयः प्रमुखाः सन्ति ।

कूर्मः, कर्कटको मत्स्यः, शिशुमारस्तिमिङ्गिलः ।
शुक्तिशङ्खोद्रकुम्भीरचुलुकीमकरादयः वारिशयाः प्रोक्ताः।।[९]

ये समूहे निवसन्ति तेषां समूहः सहचारिवर्गे अन्तर्भूतः -

हंसः क्रौञ्चो बलाका च बकः कारण्डवः प्लवः ।
शरारिः पुष्कराह्वश्च केशरी मणितुण्डकः ।।
मृणालकण्ठो मद्गुश्च कादम्बःकाकतुण्डकः ।
उत्क्रोशः पुण्डरीकाक्षो मेधरावोऽम्बुकुक्कुटी।।[१०]

चरकसंहितायाः गोरसरवर्गे उष्ट्री-महिष-छाग-आविक-हस्तिनीत्यादीनां दुग्धस्य उपयोगितायाः महत्त्वस्य च वर्णनं कृतं वर्तते । छागस्य दुग्धवैशिष्ट्यमेवं वर्णितम् -

छागं कषायमधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम्।।[११]

विषचिकित्सितं नामकेऽध्याये[१२] सर्प-लूता-गृहगोधिका-मक्षिका-मत्स्यकीटेत्यादीनां वर्णनमुपलभ्यते ।

**अश्वायुर्वेदः (हयायुर्वेदः)** शालिहोत्रस्य हयायुर्वेदनामकग्रन्थस्तु नोपलभ्यते । किन्तु विविधसंस्कृतग्रन्थेषु प्राप्तेभ्यः लेखेभ्यः तत्रोल्लिखितानाम् अश्वानां व्याधीनां तच्चिकित्सायाश्च

ज्ञानं भवति । ग्रन्थोऽयमष्टाध्यायेषु विभक्तोऽस्ति उन्नयनामकस्य प्रथमस्थानस्य शारदाध्याये शारदाख्यस्य रोगविशिष्टस्य तन्निवारणोपायानां वर्णनमस्ति । मात्राज्ञानाध्याये औषधिपरिमाणनिरूपणं कृतं वर्तते । उत्तरस्थाननामकस्य द्वितीयाध्यायस्य त्रिविधरोगविज्ञान-नामकेऽध्याये त्रिविधोपचाराणां निरूपणम्, अभिष्यन्दाध्याये अभिष्यन्दनिरुपणम्, पादरोगाध्याये हयपादरोगोल्लेख:, ग्रहणीनामकेऽध्याये उदरचिकित्साविवेचनम्, विषोपशमाध्याये विषज्ञानस्य विषचिकित्सायाश्च वर्णनं समुपलभ्यते ।

शारीरकनामकस्य तृतीयस्थानस्य अधिकारचिकित्साध्याये रोगनिवारणोपकथनम्, शल्योकरणाध्याये शल्यनिष्कासनवर्णनम्, योनिदोषाध्याये तुरङ्गस्य योनिदोषचिकित्सा-निरुपणम्, वृषशुक्राध्याये अश्वलिङ्गोपचारविधिवर्णनम्, शालुकीनामकेऽध्याये मलरोगाणां विवेचनम्, शिरसन्तापाध्याये शिरव्याधिनामुपचार कथनम्, ज्वराध्याये ज्वरप्रकाराणां विवेचनम् इत्यादि वर्णनं विहितमस्ति । सिद्धिस्थापनस्य स्नेहव्यापताध्याये अपच्यपदार्थ-भक्षणकारणादुत्पन्नां व्याधिनामुल्लेख:, क्षीरव्यापताध्याये दुग्धनिर्मितवस्तुभक्षण-कारणादुत्पन्नां रोगाणां विवेचनं सुराव्यापताध्याये सुरासम्बद्धवस्तुभ्य: जायमानानां रोगाणां वर्णनम्, धान्यव्यापताध्याये धान्योत्पन्नरोगविवचनम्, लवणादिव्यापताध्याये लवणोत्पन्नरोगोल्लेखश्च वर्तते ।

रहस्यस्थानस्य आयुज्ञानाध्याये जीवनावधिनिर्णयवर्णनम्, कल्पारिष्टकाध्याये विभिन्नौषधीनां वर्णनम्, मन्त्रयोगाध्याये मन्त्रप्रयोगादिविधिविवेचनम्, क्रियायोगाध्याये उपचारविधे: उल्लेखश्च वर्तते । नकुलस्य अश्वशास्त्रे अश्वसम्बद्धाविविधविषया: समुल्लिखितास्सन्ति । अस्मिन् अश्वानां रोगनिवारणार्थम् औषधीनामुपायानां वर्णनेन सदैव अश्वविषये अन्यविविधाविषया: अपि विवेचितास्सन्ति । यथा - अश्वस्य शरीररचना, अश्वस्य प्रमुखविशेषता: अश्वायुवर्णनम्, अश्वस्य प्रमुखविशेषता: अश्वायुवर्णनम्, अश्वस्य प्रमुखाङ्गानां वर्णनम्, अश्वस्य विभिन्नवर्णा:, अश्वावर्ता युद्धोपयोग्यश्वा: इत्यादय: विषया: सन्ति । अश्वस्य आयुसिद्धान्तं वर्णयन् कथयति अश्वशास्त्रकार: यत् यथा नरस्य आयु: १०० वर्षाणि, गजस्य १२०, गो: २४, स्वरस्य उष्ट्रस्य च २५, कुक्कुरस्य १६ वर्षाणि, श्रृगालस्य २५, कृमीणां ७ वर्षाणि च वय: भवति तथैव अश्वस्य ३२ वर्षाणि आयुर्भवति[१३] । दीर्घायुनामश्वानां लक्षणानि वर्णयता अश्वशास्त्रकारेणोक्तं यत् महाकाया:, मघोणा:, पृथुवक्षयुक्ता:, स्निग्धाङ्गाश्चाश्वा: दीर्घायवो: भवन्ति।[१४]अश्वशास्त्रे अश्वानां शरीरस्यैव न प्रत्युत मनस्तत्वमपि वर्णितम् । अश्वस्य धैर्यविषये वर्णयन् कथयति अश्वशास्त्रकार: यत् लोहबन्धे, क्षते, रोगे, युद्धे, गजभटाकुले, जले अग्निवृत्ते अश्वा: धैर्यं न त्यजन्ति।[१५]लोहस्थाने प्रहारे च अश्वा: भीता: भवन्ति।[१६]चणकस्य चञ्चलाङ्गानां वर्णनं

कुर्वन् कथयति यत् - जिह्वा, कर्णौ, नयने, पदानि, पुच्छं शस्तानि च अश्वस्य चञ्चलाङ्गानि भवन्ति।[१७] एवं प्रकारेण जन्तुविज्ञानस्य अनेकानि तत्त्वानि तत्र तत्र निरुपितानि विद्यन्ते ।

**सन्दर्भाः**


१. सु.सं.१.२२
२. च.सं.३०-२३
३. सु. सं.,अ.४५, श्लोकाः. ५१-५२
४. सु. सं.,अ.४५, श्लोकः.-६९
५. सु. सं.,अ.४५,श्लोकः - ७५
६. सु. सं.,अ.४५, श्लोकः-९७
७. सु. सं.,अध्याय - ४६, श्लोकः - २२१
८. सु.सं., अध्यायः ४६ श्लोकाः १०-१३
९. च.सं.,अध्याय.२७,श्लोकाः.४०
१०. च. सं., अध्याय.-२७, श्लोकाः ४१-४३
११. च. सं., अध्याय- २७, श्लोकः २२२
१२. च. सं., अध्याय- २७, श्लोकाः - १-२५४
१३. च. सं., अध्याय- २७, श्लोकाः - १-२५४
१४. अ० शा० आयुर्लक्षणाध्यायः, श्लोकः- ३
१५. अ० शा० मनस्तत्त्वविज्ञानम्, श्लोकः - ५
१६. अ० शा० मनस्तत्त्वविज्ञानम्, श्लोकः-१
१७. अ० शा० मनस्तत्त्वविज्ञानम्, श्लोकः- ३


**संकेताक्षरसूची -**

सु.सं.- सुश्रुतसंहिता, च.सं. - चरकसंहिता, अ.शा. - अश्वशास्त्रम्

**सहायकग्रन्थाः-**


चरकसंहिता - चौखम्बा सुरभारती प्रकाशन, वाराणासी,२०१५
चरकसंहिता - DPB Publication, Agra, 2000.
सुश्रुतसंहिता - चौखम्बा सुरभारती प्रकाशन, वाराणासी,२०१९
अश्वशास्त्रम् - Vyas Publications, Luckow, 1985.


—o—


*आसिष्टाण्ट प्रोफेसर संस्कृतविभागः,*
*श्रीकृष्णचन्द्रगजपतिस्वयंशाशितमहाविद्यालय,*
*पारलाखेमुण्डि, गजपति, ओडिशा ।*

# अश्वमेधयागे ब्रह्मोद्यप्रसङ्गः

डॉ. शत्रुघ्नपाणिग्राही

वेदः भवति यज्ञप्रधानः। शुक्लयजुर्वेदस्य प्रथमाध्यायतः आरभ्यः ऊनचत्वारिंशत्तमाध्यायं यावत् यज्ञकर्मसम्पादनार्थं श्रुत्युपदेशः प्राप्यते। तत्र शुक्लयजुर्वेदस्य द्वाविंशतितमाध्यायतः पञ्चविंशतितमाध्यायं यावत् अश्वमेधयागस्य वर्णनं दृश्यते।यागे देवतायाः प्राधान्यं दृश्यते। कमपि देवमुद्दिश्य द्रव्यस्य त्यागः यागः इति कथ्यते[१]। येषां यज्ञानां साक्षात् श्रुतिषु विधानमुपलभ्यते ते श्रौतयज्ञा उच्यन्ते। येषां विधानं गृह्य-धर्मसूत्रेषु क्रियते ते स्मार्तयज्ञा भवन्ति। अश्वमेधयागः श्रौतयागः वर्त्तते। अस्मिन् यागे अश्वः द्रव्यरूपेण स्वीक्रियते। ऐतरेयब्राह्मणे[२] शतपथब्राह्मणे[३] च पुरुष-अश्व-गो-अवि-अजाख्यानां पञ्चविधानां पशूनां निर्देश उपलभ्यते। तत्रैव पञ्च पशवो मेध्या उक्ताः[४]। अतः अश्वमेध इति नामकरणं जातम्। ब्रह्महत्यादोषदूरीकरणार्थमयं यागः परिपाल्यते। भगवता रामचन्द्रेणापि अयं यागः सम्पादितः। अस्य कर्मणोऽधिकारी अभिषिक्तः सार्वभौमो राजा भवति। फाल्गुनमासे शुक्लपक्षे अष्टम्या नवम्या वा तिथावस्यारम्भः क्रियते[५]। अश्वमेधाय यस्य अश्वस्य वरणं क्रियते तस्य पूर्वोऽर्धभागः कृष्णः, पश्चात्तनो भागः श्वेतः, ललाटे च शकटाकारं श्वेतं चिह्नं चेति अपेक्षितम्[६]। अश्वमेधीयोऽश्वः ईशान्यां दिशि उत्सृज्यते। तम् अस्त्रकवचधारिणः अश्वरक्षिणो अनुयान्ति। ते एक संवत्सरपर्यन्तमश्वं भ्रामयित्वा प्रत्यानयन्ति। एकवर्षं यावत् अयं याग : प्रचलति। तत्रावसरे ऋत्विजः यत् परस्परं वार्तालापं कुर्वन्ति स ब्रह्मोद्यप्रसङ्ग इति कथ्यते।

वपाहोमात्प्राक् चतुर्भिः ऋग्भिः पूर्ववद् उक्तिप्रयुक्त्या सदोमध्ये गत्वा होता अध्वर्युश्च संवादं कुरुतः[७]। तत्र होतारं ब्रह्मा पृच्छति यूपमभितः। मन्त्रेणापि निगदितमस्ति यत् यूपस्य दक्षिणत उदङ्मुखो ब्रह्मा यूपोत्तरतो दक्षिणामुखं होतारं पृच्छति[८]। अष्टादश ऋचो ब्रह्मद्यसंज्ञाः ब्रह्मोद्यं नाम अत्र परस्परसंवादः। तत्र आदौ होता अध्वर्यं चतुरः प्रश्नान् पृच्छति। कः स्विद् एकाकी असहायो भूत्वा चरति ग च्छति? कः स्वित् विनष्टः सन् पुनर्जायते उत्पद्यते? किं स्वित् हिमस्य भेषजम् औषधम्? किं स्वित् आवपनं महत्[९]? आ समन्ताद् उप्यते यस्मिंस्तदावपनस्थानं वर्त्तते।

होत्रा पृष्टानां प्रश्नानाम् उत्तराणि ददाति अध्वर्युः। यथा- सूर्य इत्याचष्टे होता अध्वर्युं प्रति वक्ति[१०]। सूर्योऽसहायो भूत्वा गच्छति। अनेन होता अध्वर्युश्च यजमाने ब्रह्मवर्चसं धत्तः। यथा - असौ वा आदित्य एकाकी चरत्येष ब्रह्मवर्चसं ब्रह्मवर्चसमेवास्मिंस्तद्धते[११]। चन्द्रमाः क्षीणः पुनर्जायते वर्धते अनेनायुर्द्धते। श्रूयते यथा - "चन्द्रमा वै जायते पुनरायुरेवास्मिनंस्तद्धत्ते"[१२]। हिमस्य भेषजमग्निः अनेन तेजो धृतम्। यथा -"अग्निर्वै हिमस्य भेषजं तेज एवास्मिंस्तद्धत्ते"[१३]। भूमिरियं लोके आवपनम् अनेनास्मिन् प्रतिष्ठां धत्ते। यथा - "अयं वै लोक आवपनं महदस्मिन्नेव लोके प्रतितेष्ठति"[१४]। अस्मिन् ब्रह्मोद्यप्रसङ्गे शुक्लयजुर्वेदीयमन्त्रमाध्यमेन उत्तरं होता ददाति[१५]। यथा-

"सूर्य एकाकी चरति चन्द्रमा जायते पुनः।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत्[१६]।।" इति ।

अश्वमेधयागे होता संवादात् प्राक् अध्वर्युं पृच्छति । तदनन्तरम् अध्वर्युः प्रश्नानाम् उत्तरं ददाति । अधुना अध्वर्युः होतारं प्रति पृच्छति- हे होतः! किं स्वित् सूर्यसमं ज्योतिः ? किं स्वत् समुद्रसमं सरः ? किं स्वित् पृथिव्यै वर्ष्यम् ? कस्य मात्रा परिमाणं वा न विद्यते ?[१७] एतेषां चतुर्णां प्रश्नानाम् उत्तराणि ददाति होता। सूर्यसमं ज्योतिः ब्रह्म अस्ति। अन्तरिक्षं समुद्रसमं सरं वर्तते। यतोऽहि वृष्टिः भवति। पृथिव्याः सकाशात् इन्द्रः वर्षीयान् बृहत्तरः विद्यते। गोः मात्रा इयत्ता न विद्यते यज्ञधारकत्वात्[१८]। एवंविधाभिः पुनः चतसृभिः ऋग्भिः होतृ-अध्वर्य्योः संवादो भवति । सः संवादः पूर्वोक्तस्य ब्रह्महोत्रोः संवादरूपेण पठितस्य मन्त्रस्य पुनरुक्तिः विद्यते। होता ब्रह्माणं पृच्छति [१९]। हे ब्रह्मन्! का स्वित् पूर्वचित्तिः आसीत् ? किं स्वित् बृहद्वयः आसीत् ? का स्वित् पिलिप्पिला आसीत् ? का पुनरासीत् पिशङ्गिला[२०] ? एते चत्वारः प्रश्नाः ब्रह्मणे होत्रा पृष्टाः ।
ब्रह्मा होतारं प्रति विक्ति। स प्रश्नान् व्याकरोति यथा- "द्यौरिति प्रत्याह"[२१]। पूर्वचित्तिः पूर्वस्मरणविषया द्यौर्वृष्टिरासीत्। द्यौःशब्देन वृष्टिर्लक्ष्यते सर्वप्राणिनाम् इष्टत्वात्।श्रूयते यथा- द्यौर्वै वृष्टिः पूर्वचित्तिर्दिवमेव वृष्टिमवरुन्धे[२२] इति। अश्वः बृहद्वयः आसीत्। अश्वशब्देन अश्वमेघो लक्ष्यते। अश्वमेधेन वयसेव स्वर्गमारोहतीत्यश्वमेधो वयः। अवतीति अविः पृथिवी पिलिप्पिलाऽऽसीत्। वृष्ट्या भूः पिलिप्पिला स्निग्धा भवति। "श्रीर्वै पिलिप्पिला[२३]" इति श्रुत्या श्रयन्त एनामिति श्रीशब्देन भूरेव। रात्रिः पिशङ्गिला आसीत्। पिशमिति रूपनाम। पिशं नाम रूपं गिलतीति पिशङ्गिला । यतोहि रात्रौ सर्वाणि रूपाण्यन्तर्भवन्ति। श्रूयते च

यथा-

"द्यौरासीत्पूर्वचित्तिरश्व आसीद्वृहद्वय:।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला[२४]।।" इति ।

ब्रह्मा उद्गातारं ज्ञानाय पृच्छति[२५]। हे देवसख उद्गात! यदि जानासि कदाचित् विचार: आवश्यक: । इदानीम् अहं त्वां पृच्छामि यत् यदा विष्णु: यज्ञम् अकरोत् तेषु गार्हपत्याहवनीयदक्षिणाग्निषु यागकुण्डेषु समस्तं विश्वं सर्वं भूतजातं वा प्रविष्टम् आसीत् न वा[२६] ? अस्य प्रश्नस्योत्तररूपेण उद्गाता कथयति येषु त्रिषु पदेषु विश्वं भुवनमाविशति यत्त्वया पृष्टं तेषु त्रिषु पदेषु गार्हपत्यादिषु त्वया सह अहमपि अस्मि। अत: यत्र समस्तं जगत् आहवनीयादिषु कुण्डेषु लीनमभवत् तत्रैव अहमपि यज्ञकर्म कुर्वन् अस्मि। परन्तु झटिति एव पृथिव्यादिलोकानां भ्रमणं विधाय आगच्छामि। ततश्च वक्ष्यामि अस्मिन् सन्दर्भे इति भाव:। केन इति जिज्ञासायाम् उच्यते एकाङ्गेन एकाङ्गम् अत्र मन:। अत्र अन्त:करणेन इन्द्रियेण मनसा सर्वं ज्ञात्वा अहं भवन्तं वक्ष्यामि इति भाव:[२७]। कथनस्यायमेवाभिप्राय: विद्यते यत् जगत: सर्वत्र जीवरूप ईश्वर: विद्यते। स एव परमात्मा पुरुष: सर्वव्यापक: वर्त्तते। पुनश्च उद्गाता ब्रह्मणे प्रश्नं करोति हे ब्रह्मन् ! अहं पृच्छामि यत् स आत्मरूप: पुरुष: सांख्यपुरुषो वा केषु तत्त्वेषु वर्तते तथा च तस्मिन् पुरुषे कानि तत्त्वानि निहितानि सन्ति। उद्गातो: एतत्प्रश्ने ब्रह्मा कथयति-

पञ्चस्वन्त:पुरुष आविवेश तान्यन्त:पुरुषे अर्पितानि।
एतत्त्वात्र प्रतिमन्वानो अस्मि न मायया भवस्यत्तरो मत्।।[२८] इति ।

इदानीं ब्रह्मोद्गातारं पृच्छति[२९] । हे उद्गात: ! अस्य कति विष्ठा: नाम कियन्ति अन्नानि ? अक्षराणि च कति ? होमा: कति ? समिध: कति प्रकारा: ? ऋतौ कति होतार: यजन्ति[३०] ? एतेषां पञ्चाना प्रश्नानाम् उत्तरं ददाति उद्गाता। अस्य यज्ञस्य षट् अन्नानि सर्वेषामन्नानां षड्रसात्मकत्वात्। अस्य यज्ञस्य शतमक्षराणि छन्दोभिर्यज्ञो निष्पाद्यते तानि च छन्दांसि गायत्र्यादीन्यतिधृत्यन्तानि चतुर्दशचतुर्विंशत्यक्षरादीनि चतुर्वर्णान्तराणि तेषां क्रमोत्क्रमगत्या द्वाभ्यां शतमक्षराणि भवन्ति। यथा गायत्रीछन्दसि चतुर्विंशंति: वर्णा: तथा अतिधृति: षट्सप्तत्यक्षरा: एवं द्वै मिलित्वा शतमक्षराणि भवन्ति । अनेन प्रकारेण उष्णिक् २८ धृति: ७२ एवं शतम्। अनुष्टुप् ३२ अत्यष्टि:६८ एवं शतम्। अष्टि: ६४ बृहती ३६ एवं शतम्। अतिशक्वरी ६० पङ्क्ति: ४० एवं शतम् . शक्वरी ५६ त्रिष्टुप् ४४ एवं शतम्। अतिजगती ५२ जगती ४८ एवं शतम् अक्षराणि। अनेनाभिप्रायेण

शतमक्षराणीत्युक्तम्। होमाः अशीतिः अश्वमेधे एकविंशतिर्यूपाः तत्राग्निनिष्ट मध्यमयूपेऽश्वतूपरगोमृगान्नियुक्ति इतरेषु षोडश पशुन् तत्र विंशति यूपेषु चतस्त्रोऽशीतः पशवो भवन्तीत्यभिप्रायेणोक्तम्। तिस्त्रः समिधः अश्वतूपरगोमृगाः प्राजापत्याः पशवः तद्रूपाभिः समिद्भिर्यज्ञो दीप्त इति तिस्त्रः समिधः वर्णिताः। यज्ञस्य वेदनेन हेतुना ते तुभ्यं प्रवदामि। सप्त होतारो वषट्कर्तारः ऋतुयाजेषु यजन्ति।[३१]

इदानीमुद्गाता ब्रह्माणं पृच्छति यथा-

को अस्य वेद भुवनस्य नाभिं को द्यावा पृथिवी अन्तरिक्षम्।

कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः।।[३२]इति ।

उद्गात्रा चत्वारः प्रश्नाः पृष्टाः । तेषाम् छत्तराणि ददाति ब्रह्मा। अस्य भुवनस्य नाभिं कारणमहं जानामि । परब्रह्मैव जगत्कारणं जानामीत्यर्थः। द्यावापृथिवी अन्तरिक्षं च ब्रह्मणो विकारभूतमिति जानामि। बृहत्तः सूर्यस्योत्पत्तिकारणं ब्रह्मैव जानामि। अपि च परमात्मनो जातं चन्द्रमहं वेद्मि[३३]। यजमानः अद्धर्युं पृच्छति यथा- यजमानोऽध्वर्युं पृच्छामि त्वेति[३४]। पृथिव्याः परमन्तमवधिभूतं पर्यन्तं त्वामहं पृच्छामि। किमस्ति भुवनस्य नाभिः तदपि त्वां पृच्छामि। किमस्ति अस्वस्य वीर्यं त्वां पृच्छामि। किमस्ति वाण्याः परममुत्कृष्टं स्थानं त्वां पृच्छामि[३५]। अध्वर्युः यजमानं प्रत्याह[३६]। इयं वेदिः उत्तरवेदिः पृथिव्याः परः अन्तोऽवधिः। यदा पृथिव्यादयो लोका निःस्तृताः तदानीं पृथिवी सलिलमयी आसीत्। तस्यास्तत्स्वरूपादारभ्य पृथिव्याः पृष्ठे यदाग्नेः प्रादुर्भावः समजनि तावति महति काले पृथिव्यां विविधानि परिवर्तनान्यभूवन्। अतः पृथिव्याः वेदेश्च साम्यं स्वयं श्रुतिर्दशयति- इयं वेदिः परो अन्तः पृथिव्याः। अयं यज्ञोऽश्वमेधः भुवनस्य प्राणिजातस्य नाभिः। श्रूयते यथा - यज्ञाद्वै प्रजाः प्रजायन्ते। स वै यज्ञ एव प्रजापतिः[३७], पशवो हि यज्ञः[३८]। मनुनापि उक्तं यथा-

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः[३९]।। इति ।

अश्वस्य रेतोरूपः सोमः। अयं ब्रह्मा-नामकः ऋत्विक् वाचः त्रयीरूपायाः परमं व्योमस्थानम्। कारणं ब्रह्मणस्त्रिवेदसंयोगादित्यर्थः।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् आत्मसाक्षात्कार एव मनुष्यजीवनस्य अन्तिमसोपानं वर्तते । यमारूह्य मानवजीवनं कृतकृत्यं सम्पद्येत। परन्तु तदर्थं श्रेष्ठकर्म अपि अपेक्ष्यते। यज्ञो वै श्रेष्ठतमं कर्म[४०]इति ब्राह्मणवचनानुसारम्

अश्वमेधादियज्ञसम्पादनपूर्वकं ब्रह्मण: उपासनया पुरुष: भगवत: प्राप्तिं कुर्यात्। इदमेव अश्वमेधयागस्य लक्ष्यं वर्तते। इति।

---

**सन्दर्भा:**


१. देवतोद्देश्येन द्रव्यत्यागो याग: - कात्यायनश्रौतसूत्रे-१/२।
२. ऐतरेयब्राह्मणे-२/८।
३. शतपथब्राह्मणे-१/२/३/६-७ ।
४. पुरुषं वै देवा: पशुमालभन्त। तस्मादालब्धान्मेध उदक्रामत्। सोऽश्वं प्राविशत्। तस्मादश्वो मेध्योऽभवत् - ऐतरेयब्राह्मणे-२/८-९।
५. कात्यायनश्रौतसूत्रे-२०/१/२।
६. शतपथब्राह्मणे-१३/४/२/४।
७. प्राग्वपाहोमाद् होताध्वर्यु: सदसि संवदेते चतसृभि:-कात्यायनश्रौतसूत्रे-२०/७/१०।
८. ब्रह्मा पृच्छति होतारं यूपम् अभित: क: स्विदेकाकीति- तत्रैव-२०/५/२०।
९. क: स्विदेकाकी चरति क उ स्विज्जायते पुन:।
किं स्विद्धिमस्य भेषजं किंवावपनं महत्।। शुक्लयजुर्वेदे-२३/४५।
१०. कात्यायनश्रौतसूत्रे-२०/५/२१।
११. शतपथब्राह्मणे-१३/२/६/१०।
१२. तत्रैव-१३/२/६/११।
१३. तत्रैव-१३/२/६/१२।
१४. तत्रैव-१३/२/६/१३।
१५. कात्यायनश्रौतसूत्रे-२०/५/२१।
१६. शुक्लयजुर्वेदे-२३/४६।
१७. किं स्वित् सूर्यसमं ज्योति: किं समुद्रसमं सर:।
किं स्वित् पृथिव्यै वर्षीय: कस्य मात्रा न विद्यते।। इति तत्रैव-२३/४७।
१८. ब्रह्म सूर्यसमं ज्योतिर्द्यौ: समुद्रसमं सर:।
इन्द्र पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते।। इति तत्रैव-२३/४८।
१९. होता ब्रह्माणं का स्विदासीदिति- कात्यायनश्रौतसूत्रे-२०/५/२२।
२०. का स्विदासीत्पूर्वचित्ति: किं स्विदासीद्बृहद्वय:।
का स्विदासीत् पिलिप्पिला का स्विदासीत्पिशङ्गिला।। शुक्लयजुर्वेदे-२३/५३।
२१. कात्यायनश्रौतसूत्रे-२०/५/२३।
२२. शतपथब्राह्मणे-१३/२/६/१४।

२३. तत्रैव-१३/२/६/१६।
२४. शुक्लयजुर्वेदे-२३/५४।
२५. कात्यायनश्रौतसूत्रे-२०/७/११।
२६. पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ।
येषु विष्णुस्त्रिषु पदेष्वष्टस्तेषु विश्वं भुवनमाविवेश।। शुक्लयजुर्वेदे-२३/४९।
२७. अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश।
सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम्।। तत्रैव-२३/५०।
२८. तत्रैव-२३/५२।
२९. उत्तरौ च कत्यस्येति- कात्यायनश्रौतसूत्रे-२०/७/१३।
३०. कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति।।
शुक्लयजुर्वेदे-२३/५७।
३१. षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः।
यज्ञस्य ते विदथा प्रब्रवीमि सप्त होतार ऋतुशो यजन्ति।।
तत्रैव - शुक्लयजुर्वेदे-२३/५८।
३२. तत्रैव-२३/५९।
३३. वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम्।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः।। तत्रैव -२३/६०।
३४. कात्यायनश्रौतसूत्रे-२०/७/१४।
३५. पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम।।
शुक्लयजुर्वेदे-२३/६९।
३६. इयं वेदीरित्यध्वर्युः- कात्यायनश्रौतसूत्रे-२०/७/१५।
३७. कौषीतकिब्राह्मणे-१०/१,१३/१,२५/११।
३८. शतपथब्राह्मणे-३/१/४/९,३/२/३/११।
३९. मनुस्मृतौ-३/७६।
४०. शुक्लयजुर्वेदे-१/१,शतपथब्राह्मणे-१/७/१/५,
तैत्तिरीयब्राह्मणम्-३/२/१/४।

—०—

*सहायकाचार्यः, वेदविभागः,*
*श्रीसोमनाथसंस्कृतयुनिवर्सिटी, बेरावलम्, गुजरातराज्यम् ।*

## व्याकरणाध्ययनस्य प्राचीनविधिपरामर्शः

डॉ.जयश्री दाशः

शुद्धां भाषामप्रायोक्षच्चेदस्मल्लक्षितमर्थमपि स्पष्टतया निषचेष्यत। अशुद्धे प्रयोगे च न हि तदर्थबोधः। अतः भाषाधिकारवाप्तये तत्तत् व्याकरणं सम्यग्जानीयुः यतो ह्यर्थानां तत्त्वागमनं व्याकरणाधीनमिति विद्वन्मूर्धन्याः उररीचक्रुः। अतः लोके वर्तते ह्यस्य व्याकरणस्य लौकिकालौकिकभेदेन महत् प्रयोजनम्। अलौकिकप्रयोजनविषये भगवता पतञ्जलिना उच्यते - "एकः शब्दः सम्यग् ज्ञातः सुष्ठुः प्रयुक्तः स्वर्गे लोके च कामधुक् भवतीति"[१]। पुनश्च-"महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्"[२]। अनेन मोक्ष एव व्याकरणाध्ययनस्य परमं प्रयोजनमिति ज्ञायते। यतः धर्मार्थकाममोक्षाख्यपुरुषार्थफलप्रधाने कर्मनिबन्धने नानाविधसुखदुःखज्वालामालासमाकुलिते विचित्रेऽस्मिन् जगति तलेऽतीवदुर्लभं मानवजन्म। मानवजन्मलब्ध्वापि धर्मसाधनमन्तरा न परुषार्थसिद्धिः। धर्माधर्मविवेकाय साङ्गोपाङ्गवेदोऽध्येय ज्ञेयश्च। तदुक्तं पतञ्जलिना - "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयः ज्ञेयश्चेति।[३]" अथ च छन्दसां वेदानां प्रथमं मुख्यं प्रधानं वाङ्गं व्याकरणम्,तेन च मोक्षः प्राप्यते इति बुधाः प्राहुः। तत्र अलौकिकप्रयोजनविषये भाष्यकारः पतञ्जलिराह - "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"[४] इति मुख्यप्रयोजनत्वेन। "तेऽसुराः-दुष्टशब्दः-यदधीतम्-यस्तु- प्रयुङ्क्ते-अविद्वांसः-विभक्तिं कुर्वन्ति-यो वा इमाम्-चत्वारि-उतत्वः-सक्तुमिव-सारस्वतीम्-दशम्यां पुत्रस्य-सुदेवो असि वरुणेति[५]" त्रयोदशगौण-प्रयोजनान्युवाच। सम्प्रत्ति भाषाधिकारावाप्तिरेव व्याकरणस्यास्य मुख्यप्रयोजनम्। व्याकरणाध्यापनमाकर्षकं, रोचकम्, सुग्राह्यञ्च कर्तुं विभिन्नविधीनां प्रयोगः प्राचीनकालादेव क्रियते। तेषु सूत्रविधिभाष्यविधिवृत्तिविधिप्रक्रियाविधयः अन्यतमाः।

प्राचीनकाले वेदाभ्यासे वेदस्य स्वीकारविचाराभ्यासजपदानादिपञ्चक्रियाणां समावेशो भवति स्म। एवं प्रकारेण वेदाभ्यासेनैव तत्समयस्य शिक्षणविधेः बोधो भवति। प्राचीनानां शास्त्रशिक्षणपद्धतिः संस्कृतमामुलचुलं नुनमक्षुण्णतया संरक्षणे संवर्धने च समर्था भवति। वैदिककाले तथा च पाश्चात्यशिक्षणपद्धत्याः आगमनात्पूर्वं ये विधयः प्रयुज्यन्ते , ते सर्वे प्राचीनविधीनामन्तर्गते निधीयन्ते। विधयः एते ऋषिमहर्षीणां परम्परयाऽऽगतत्वात् पारम्परिकविधयः इत्यपि कथ्यन्ते।

**प्राचीनविध्युद्देश्यानि**

१. प्रामाणिकज्ञानोत्पादनम्।

२. विश्लेषणशक्तेः विकासः।

३. वेदानां शास्त्राणाञ्च संरक्षणम्।

४. तर्कशक्तेः चिन्तनशक्तेश्चाभिवर्द्धनम्।

५. सामान्यविशेषविवेचनम्।

६. शास्त्रार्थकौशलसम्पादनम्।

७. शास्त्रेषु पूर्णपाण्डित्यसम्पादनम्।

८. संश्लेषणव्याख्यानक्षमतायाः उत्पादनम्।

**प्रयोजनानि -** प्राचीनविधीनां व्याकरणशास्त्राध्यापने ,व्याकरणनियमानामध्यापने वा प्रयोजनानि नितरां विद्यन्ते। प्रक्रियाज्ञानं, सूत्राणां वृत्यानुवृत्याध्याहारदीनां नियमानाञ्च ज्ञानं, प्रक्रियाग्रन्थानां प्रकरणग्रन्थानाञ्च गहनाध्ययनं शुद्धाशुद्धज्ञानञ्चानेनैव शक्यम्। तदिह कतिपय प्रमुखप्रयोजनानि -

१. सूत्राणां कण्ठस्थीकरणेन प्रामाणिकज्ञानोत्पादनम्।

२. वृत्तिग्रन्थाध्ययनेन पुर्वापरविषयाणामवलोकनेन च तर्क-चिन्तनशक्त्योरभिवृद्धिः।

३. प्रक्रियाग्रन्थानामध्ययनेन विश्लेषणशक्तेः विकासः।

४. नूतनशब्दानां प्रयोगसामर्थ्यसम्पादनम्।

५. भाषागतदक्षताप्राप्तिः।

६. यथार्थज्ञानसम्पादनम् ।

७. शास्त्रेषु पूर्णपाण्डित्यप्राप्तिः।

८. तर्कचिन्तनशक्त्योरभिवृद्धिः।

व्याकरणशास्त्राध्यापने ,व्याकरणनियमानामध्यापने वा प्राचीनविधयः उपकुर्वन्ति। अत्र मनोवैज्ञानिकतायाः अभावसत्वेऽपि एतेषां महान् उपयोगः विद्यते। एभिः स्मरणशक्त्या समस्तस्यापि वाङ्मयरहस्यं मनसिस्थापनम्, तेन स्वशास्त्रस्य सम्यगवबोधः ,तद्विषये चिन्तनशक्तेः विकासः जायते। यद्यपि वर्त्तमानकाले एतेषां व्यापकप्रयोगः न दृश्यते तथापि गम्भीरशास्त्राणाम् अध्यापने संस्कृतपण्डितानां निर्माणे च इमे एव बिधयः समर्थाः इति सर्वसम्मतसिद्धान्तः।

**सूत्रविधिः-**

सूत्रत एव शब्दा: प्रतिपद्यन्ते इति भाष्यवचनम्। व्याकरणशास्त्रे एकलक्षणमुखेन अनेकलक्षणसंग्रह: सूत्रेण विधीयते। तदेवं यत्र अल्पाक्षरत्वं, असन्दिग्धत्वं ,सारवत्वं, व्यापकार्थप्रकाशकत्वं, अर्थविहीनशब्दराहित्यं, विशुध्दसंरचनत्वमेव सूत्रम्। तदाह सूत्रलक्षणं विष्णुधर्मोत्तरपुराणे-

**अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदु: ।।**

एवमेव भामतीटीकायाम् -

**लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च**
**सर्वत:सारभूतानि सूत्राण्याहुर्मनीषिण:।।६**

**संज्ञासूत्रम् -**

तत्र संज्ञासूत्राणि व्याकरणशास्त्रे प्रयुज्यमानपारिभाषिकपदानि बोधयन्ति। संज्ञासूत्राणि यथा - 9वृध्दिरादैच्७", 9अदर्शनं लोप:८", 9शेषो घ्यसखि९", इत्यादिनि। संज्ञादीनां ज्ञानं विधिशास्त्रस्यार्थाबवोधे कारणम्। इदं शब्दसंज्ञा-अर्थसंज्ञा चेति भेदेन द्विविधम्। वृद्धिगुणादिसंज्ञा:१० शब्दसंज्ञा:, विभाषालोपादय:११ अर्थसंज्ञा:।

**परिभाषासूत्रम् -**

परितो भाष्यते कार्यमनया परिभाषेति व्युत्पत्ति:। अनियमे नियमकारिणी परिभाषा इति लक्षणमपि संगच्छते। नागेशभट्ट: उद्योते -

**एकदेशस्थिता शास्त्रभवने यदि दीपताम्**
**परितो व्यापृतां भाषां परिभाषां प्रचक्षते।।१२**

इदमेव प्रदीपवत् एकत्र स्थित्वा सम्पूर्णशास्त्रमभिज्वलयति। तथाह भाष्यकार:-9परिभाषा पुनरेकदेशस्था सर्वं शास्त्रमभिज्वलयति प्रदीपवत्"१३। वस्तुतस्तु अत्र शास्त्रे दृश्यमानाव्यवस्थानिवारणम् एवमावश्यकपदोपस्थितिमुखेन सूत्रार्थप्रतिपादनमेवास्य प्रधानकार्यम्। परिभाषा: द्विविधा:। पाणिनीयापाणिनीयभेदेन। अपाणिनीयपरिभाषाश्चतुर्विधा:। ज्ञापकसिद्धा, न्यायसिद्धा, वाचनिकी, मिश्रिता चेति भदेन।

**विधिसूत्रम् -** विधानं विधि:। येन विधानं क्रियते तदेव विधिसूत्रम्। तत्र विधिसूत्रत्वं नाम लक्ष्यविषयकापूर्वसंस्कारविषयबोधजनकत्वम् इति। सामान्यतया सूत्रै: एतै: प्रक्रियाकार्यं विधीयते। 9एचोऽयवायाव:"१४, 9वृद्धिरेचि"१५, 9अक: सवर्णे दीर्घ:"१६ इत्यादिनि।

इदञ्च विधिसूत्रं मुख्यतया द्विविधम् उत्सर्गापवादभेदेन। तत्र सामान्यतया विधानमुत्सर्गविधिः। यथा- 9कर्मण्यण्"१७। येन विशिष्टरुपेण विधानं क्रियते तदपवादविधिः। यथा- 9आतोऽनुपसर्गे कः"१८।

**नियमसूत्रम्** -नियमो ह्यवधारणम् ,अन्ययोगव्यवच्छेद इति प्रसिद्धः। प्रकृतपक्षे विधिसूत्रणां क्षेत्रं नियन्त्रयितुं यत् सूत्रमुपकरोति तदेव नियमसूत्रम्। अर्थात् सर्वत्र प्राप्तविधेः तदितराविषयत्वसंकोचनं नियमः इति। 9धातोस्तन्निमित्तस्यैव"१९, 9आकडरादेका संज्ञा"२०, 9रषाभ्यां नो णः समानपदे"२१ इत्यादिनि। इदञ्च सूत्रं द्विविधम् - विधेयात्मकनिषेधात्मकभेदेन इति।

**अतिदेशसूत्रम्** - अन्यतुल्यत्वविधानमतिदेशः। अर्थात् अन्यधर्मस्यान्यत्रारोपणमतिदेशः। अनेन नियमसूत्रस्य वैपरीत्यात्मककार्यं साध्यते। 9स्थानिवदादेशोऽनल्विधौ२२", 9सार्वधातुकमपित्२३" इत्यादिनि। संज्ञातिदेशः, स्थान्यातिदेशः ,युक्तातिदेशश्च भेदात् त्रिविधम्।

**अधिकारसूत्रम्** - स्वदेशे लक्ष्यसंस्कारविषयकबोधाजनकत्वे सत्युत्तरसूत्रानु- वृत्या लक्ष्यसंस्कारविषयकबोधाजनकत्वमधिकारसूत्रत्वम्। इदञ्च सूत्रं निश्चितावधिपर्यन्तमुत्तरसूत्रेषु गच्छति। यथा- 9कारके२४", 9भस्य२५", 9स्वरितेनाधिकारः२६" इत्यादिनि अस्यान्तर्गतानि।

विधिरयं संस्कृतव्याकरणशिक्षणस्य प्राचीनतमविधिः। अस्मिन् व्याकरणसूत्राणां नियमानाञ्च कण्ठस्थीकरणं भवति। अध्यापकः अष्टाध्या- यीस्थितसूत्राणां कण्ठस्थं कारयित्वा स्पष्टयति। कण्ठस्थीकृतानां सूत्राणामाधारेणैव छात्राः भाषाज्ञानं प्राप्नुवन्ति। वस्तुतः मनोवैज्ञानिक- सिद्धान्तानां प्रातिकुल्यत्वे सति विधिरयं वर्त्तमानपरिस्थितौ छात्राणाम् उपकारकः। पाणिनिविरचितोऽष्टाध्यायीग्रन्थोऽस्य विधेः उपजीव्यभूतः। तत्र ग्रन्थे विभागस्तु अष्टसु अध्यायेषु कृतो वर्त्तते। प्रत्येकस्मिन्नध्याये पादचतुष्टयं ,एवमाहत्य प्रायः ३९९४ सूत्राणि तत्र विद्यन्ते। महत्या सूक्ष्मतया निर्मितसूत्राणां लघुत्वं महत्वञ्च लोके विदितमेव। साधुशब्दज्ञाना- यैव न अपितु छात्राणां बौद्धिकविकासाय एतादृशसूत्रग्रन्थानामुपयोगः करणीयः। सामग्रिकतया एवं वक्तुं शक्यते यत् - अनन्तशब्दसमूहं लाघवेन शिक्षयितुं सूत्ररुपेण प्रवृत्तोऽयं सूत्रविधिः।

**भाष्यविधिः -**

भाष्यते शब्दशास्त्रं येन इति भाष्यम्। व्याकरणशास्त्रस्याध्ययनाध्यापनक्षेत्रे भाष्यविधेः आविष्कर्ता भगवान् पतञ्जलिः। वार्तिकमुखेन सूत्रव्याख्यानभुते महाभाष्ये

भगवता पतञ्जलिना समाश्रिता उक्तिप्रत्युक्तिरुपविधि: भाष्यविधि:। भाष्यविधे: वीजं पतञ्जलिप्रणीतं महाभाष्यमेव। भाषासौष्ठवेन, कठिनतमस्यापि विषयस्य सुलभतया विवेचनेन व्याकरणस्य काठिन्यतामपहरत्ययं विधि:। कथोपकथनशैल्या कठिनस्यापि व्याकरणशास्त्रस्य सारल्यत्वं सम्पादितं वर्तते। प्राञ्जलसरण्या लघुलघुतरवाक्यसम्भारैर्गुम्फितेन, सरलेन ,सरसेन च व्याकरणजिज्ञासूनां जिज्ञासां निवारयत्ययं विधि:। अत्र तु शब्दसाधुत्वप्रतिपादनेन साकं शास्त्राणां दर्शनानाञ्च वीजभूतविषया:, लोकव्यवहारयुक्तयश्च सरलया भाषया संवादशैल्या च प्रतिपादिता: विद्यन्ते। अत्र ग्रन्थे सूत्रानुसारि वाक्यवर्तिकस्थपदानां व्याख्यानं क्रियते। अत: भाष्यलक्षणस्य गतार्थता इह विद्यते। यथा-

**सूत्रार्थो वर्ण्यते यत्र वाक्यै: सुत्रानुसारिभि:**
**स्व पदानि च वर्ण्यन्ते भाष्यं भाष्य विदो विदु:।।**

ग्रन्थस्यास्य सूक्ष्मपर्यालोचनेन प्रतीयते यदयं न केवलं पाणिनीयव्याकरणस्यैव प्रामाणिकग्रन्थविशेषोऽपित्वयं समस्तविद्यानामाकरग्रन्थस्वरुपत्वं विभर्त्ति। उक्तञ्च भर्तुहरिणा -

**कृतोऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना**
**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।**

तत्र लौकिकोदाहरणप्रत्युदाहरणेन गभीरस्यापि विषयस्यावबोधनप्रक्रिया वास्तवतोऽतिचमत्कारयुक्ता। शब्दार्थस्य विवरणप्रसङ्गे - "अथ गौरित्यत्र क: शब्द:? किं यत्तत् सास्नालाङ्गुलककुदखुरविषाण्यर्थरुपं स शब्द:? नेत्याह। द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्द:? नेत्याह। क्रिया नाम सा। यत्तर्हि तच्छुक्लो नील: कपिल: कपोत इति, स शब्द:? नेत्याह। गुणो नाम स:। यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं, स शब्द:? नेत्याह। आकृतिर्नाम सा। कस्तर्हि शब्द:? येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द:२७।ह्न एवमेव लोकन्यायमुखेनापि व्याकरणस्यान्वाख्यानं दृश्यते। तत्रोदाहरणतया प्रासादवासिन्याय:-"केचित् प्रासादवासिन:, केचित् भूमिवासिन:, केचिदुभयवासिन:। ये प्रासादवासिन: गृह्यन्ते ते प्रासादवासिग्रहणेन। ये भूमिवासिन: गृह्यन्ते ते भूमिवासिग्रहणेन, ये उभयवासिन: गृह्यन्ते ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च२८ठ। एवञ्च "न हि दोषा: सन्तीति परिभाषा न कर्तव्या , लक्षणं वा न प्रणेयम्। न हि भिक्षुका: सन्तीति

स्थाल्यो नाधिश्रीयन्ते। न च मृगाः सन्तीति यवा नोप्यन्ते२९।ह्न एवं प्रकारेण लौकिकोदाहरणप्रत्युदाहरणमुखेन वाकोवाक्पद्धत्या रचितः ग्रन्थोऽयं न केवलं प्राचीनभारतस्यापितु शब्दप्रपञ्चस्य परिचायकः अपितु समसानां मानवव्यवहाराणां शास्त्रविचाराणाञ्च महानिधिः। महाभाष्यस्य सूक्ष्मेक्षिकया पर्यालोचनेनेदं ज्ञायते यत् - महाभाष्ये व्याकरणबोधनापेक्षया व्याकरणसूत्राणामौचित्यविचारः क्रियते। प्राथमिकावस्थायामिदमुपकारकं न विद्यते। परमस्य शैल्यनुगुणं व्याकरणपाठनन्तु सर्वस्मिन् स्तरेऽभिरुचिकरं वरीवर्त्ति।

**प्रक्रियाविधिः -**

लक्ष्यलक्ष्यणे व्याकरणमिति भाष्यवचनम्। प्रवर्तते हि लक्ष्यप्रधानं लक्षणप्रधानञ्च व्याकरणशिक्षणम्। तत्र लक्षणप्रधानव्याकरणशिक्षणे सूत्रार्थ-प्रधानवृत्तिविधिः उपकरोति , यत्र सूत्रार्थबोधोऽष्टाध्यायी सूत्रक्रमेण क्रियते। लक्ष्यार्थप्रधानव्याकरणशिक्षणन्तु प्रक्रियाविधिमूलकम्। प्रक्रियाविधौ लक्ष्यं मनसि निधायाष्टाध्यायीसूत्रक्रमं त्यक्त्वा प्रयोजनानुगुणं सूत्राणि नियोज्य व्याकरणं शिक्षते। वस्तुतस्तु वृत्तिविधिनाष्टाध्यायीसूत्रक्रमेण सूत्रार्थं पाठयन्, प्रक्रियाविधिना शब्दसाधनक्रियारुपव्याकरणं पुरा पाठ्यते स्म। परन्तु गच्छता कालेन संस्कृतभाषाप्रयोगे प्राधान्ये च न्यूनतागता। वौद्धकाला- दाराभ्य आंग्लशासनकालपर्यन्तं संस्कृतभाषायाः स्थितिः दुरावस्थापन्नाभवत्। जनेषु भाषायाः अस्याः प्रयोगस्वरुपमतिन्यूनमजायत। तत्र का वा अवस्था व्याकरणस्य। येन छात्राणां सूत्रवार्त्तिकभाष्याणामवगमने रुचिः क्रमशः क्षीणा जाता। अतः क्षीयमाणस्य पाणिनीयव्याकरणस्य संरक्षणाय छात्राणामावश्यकतानुरुपं लौकिकशब्दसिद्धिमात्रप्रतिपादकानि प्रकरणयुक्त- प्रक्रियापुस्तकानि निर्मितानि। केवलं रुपसिद्धर्थं व्याकरणस्योपयोगः प्रारब्धः।

एवञ्च कातन्त्रसारस्वतादिव्याकरणानि ,लघुशरीराणि, सन्धिकारककृत्तद्धितसमाससुवन्ततिङतादिप्रकारेण विभक्तानि व्याकरणपुस्तकान्या- रचितानि। लघुत्वात् सरलत्वाच्च एतानि छात्रप्रियाण्यभवन्। कारणेनानेनैव कालक्रमेण प्रक्रियाविधिः प्रथितोऽभवत्। एवञ्च छात्राणामावश्यकताः पुरयितुं प्रक्रियाग्रन्थानां रचनामजायत। तत्र आन्ध्रदेशीयस्य रामचन्द्रा- चार्यस्य क्षेत्रेऽस्मिन् प्राथमिकप्रयासः श्लाघ्यः। एतैः काशिकावृत्तिसमाश्रित्यपाणिनिसूत्रव्याख्यानपरम्परयाध्येतृणां झटिति शब्दरुपधातुरुपादि- ज्ञानविरहात् ततोऽपरितुष्यद्भिः प्रक्रियाक्रमेण पाणिनीयव्याकरणसूत्राणां

कतिपयानां केषाञ्चन धातुनाञ्च व्याख्यानं प्रक्रियाकौमुदी नाम्ना समुद्भावितम्। परं तस्यां सर्वेषां सूत्राणां व्याख्यानाभावात्, धातुगणोणादीनां, सर्वासामावश्यकानां परिभाषाणाञ्च सन्निवेशाभावात् त्रिमुनिविरुद्ध- सदोषव्याख्यानवतीत्वाच्च तां दोषपुर्णां विनिश्चित्य भट्टोजिदीक्षितेन तेनैव मार्गेण प्रक्रियाप्रधानसरण्या वैयाकरणसिद्धान्तकौमुदीति नाम्ना सुप्रसिद्ध ग्रन्थः ग्रथितः। एवञ्च सम्प्रत्ति प्राचाल्यमानेषु प्रक्रियाग्रन्थेषु भट्टीजीदीक्षित- महोदयेन विरचितसिद्धान्तकौमुदी प्रमुखस्थानमावहति। एनामाधारीकृत्य मध्यसिध्दान्तकौमुदी-लघुसिध्दान्तकौमुदीति ग्रन्थद्वयं वरदराजेन प्रणीतम्। तत्र सम्प्रति स्तरभेदेन एतेषामध्ययनाध्यापनं प्रचलति। वस्तुतस्त्वद्य प्रक्रियाविधेः उपजीव्यग्रन्थः सिद्धान्तकौमुदी। यत्र च ३९७८ सूत्राणां, ८१५ वर्तिकानां, १९६७ धातूनाञ्च प्रतिपादनं सम्यक्तयोपलभ्यते। ग्रन्थोऽयं छात्राणां ज्ञानवर्द्धने उपकारको भवति। अष्टाध्यायीपद्धत्या शब्दसिद्धिज्ञानेऽनुभूयमानकाठिन्यमनेन दूरी भवति। इच्छानुसारं सन्धिसमासकारकस्त्रीप्रत्ययकृदन्ततद्धितस्वरादिप्रकरणानि पठितुं शक्यन्ते। अतः साधूक्तिरियम् -

**कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**
**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः।।**

ततोऽद्य व्याकरणस्य नैकविलक्षणपुस्तकततिषु ग्रन्थोऽयं सर्वतोऽप्यधिकं प्रियत्वमास्ते। अष्टाध्यायीसूत्रक्रमेण व्याकरणशिक्षणे छात्राः यत् कष्टमनुभवन्ति ,तदनेन परिहृतम्। छात्राः स्वेच्छानुगुणम् आवश्यकतानुरुपं पठितुं समर्थाः भवन्ति। वालबोधाय व्याकरणं संक्षिप्य सिद्धान्तकौमुदीमनुसृत्य मध्यसिद्धान्तकौमुदी-लघुसिद्धान्तकौमुदी इति ग्रन्थद्वयं प्रक्रियाविधिना छात्रहितायैव। व्याकरणाध्यापने विधिरयं महत्स्थानं भजति।

**वृत्तिविधिः**

सूत्रार्थप्रधानः ग्रन्थः वृत्तिः। वस्तुतस्तु सूत्रवार्त्तिकमहाभाष्यविषयाः अतिगभीराः। अत्रत्याः विषयाः न सामान्यैः सुलभतया ज्ञातुं शक्याः। यदा छात्राः सूत्रवार्त्तिकभाष्यादीनामवगमने क्लेशमनुभवन्तः आसन् तदा वृत्तिविधौ व्याकरणस्याध्ययनाय आचार्याणां प्रवृत्तिः अभवत्। अत एव परिवर्त्तिनि समये कालानुरोधेन पाणिनीयसूत्राणां शब्दशास्त्रधुरिणोऽनेके महाभाष्यादिग्रन्थ- परिशीलनपूर्वकमष्टाध्याय्याः वृत्तिग्रन्थान् जग्रन्थुः। व्याडिप्रभृतिभिः बहुभिः वृत्तयः रचिताः। स्वशिष्यान् बोधयितुं पाणिनिः स्वयमपि वृत्ति रचितवान् इति ज्ञायते। इदानीमुपलभ्यमानप्राचीनवृत्तिग्रन्थेषु जयादित्यवामनाभ्यां रचितः

काशिकावृत्तिग्रन्थः प्राधान्यतामावहति। स च इदानीमप्यध्याप्यमानो वर्तते। अध्येतृन् उपकरोतीयं काशिकावृत्तिः। अष्टाध्यायीक्रममाश्रित्य काशिकावृत्तेराधारेण व्याकरणाध्ययनपद्धतिरेषा वृत्तिविधिः इति उच्यते।

सूत्रस्योदाहरणप्रत्युदाहरणसहितव्याख्यानं वृत्तिरिति वृत्तिविधेः सामग्रिकार्थः। व्याख्या, व्याख्यानं, विवरणमिति शब्दाः पर्यायवाचीशब्दत्वेन गृह्यन्ते। व्याकरणस्परुपनिरुपणावसरे पतञ्जलिना वृत्तिरुप- व्याख्यानस्य स्वरुपमित्थं प्रदर्शितम् - "न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते। किं तर्हि व्यख्यानतश्च। ननु च तदेव सूत्रं विगृहितं व्याख्यानं भवति। न केवलं चर्चा पदानि व्याख्यानं वृद्धि, आत्, ऐच् इति। किं तर्हि उदहरणं, प्रत्युदाहरणं, वाक्याध्याहारः - इत्येतत् समुदितं व्याख्यानं भवति इति।३०ठ एवमेवास्य प्रसिद्धलक्षणम् -

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**
**आक्षेपश्च समाधानं व्याख्यानं पञ्चधास्मृतम्।।**

पाणिनिविरचितस्याष्टाध्यायीग्रन्थस्य तत्वाबवोधः वृत्तिज्ञानं विना न सम्भवति। अष्टाध्यायीक्रमस्य ज्ञानं वृत्तिमाध्यमेन भवति। प्रक्रियानिरुपणमनेन सहजसाध्यत्वमास्ते। पाणिनीयव्याकरणं यथार्थमध्येतुं संक्षिप्तः, सरलः, उत्तमश्चायं विधिः। व्याकरणाध्यापने सर्वोत्तमविधिरयम्। एतदर्थं सन्दर्भेऽस्मिन् अनेकाः वृत्तयः विरचिताः । अयं विधिः क्रमिकः,परिपुर्णः, व्याकरणाध्यापने उपादेयपुर्णश्च विद्यते। पुनश्च व्याकरणस्य संरक्षणं प्रचारप्रसारश्च अनेनैव भवति।यद्यपि वर्त्तमानकाले अस्य विधेः व्यापकप्रयोगः न जायते तथापि गम्भीरशास्त्राणाम् अध्यापने संस्कृतपण्डितानां निर्माणे च अयमेव बिधिः समर्थः।

---

**सन्दर्भाः**


१. म.भा.६-५-८४
२. म.भा.पस्प.
३. म.भा.पस्प.
४. म.भा.पस्प.
५. म.भा.पस्प.
६. भा.टी.१-१-१
७. अ.१-१-१
८. अ.१-१-६०
९. अ.१-१-७
१०. अ.१-१-१,अ.१-१-२
११. अ.१-१-४४,अ.१-१-२
१२. म.भा.२-१-१
१३. म.भा.२-१-१
१४. अ.६-१-७८
१५. अ.६-१-८८
१६. अ.६-१-१०९
१७. अ.३-२-१
१८. अ.३-२-३

१९. अ.६-१-८०
२०. अ.१-४-१
२१. अ.८-४-१
२२. अ.१-१-५६
२३. अ.१-२-४
२४. अ.१-४-२३
२५. अ.६-४-१२९
२६. अ.१-३-११
२७. म.भा.पस्प.
२८. म.भा.१-१-८
२९. म.भा.१-१-३९
३०. म.भा.१-१-१

**संकेताक्षरसूची -**

म.भा. - महाभाष्यम्, म.भा.पस्प. - महाभाष्यपस्पशाह्निकम्, भा.टी.- भामतिटीका, अ. - अष्टाध्यायी

**उपयुक्तग्रन्थसूची -**


१. अष्टाध्यायी, पाणिनि, श्रीशान्तिस्वरूप कपूर, श्री रामलाल कपूर ट्रस्ट प्रेस, बहालगढ (सोनीपत-हरयाणा), १९८५
२. काशिकावृत्तिः, वामन-जयादित्यप्रणीता-न्यासपदमंजरीसहिता - प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
३. प्रौढमनोरमा, भट्टोजिदीक्षितप्रणीता, वाणीविलासप्रकाशन, वाराणसी
४. वाक्यपदीयम्, श्रीभर्तृहरिः, वामदेव आचार्यः, चौखम्बा कृष्णदासअकादमी वाराणसी, २०००
५. व्याकरणशास्त्रेतिहासविमर्शः, अशोकचन्द्रगोशास्त्री,भारतीयविद्यासंस्थान, वाराणसी, १९९७
६. महाभाष्यसमीक्षणम्, डा.गिरीशचन्द्र त्रिपाठी, श्रीवटुकाप्रकाशनम्, हरिद्वार, १९८७
७. काशिका, जिनेन्द्रबुद्धि, विवरणपञ्जिक (न्यासः), राजशाही, १९१३-१९२५
८. वैयाकरणसिद्धान्तलघुमञ्जूषा, चौखम्बाप्रकाशन, वाराणसी, १९६९
९. वैयाकरणसिद्धान्तसुधानिधिः, सत्यप्रकाशदुवे (सं), राजस्थानपत्रिका, जयपुर, १९८६
१०. अष्टाध्यायी सहजबोधः, पुष्पादीक्षित्, पाणिनीयशोधसंस्थान, छत्तीशगड, २००४
११. निरुक्तम्, श्रीमद्यास्कमुनिप्रणीतम्, चौखम्बा संस्कृतप्रतिष्ठान- ३८.यू.ए. - बंगलोरोड-जवाहरनगर-दिल्ली-७, १९८९


—०—


*अतिथि-अध्यापिका, संस्कृतविभागः,*

*श्रीकृष्णचन्द्रगजपतिस्वयंशाशितमहाविद्यालय,*

*पारलाखेमुण्डि, गजपति, ओडिशा ।*

# धर्मशास्त्रे दायविभाग:

डॉ.प्रकाशकुमार शतपथी

धनविभागकालविषये सामान्यताया य: कालो विहित: विज्ञानश्वरेण प्रथमं तद्विषये आलोच्यते यत्- ऊर्ध्वं पितु: पुत्रा: रिक्थं विभजरेन् इति गौतमवचनेन पित्रोर्मरणानन्तरं पुत्राणाम् इच्छयेत्येको विभागकाल: । अत्र पुत्राणां कर्त्तृत्वेन ग्रहणमयर्थात् पुत्रा अत्र कर्त्तार: पित्रोरूर्ध्वं समानभावेन ऋणं, रिक्तं च विभजेयु: यतो हि सममिति प्रकारनियम:। सममेवेति रिक्थमृणं च विभजरेन् इति मनुवचनादपि प्रतीयते।

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातर: समम्।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतो:।।

इत्युपक्रम्य मुनरपि तेनोक्तं यत्-

ज्येष्ठ एव तु गृह्णीयात्पुत्र्यं धनमशेषत:।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा।।

अत्राभ्यां मनुवचनाभ्यां ज्ञायते यद् ज्येष्ठ एव पित्रो: स्वत्त्वनाशानन्तरमधिकारी भवति।

तत: सर्वे भ्रातर: मिलित्वा विभागं कुर्वन्ति। विभागकाले सर्वस्माद्द्रव्यसमुदाया-द्विशतितमभाग: सर्वद्रव्येषु यच्छ्रेष्टं तज्ज्येष्ठाय दातव्यम्। तत: चत्वारिंशतमो भागो मध्यमं च द्रव्यं मध्यमाय दातव्यम्। तुरीयमशीतितमो भागो हीनं द्रव्यं च कनिष्ठाय दातव्यम्। विषयेऽस्मिन् मनुना उक्तं यत्-

ज्येष्ठस्य विंश उद्धार: सर्वद्रव्याच्च यद्धरम्।
ततोऽर्थं मध्यमस्य स्यात्तुरीयं तु यवीयस्य:।।

किञ्चापि पित्रोरूर्ध्वं ज्येष्ठ: दौ भागौ गृह्णीयात्, तदनन्तरं जातस्य सार्धैकभागस्त तोऽनुजानामेकैकोभाग इत्युद्धारव्यतिरेकणापि विषमविभअगो दर्शित:, उद्धारेऽनुद्धते त्वेषामिति मनुवचनेन ज्येष्ठं वा ज्येष्ठभागेनेति याज्ञवल्क्यवचनानुसारं च विषमविभाग: प्रमाणित:। अत: इदानीं प्रश्न: समुदेति यदि विभागो विहमस्तर्हि कथं समं विभजरेन्नति नियम्यते, अत्रोच्यते सत्यमेतत्कारणमयं विषमविभागो यद्यपि शास्त्रदृष्टस्तथापि लोकविशिष्टत्वान्नानुष्टेय:, अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचारेन्न तु इतियाज्ञवल्क्यनिषेधात्। यथोक्तं महोक्षं वा महाजं वा क्षत्रियायोपकल्पयेत् इति विधानेऽपि लोकविद्वेषान्नानुष्ठीयतेकलौ।

यद्यपि ज्येष्ठ दद्यादिति देशविशेषानुसारं केचनमानन्ति तथापि शास्त्रविरोधान्निराकृतम्। तस्माद् विषयमविभाग: शास्त्रदृष्टोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्टेयोऽपि तु सममेव विभजेरन्निति विधि: कलौ दृश्यते।

पित्रोधनं पुत्रा: विभजेयुरित्युक्तम्। किन्तु क्वचिद् मातृधनेऽपवादो दृश्यते। मातृधनं दुहितरो विभजेरन्निति । अर्थात् मात्रा यदृण कृतं तदपनीयाविशिष्टं सर्वा दुहितर: प्रथमं गृह्णीयुरिति । तत्रापि दुहितृषु प्रथमं तावत् प्रत्तानां तत: परमप्रतिष्ठितानां निर्धनानां, तत: प्रतिष्ठामिति क्रम:। सर्वदु हित्रभावे पुत्रा: गृह्णीयुरिति सर्वसम्मतम्।

(१) अत ऊर्ध्वं पितु: पुत्रा: रिक्थं विभजरेन् ति गौतमवचनेन, विभजरेन् सुता: पित्रौरूर्ध्वमित्यनेन च याज्ञवल्क्यवचनेन पित्रोर्मरणानन्तरं पुत्राणामित्येको विभागकाल:।

(२) निवृत्ते चापि रजसीति गौतमक्त्या मातरि निवृत्तरजस्कायां पितरि धनानि: स्पृहे तदनिच्छय: अपि पुत्राणा मिच्छया द्वितीयो विभागकालो विज्ञानश्वरेण प्रदर्शित:। यत: जीवत्यापि पितरि द्रव्यनिस्पृहे निवृत्तरमणे मातरि च निवृत्तरजस्कायाम्। पितृरनिच्छायामपि पुत्रच्छानुसारेण विभागो भवति। यच्च नारदेन समर्थितम्- अत: ऊर्ध्वं पितु: पुत्राविभजेयुर्धनं समम् इतो पित्रोरूर्ध्वं विभागं प्रतिपाद्य मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते चापि रमणे पतिर्युपरमस्पृहे इति दर्शित:। अत्र पुत्रा: धनं समं विभजेयुरित्यनुषज्यते। अतोऽयं पुत्रा: धनं समं विभजेयुरित्यनुषज्यते। अतोऽयं पुत्रोणामिच्छया विभागस्य कृते द्वितीयकाल उक्त:।

(३) जीवति चेच्छति इति गौतमो उक्त्वा जीवति पितरि तदिच्चेति विभागस्य तृतीयकालो दर्शित:।

पिता यदि विभाग इष्यत तर्हि तेन सुता विभजनीय अर्थात् स; पिता स्वच्छया अत्मन: सुतान्यिभजोदिति। इच्छया विभजेदिति इच्छया: निरङ्कुशत्वादनियमौ प्राप्तौ भवत:। ज्येष्ठ: ज्येष्ठभागेन सर्वे वा स्यु: सम्माशिन:।

विभागस्य चोत्पिता कुर्यादिच्छया विभजेत्सुतान्।
ज्येष्ठं वा ज्येष्ठभागेन सर्वे वा स्यु: समांशिन:।।

इति याज्ञवल्क्यवचनेन पत्नीनां पुत्रसंमाशकीर्तनदर्शनावगम्यते यद् यदा पिता पुत्रान् विभजति तदा तत्सनं धनमपि पत्न्यै देयम्। पत्न्य: यदि बहु: स्यु: तदानीं ता: सर्वा: पुत्रसंमाशमाज: करणीया:। याभि: भर्ता: स्वशुरेण वा किमपि स्त्रीधनं न स्वीकृतम्। यदि किञ्चिद्धनं लब्धमस्ति तर्हि तासामेवाधीश: देय: दत्ते: त्वर्धं प्रकल्पयेत्। इति याज्ञवल्क्यवचनम् अर्धपदमत्र यावता दलेन पुत्रतुल्यांश: स्यात्तावद्देव देयमिति तात्पर्यम्। यदि कश्चन पुत्रेषु शक्त्यनुसारम् एव शक्त: सन् पितृद्रव्यं नेच्छति तदानीं तस्मै पुत्राय तदानिमच्छायाम् अपि किञ्चिद्दत्वा

पिता विभजेदर्थात् सोऽनीयमानः पुत्रः पित्रा किञ्चिद् दत्वा विभक्तव्यः। यथोक्तं याज्ञवल्क्येन-

शक्तस्थानीहमानस्य किञ्चिद्दत्वा पृथकिक्रया।

न्यूनाधिकविभागप्रसङ्गे योऽसौ न्यूनाधिकविभागो धर्मयुक्त उक्तः। सः पितृकृतविभाग एव स्वीक्रियते अन्यथा येन केनापि न्यूनाधिकविभागः कर्तुं शक्यते। पुनश्चासौ पिता विभागकाले व्याध्यादिरहित अवश्यमेव भवेत्। अन्यथा उच्छास्त्रवर्तिरूपेण यत् किमापि कुर्वन् दायभागो भवेदित्यास्मिन् प्रसङ्गे नारदेनोक्तं यत्-

व्याधितः कुपितश्चैव विषयाशक्तमानसः।
अन्यथा शास्त्रकारी च न विभागे पिता प्रभुः।।

अत एष विभागे यदि पितृकृतः स्यात् तर्हि सो विभागो न्यूनाधिको धर्मयुक्तविभाग इत्युच्यते।अत्र विभागविषये पितरि जीवति तस्यैच्छेव नियामिका अतोऽयमेवा तृतीयकालरूपेण गुह्यते।

अत्र यद्यपि सामान्येन विभागस्य कालात्रयं तेनैवोक्तम्, तथापि मातुनिवृत्तजनकत्वविशेषणं पितामहधनविभागपरमिति विज्ञानेश्वरस्याभिप्रायः। इत्यमनेन प्रकारेण साधारण्येन धनविभागस्य कृते यत् कालत्रयं प्रदर्शितं तच्च एकत्रीकृत्य दीयते यथा-

(१) ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन् इति गौतमवचनेन पित्रौर्मरणानन्तरं पुत्राणामिच्छ-येत्येकौ विभागकालः।

(२) निवृत्ते चापि रजसीति गौतमोक्त्या मातरि निवृत्तरजस्कायां पितरि धननिस्पृहे तदानिच्छयापि पुत्राणामिच्छया द्वितीयो वीभागकालः।

(३)जवति चेच्छति इति गौतमदिशा जवति पितरि पितुरिच्छति विभागस्य तुतीयः कालो दर्शितः।

अत एव कालत्रयं विज्ञानेश्वरेण धनविभागस्य कृते प्रदर्श्योक्त्य्यद् मातुर्निवृत्त रजस्कत्वविशेषणविशिष्टकालः पितामहधनविभागमुद्दिश्योक्तः, काल अन्तरे तु पितृधन-विभागकालविषये उपसंह्रियते।

जीमूतवाहनमते तु पितृधनविभागस्य यथा कालद्वयं पितामहधनं विभागस्यापि तथैव कालद्वयं पृथक् पृथग् निर्दिष्टम्।

तत्र प्रथमतः पितृधनविभागस्य कृते यत्कालद्वयं तेन बहुयुक्तिपुरः सरं स्वग्रन्थे पितृधनविभागकाल निरुपयता समुपस्थापितं तदत्रोच्यते-

(१) पितुः पतितत्वनिस्पृहत्वोपरमैः स्वत्वापगम एक एव कालः।

(२) स्वेत्वे सति जीवति तस्येच्छा द्वितीयकाल इति।

इत्यतत्कालद्वयं विधाय पुनरपि पितामहधनविभागस्य कृते कालद्वयं पृथक्तया विहितं यत्-

(१) पित्रोरभाव एक: काल:।

(२) मातृनिवृत्ते: रजसि पितृरिच्छात इत्यपरकाल:।

इत्येतद् यत् कालद्वयमनेन जीमूतवाहनेन पऋथग् विषितं तदापि विज्ञानेश्वरोद्धतं बृहस्पतिवचनद्वारा समर्थितं भवति। वस्तुतो विज्ञानश्वरेण यत् सामान्येन कालत्रयमभ्युपेतं तत्र जीमूतवाहनेन स्पष्टीक्रियते यत् सामान्येन उक्तम् अस्य मातृनिृत्त रजकत्व विशेषणास्य पितृधनविभागकालत्वे विभाग अन्तरं पुत्रोत्पत्तेरसम्भवात् ऊर्ध्वं विभागाज्जातस्त्यित्यादि मनुवचनस्य निर्विषयतापत्ते:। नाव्यस्य वचनस्य मातृधनगोचरत्वं मातुरेव तदानीं निर्धनतापत्ते:। अतो निवृत्तो रजसीति विशेषणं पितामहरदिधनं विषयीकरोति। पुनश्च नहि पितृरिच्छाया: व्यतिरेकेणमातु: सत्याम् अपि रजोनिवृत्तौ विभागोऽपि भावितुमर्हति। अत: पितुरिच्छया: सद्भावे तु विभागसम्भवात् ऊर्ध्वं पितु: रिक्थं विभजेयुर्निवृत्ते रजसि मातुर्जिवति चेच्छति इति गौतमवचनात् पितुरिच्छातोविभाग इति निणीयते। अत: पित्रोरभाव इत्येक: काल: निर्धारित: यश्च पितामहधनविभागस्य कृतेऽपि सामान्येनावगम्यते। पिता च माता च पितरौ। तयो: पित्रोरपि द्विवचनस्मरणादिदमवधेयं यत् सोदरभ्रातृणां पितृधनविभागस्य मयख्यं निमित्तं तथापि जीवतरापि शब्देन तयोर्जीवनस्य सत्त्वकीर्तनाद् वचनस्यास्य पितृधनविभागगोचरत्वं न तु मातृधनगोचरत्वम्। तस्माद्विभअगे पित्रोरभावो निमित्तत्वेन स्वीकृत:।

मातृनिवृत्ते रजसी इति योऽपरकालत्वेनोक्तस्तत्रापि न केवलं मातृनिवृत्तरजस्कायां पितुरिच्छामन्तरेण विभाग: सम्भवति। अनीशास्ते हि जीवयो: इति मनुस्मरणात् तथा जीवति चेच्छति इति गौतमस्मरणाच्च जीवति पितरि तस्येच्छेत्यपरकाल:।

अत्रायं निष्कर्षो यत् - विज्ञानेश्वरेण सामान्येन धनविभागस्य कृते यत्कालत्रयमुपदिष्टं तत्र पितोरभाव: जीवति चेच्छति कालद्वयं जीमूतवाहनोक्त-पितृधनपितामहधनविभागकालत्वेन पृथक् पृथगपि तथैवोपादिष्टम्। अवशिष्ट: य: मातृनिवृत्तरजस्कत्वाविशेषणविशिष्ट: काल: तेजोपदिष्ट: सामान्येन सोऽयं जीमूतवाहनेन पितृधनविभागकालत्वेन निषिध्य पितामहधनविभागस्य कालत्वेनोपसंहृत:। इयं तु विशेषो यद् जीमूतवाहनस्तु साक्षाद् मातृनिवृत्तरजकस्वं पितामहधनविभागकालस्य हेतुत्वेनोपन्यस्तम्, विज्ञानेश्वर: सामान्येन तदेव प्रतिपादयति यतो हि वचनस्यास्य पितृधनगोचरत्वमेवेति विध्यभावपदर्शनात् पितामहगोचरत्वं नैवेति निषेधाभावात्।

अत: विज्ञानेश्वरस्याभिप्राय: बुध्वापि जीमूतवाहन: स्वपण्डित्यं प्रदर्शितुं

युक्तयाक्षेपं करोति । नात्र वस्तुतः विषयागतविरोधोऽस्तीति विद्वाद्भिर्भावनीयम्। पुनश्च बालम्भटेनाप्युक्तं मिताक्षरानुसारं पितृधनं विभागस्य पितामहविभागस्य च कालद्वयमेवाङ्गीकृतमस्ति। तत्रोक्तेषु कालेषु पितुरिच्छया विभागः समो विषमोश्चेति द्वेधा दर्शितः तत्रापि समविषयेऽधिकमालोचितम्। यथा मातरः पुत्रभागानुसारिण्यः विषमविभागे पत्न्यंशभावे दम्पत्योः पुत्रवद्भिभागे ताप्तर्यम्, किन्तु संमाशे एव। अत्र यदि कुर्यादित्यनेन पितुरिच्छया विभाग उक्तो न पपत्नीच्छया। सो अपि पुत्राशपृथक्करनपर्यन्तो न स्वतः। जायापत्योर्न विभागे विद्यते इति अदि प्रागुक्तापस्तम्बादिना सहत्वोक्त्वा तस्यासम्भवात्। अर्धो वा एष आत्मनो यः पत्नीति श्रुतेश्च। अयमेवाशयो अनीशास्ते हि जीवतोरिति मानवस्य, पुत्रतस्तस्यान्तरङ्गत्वात्। किन्तु बहुवचनादनेकत्वे पत्नीनां पत्यापत्नी पुत्रांस्तुल्यांशात् संगृह्य न स्वांशेन सह स्थप्या एवं च ताभ्यः प्रकृत्याशे देयं इति न। अतएव धनविभाग अभावे नापस्तम्बादितात्पर्यम्, किन्तु यथा जीवित्पितृकविभागेऽऽद्यपक्षे एवमन्यक्षरद्वये सत्तेत्वेति न्यायेन निवम्वत् पुत्रेच्छयैव पितृनिर्वाहो बोध्यः अन्यथा विभअगं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् इत्यर्थेनैव तृतीयकोटिसिद्धेरेतस्य मनूक्तोद्धारहीतविभागपक्षस्य चानर्थ्यक्यं स्पष्टमेव। एवं च पिता चेत्पुन्नान् विभजेतस्य स्वेच्छअ स्वपार्जितेऽर्थे इति वैष्णवम्। यथोक्तं बार्हस्पत्येन-

प्रदानं स्वेच्छया कुर्याद्भागं चैव ततौ धनात्।

किञ्च नारदेनायुक्त यत्-

पित्रैव वा स्वयं पुत्रान्विभजेद्वयसि स्थितः।
ज्येष्ठ श्रेष्ठविभागेन यथअ कस्य मतिभवेत्।।

एतेनेदं पृथगिच्छितविभागपदं नोद्धारादिविभागपरमितीच्छया विभजेत्सुतानित्येव विष्णुनारदादिविरोधात्तथा विज्ञानेश्वरव्याख्याने चिन्मयमिति मन्दोक्तमपास्तम्। यत्तु तेन यद्यपि मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते इति समविभागसाशकं विषमविभागनिषेधकं च उक्तं तदापि निराकृतमित्युक्तम्, तस्या अन्यनिराकरणत्वं तत्र हि स्पष्टं प्रागुक्तं च । एतेन स्वार्जिते पितुरैच्छिकवैषम्यमपि शास्त्रीयत्वेन धर्म्यमपि तदुक्तमपास्तम्।

एवं पितरि जीवति विभागस्य कालत्रयमुक्तम्। अस्य पितरि जीवतित्येतत्तात्पर्येणोक्तवचनेन एव संग्रहः। अधुना तन्मरणाानन्तरमपि चतुर्थः कालो विहितः, तत्रापि मनुना द्विविधसंग्रहः कृतः। पितृजिवनोपलक्षतिः, तन्मरणोपलक्षतिश्च। तत्र पितरि जीवित इत्यत्र त्रयः पक्षाः पित्रिच्छा तदानिच्छा चेन्त्येत्युक्तरीत्या द्वेधेति बोध्यम्। सर्वे वा स्युः समांशिनः वक्ष्यमाणत्वादत्र पूर्वकत्र च न कन्याया ग्रषणमिति बोध्यम् ।

किञ्च कात्यायनेनाप्युक्तम्-

जीवद्विभागे तु पिता नैकं पुत्र विशेषयेत्।
निर्भाजयेत्र चैवैकमकस्मात् कारणं विना।।

अत एव न्यूनाधिक्योति प्रागुक्तस्य वचनस्य तथा कर्तव्यत्वे न ताप्तर्यं किन्तु यदि विशेषात् शास्त्रोक्तमात्रेण दैवात् पिता शास्त्रोक्तमात्रेणोत्तरमपि विभागपत्तिः, तथापि प्रागुक्तं यथा श्रुतं गौतमात् पितुरुर्ध्वमिति वक्ष्यमाणमूलाच्च पितृमरणमेव मूख्यनिमित्तम्।

अन्वाचयशिष्टं मातृमरणम्। एनं च पितृमरणं मातृसत्वात् द्विविधमपि प्रमितपितृकत्वेन गृह्यते इति तत्परमिदमिति न विरोधः यथा चाद्येन तात्पर्येण त्रयाणं संग्रहस्तथाऽन्येन द्वयोः। अतः एव जीवत्पितृकविभागश्चेति द्वैधैवाभियुक्तव्यवहारो न तु प्रमितमातृक इति तृतीयोऽपि। न चानीशास्ते हि जीवतोरिति मानवे उक्तत्वादुभयमणयोरेव निमित्तत्वलाभ इति तदेकवाक्यता यथाश्रुतमूलसौष्टवे कथं तत्परत्वमिति वाच्यम्। सर्वथाऽन्यथा दुष्परिहरवक्ष्यमाणविरोधपरिहाराय जायापत्न्याद्यपस्तम्बस्य धनविभागसत्वेऽपि पुत्रवत्पृथक्करणाभावेऽद्यङ्गित्वेन सर्वत्र सहत्वेन ताप्तर्यस्य यथेष्ठविनियोगे स्वामित्वाभावस्ते षामिति मनुताप्तर्यम्।

अतो जीवद्विभागे त्रयः कालाः समुपलभ्यन्ते, तत्रापि पितुरिच्छअ द्विविधा, आद्ये मातुः पितुश्च समांशौ, एव तदन्ययोरपि। सर्वथा मातुरिच्छा न नियामिकाः। नापि तस्या : कर्तुत्वाम्। इदमपि अस्थावरविषयं शुद्धस्वार्जितविषयं शुद्धस्वार्जितविषयम्, पैतामहमिश्रत्वार्जितविषयं च । शुद्धपैतामहे तु विशेषो वीक्ष्यमाण इति न तत्र मातुरंश इति।

तथा च प्रमितपितृकविभागः क्रमागतस्य पित्रर्जितरहितस्य, तन्मिश्रस्य, शुद्धपित्रार्जितस्य वा धनस्येति त्रेधा। पित्रार्जितस्यापि पाणिग्रहणतः पूर्वमूर्ध्वं वेति द्विधा। तत्राद्ये तद्विभागवाक्येषु बुहस्पतिनां उक्तं यत्-

द्रव्ये पितामहोपात्ते स्थावरे जङ्गमेऽपि वा।
सममंशित्वमाक्यातं पितुः पुत्रस्य चैवाहि।।
पैतामहहृतं पित्रा स्वशक्त्या यदुपार्जितम्।
विद्याशौर्याद्यवाक्यं च तत्र स्वाम्यं पितुः स्मृतम्।।
प्रदानं स्वेच्छया कुर्याद्भागं चैव ततो धानात्।
तदभावे तु तनयाः समांशाः परकीर्तिताः।।

इति बार्हस्पत्येषु च पुत्राणामेव पित्रा सह भोगितया निर्देशात् तदन्यविभागपरयोरेव यदि कुर्यात् पितुरुर्ध्वम् इत्यनयोर्वाक्ययोर्मितुर्विभागश्रवणाच्च माता न विभागषरणार्षा। यतो

विभागशब्दो हि भावव्युत्पत्या रूढया चान्यस्वाम्यसहभावेन विभजनीयार्थसामास्थितस्य स्वस्वाम्यस्य तद् एकदेशे व्यवस्थापनमभिदत्ते। श्वशुरादिधने च स्नुषादीनां न जन्मत: स्वाम्यम्, मिथ: सम्बन्धस्य प्रयोगाभावात्। अत एव पाणिग्रषणत: प्राक् पित्रार्जिते द्रव्येऽपि न मातृर्विभाग: सममंश हरेदिति सिद्धस्वाम्यस्यैव षरणप्रतीते:। स्थावरे उभयविधेऽपि सत्सु पुत्रेषु तत्स्वाम्यस्य वक्षमाण आदिश अपापसम्भवाच्चेति केचित्।

ऊर्ध्वं तु पित्रार्जितं स्थावरमस्थावरञ्चेति द्विविधेति केचना मनन्ति। तत्र यद्यापि माताप्यंशं समं हरेदेति उभयसाधारणा तथापि त दत्तं स्त्रीधनमित्यस्यात्राप्यन्वयादवस्थारे एव पर्यवसति। तथा हि कारकविभक्तिस्तावन्नेरपेक्ष्यं गमयत्युत्सर्गत इति सर्वसम्मतम्। एवं भर्त्रा श्वशुरेण वा निरपेक्षेण यस्यै: न दत्तोऽंश: सा अंश: हरेदित्युक्तौ यस्यै निरपेक्षेणामुना वा यच्छतं तस्या: स एव तादृशो भागो नान्य इत्युक्तं भवति सोऽयं यदि पुत्राशेन समस्तदा पूर्वं दत्ताऽप्यसाविदानिं वैभाविको भवति। यद्यधिकस्ततस्तद्वा तत्तसम एव वैभाविकोऽधिकारस्तु दत्त एव। अत एवानुमीयते तस्मिन् किञ्चित्करतया पुत्रस्वामित्वस्य पुत्रांशसमानादेवांशादिद्वानीं निवृत्तिर्न त्वधिकारात्। यदि न्यूनस्तदा मात्रान्तरेण अवैषम्येण तादृशेन विभज्यद्रव्येण सम: कार्य:। अत्र तु दत्त त्वर्धं प्रकल्पशेदित्यर्थ:। एवं च माता सममंश हरेदित्यस्य पुत्रस्वाम्यासंसृष्टस्वाम्यकं कुर्यादित्यर्थ: । अत्र स्थावरस्योऽयोग्य-त्वाद्कर्मत्वमिति बहुवचनप्रमाणमाध्यमेन मिताक्षरमनुसृत्य धनविभागविषयककालविवेचनं कृतम्।

अपि च व्यवहारमयूखप्रकारेण नीलकण्ठभट्टेनापि मिताक्षरामतानुसारं धनविभाग कालविषये विचार: प्रदत्त:। अपरञ्चापि महामोहपाध्यायवाचस्पतिमिश्रस्तस्य विवादचिन्तामणावपु मिताक्षरामतानुसारं धनविभागकालविषयं चर्चितवान्।

अपि च कृत्यकल्पतरूकारेण लक्ष्मीधरेण विषयेऽस्मिन् मिताक्षरामनुसृत्योक्तं यत् ऊर्ध्वं पितुश्चेति पितृधनविभाग उक्त:। मातुश्चेति मातृधनविभागकाल: उक्त:। तेन मातरि जीवन्यामपि पितृधनविभाग: कार्य:। यथा मातुरूर्ध्वे पितरि जीवत्यपि मातृधनविभाग: कार्य एव। यत: पश्चादधिगतं पितृधनं व्यापारनिरपेक्षै: पुत्रै: विद्यादिभिरुपात्ते: धने स्वाम्यम्, तथापि तत्राप्यस्वाम्यं जीवति पितरि पितृधने आर्यधर्मयोस्तेषां पितरि पितृधने आर्यधर्मयोस्तेषां पितरि जिवति अश्वातन्त्र्यम्। पुनश्चपि स्मृतितत्वप्रकारेण रघुन्दननेनापि मिताक्षरा-मतमनुसृतम्।

—o—

***अध्यापक:, धर्मशास्त्रविभाग:,***

***श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालय:, पुरी, ओडिशा ।***

# भारतीय ज्योतिषशास्त्रे गुरुत्वाकर्षणसिद्धान्तस्य प्राचीनता

डॉ.रमेशचन्द्रबाबूलालशुक्लः

गुरु-शब्दः दीर्घवाचकः । गुरोः भावः गुरुत्वम् । गुरुत्वात् आकर्षणं गुरुत्वाकर्षणमिति । यथा - गुरूणामाकर्षणं शिष्याणामुपरि भवति । सूर्यस्याकर्षणं कमलोपरि भवति । चन्द्रस्याकर्षणं कुमुदोपरि, समुद्रोपरि च भवति । तथैव अयं मृदनिलसलिलव्योमतेजोमय इति पाञ्चभौतिको भूमेः पिण्डो वृत्ताकारः तद्कबहिस्थै शशाङ्कबुधशुक्रार्कभौमगुरुशनिनक्षत्राणाञ्च कक्षा वृत्तैरावृतः सन् । कक्षावृत्तस्वरूपं यथा -



अस्य भूवृत्तस्य न अन्याधारः वृत्तोऽयं सर्वे स्वशक्त्यैवाकाशेनिश्चितं तिष्ठन्ति। तत्पृष्ठे सकलं जगत् स्थितं वर्तते । पृष्ठेऽस्मिन् दानवाः मानवाः देवाः दैत्याः असुराः एते समन्तात् तिष्ठन्ति । यत्र तत्र च सर्वत्र पर्वतरामग्राम-कुसुमादिलतानामपि दर्शनं भवति । प्रमाणं यथा -

भूमेः पिण्डः शाङ्कज्ञकविरविकुजेज्यार्कनक्षत्रकक्षाः
वृत्तैवृत्तो वृत्तः सन् मृदनिलसलिलव्योमतेजोमयोऽयम् ।
नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे

निष्ठं विश्वंच शश्वतसदनुजमनुजादित्यदैत्यं समन्तात् ।।

सर्वत: पर्वतारामग्रामचैत्यचयैश्चित: ।

कदम्बकुसुमग्रन्थि केसरप्रसरैरिव ।। (सि.शि.गो.भु. श्लो. २,३)

सिद्धान्तशिरोमणिग्रन्थेऽस्मिन् भूमे: स्वशक्त्यैवाधार: स्वीकृत: अस्ति। परन्तु पुराणे तु एकस्य अध: द्वितीयस्य कल्पना कृता वर्तते ।अन्ते तु स्वशक्ते: कल्पना कृता परन्तु आदौ किमर्थशक्ते: कल्पना न कृता अत: अत्र अनवस्थादोष: वर्तते । यद्यपि भूमेर्मध्ये आधारपरम्परा स्वीकृता यथा - शेष: कूर्म: वराह: इत्यादि अस्य मतस्य स्वीकारे ग्रहाणां कक्षाभ्रमणं बाधितं न भवति । एतदर्थमन्मते धार्मिकदृष्ट्यापि च पुराणपरम्परा समीचीना एव वर्तते । कारणं स्वशक्तिकल्पना तु वर्तते एव । प्रमाणं यथा -

मूर्तोधर्ता चेद्धरित्यास्ततोऽन्यस्तस्याप्यन्योऽस्यैवमत्रानवस्था ।

अन्त्ये कल्प्याचेत् स्वशक्ति: किमाद्ये किं नो भूमे: साष्टमूर्तेश्चमूर्ति: ।।

(सि.शि.गो.भु.श्लो ४)

अनेन श्लोकप्रमाणेन पुराणेऽपि स्वशक्ति: कल्पिता । भूमि: स्वशक्त्यैवाकाशे तिष्ठति। एवं भाष्कराचार्यै: गुरुत्वाकर्षणविषये स्वसिद्धान्त: प्रदत्त: । तदित्थं वर्तते। यथा सूर्याग्न्यो: स्वभावत: उष्णता, चन्द्रे शीतता, जलं दवत्व, पाषाणे कठिनत्वं मरुत्स्यं चलनत्वं, भूमे अचलत्वं च प्रतीयते । तथैव वास्तुशक्तय: अपि विचित्रा वर्तन्ते । वास्तुशक्ति: वस्तुयोग्य: वास्तुम् अस्य शक्ति वास्तुशक्ति वर्तते । अर्थात् भूमि स्वशक्त्यैवाकाशे स्थिता वर्तते । मृत्पिण्डस्याचलं नास्ति । सर्वचराचरनिवासभूमेरेवाचलाचलत्वमितिकल्पनात् सुपरिहरैव ।आकाशे स्थितगुरु: वस्तु न पतति, ब्रह्मादिलोकवद् ग्रहनक्षत्रादिविम्बवद्वा अन्तरिक्षस्थितस्य मृत्पिण्डादेर्भूमौपतनं गुरुत्वाकर्षणवशात् न भवति । आकृष्टिशक्तिश्चमहीति वाक्यस्य व्याख्या यथा - कश्चिद्गुरुलघुवस्तुद्वयप्रक्षेपणे गुरुलघुवस्तु सहैवायाति पश्चादिति न । अत: भूमे: गुरुत्वाकर्षणशक्ति: तु निश्चितमेव सिद्ध्यति । प्रमाणं यथा-

यथोष्णतार्कानलयोश्चशीततादिधौद्रुति: के कठिनत्वमश्मनि

मरुच्चलो भूरचलाश्चभावतो यतो विचित्रावतवस्तुशक्त्य: ।

आकृष्टिशक्तिश्चमहीतया यत् स्वस्थं गुरुस्वाभिमुखं स्वशक्त्या

आकृष्टते तत्पततीवभाति समे समन्तात् क्वपतत्वियं रवे ।।

(सि.शि.गो.भु.श्लो. ५,६)

एवं श्रीभास्कराचार्यद्वितीय: स्वसिद्धान्तशिरोमणौ अस्य गुरुत्वाकॅणसिद्धान्तशक्ते: सर्वप्रथमं प्रतिपादनं कृतं यस्य जन्मसमय: १०३६ शक: १११४ ईस्वीयवर्ष: सिद्धयति। प्रमाणं सिद्धान्तशिरोमणिगोलाधिकारस्य प्रश्नाध्यायान्ते यथा -

रसगुणपूर्णमही १०३६ समशकनृपसमयेऽभवन्ममोत्पत्ति: ।

रसगुण ३६ वर्षण मया सिद्धान्तशिरोमणी रचित: ।। (श्लो. ५८)

अनेन प्रमाणेन ग्रन्थकर्तुरस्य जन्मकाल: प्रमाणिकं सिद्धयति तथैव जन्मस्थलीविषयेऽपि लिखितं वर्तते यत् विचारकस्य जन्मसह्यपर्वतस्य सन्निकटे विज्जडविडनामकग्रामे यत् इदानीं वीजापुरनामप्रसिद्धस्थानमस्ति, तस्मिन् जन्म अभूत् । प्रमाणं यथा-

आसीत् सह्य कुलाचलाश्रितपुरेत्रैविद्यविद्वज्जने: ।

(सि.शि.गो.प्र. श्लो.६९)

एवं श्रीभास्कराचार्यस्य संक्षेपेण कृतित्वं व्यक्तित्वं परिचयश्च च वर्त्तते। तथैव इदानीं प्रसिद्ध: गुरुत्वाकर्षणसिद्धान्तस्य द्वितीयविचारक: सर आइजेक न्यूटन: (ISAACNEWTAN) यस्य जन्म १६४२ ईशवीयवर्षे इंग्लैण्डदेशस्य लिङ्कोलनशर (LINCOLANSHIRE) बूलस्थोर्पनामकग्रमं अभूत । यदि उभयो जन्मकालयो: अन्तरं क्रियते चेत् ई.वर्ष: १६४२-१११४ ई - ५२८ ईसवीयवर्षभूर्वमेव श्रीभास्कराचार्यस्य जन्म अभवत् । अत: कालंदृष्ट्वा तु सिद्धान्तशिरोमणिग्रन्थरचनाकाल: ११४+३६ = ११५० ईसवीयवर्षे गच्छति। तथैव आकजेकन्यूटनस्य जन्मकाल: तु १६४२ वर्तते एतै: महोदयै: त्रिंशद्वर्षे गुरुत्वाकॅणसिद्धान्तस्य अन्वेषणं कृतं परन्तु भास्मराचार्य: तु ११५० ईसवीयवर्षे एव कृतवान् अत: उभयो: अन्तरं क्रियते यथा १६७२-११५०=५२२ वर्ष: लब्ध: ।अत: आंकणात: ५२२ वर्षपर्वमेव श्रीन्यूटनमहोदयत: भास्कराचार्य: आकर्षणसिद्धान्तस्य अन्वेषणं कृतवान् । अत: प्रथमं तु गुरुत्वाकर्षणसिद्धान्तस्य अन्वेषणं श्रीभास्कराचार्यस्य भारतीयचिन्तनं वर्तते । अत एव श्रीमद्भास्कराचार्य: प्रथमगुरुत्वाकॅणसिद्धान्तस्य अन्वेषक: इति जना: पठन्ति पाठयन्ति लिखन्ति ज्ञास्यन्ति चेत् स्वयमेव समीचीनोत्तमोत्तमं भारतीयं गौरवं भवेत् वर्द्धेत इति ।

—०—

*ज्योतिषशास्त्रविभागाध्यक्ष:,*

*श्रीसोमनाथसंस्कृतयुनिर्वसिटी,*

*वेराबलम्, गुजरातराज्यम् ।*

# सुरापानप्रायश्चित्तविमर्शः

डॉ. दयानिधिमिश्रः

पञ्चमहापतकेषु सुरापानमहापातकमन्यतम् । तच्च सुरापानं यः करोति स सुरापो भवति । तस्य च सुरापस्य निष्कृतिनिमित्तं बहुभिः शास्त्रकारैः प्रायश्चितानि विहितानि । भगवता मनुना प्रोक्तं यद् यो द्विजो मोहात् सुरां पिबेत्, सोऽग्निवर्णां सुरां पीत्वा तया सुरया कायो निर्दग्धे ततः किल्विषाद्विमुक्तो भवति । योगीश्वरेणापि प्रतिपादितं यत् सुराम्बुधृतगोमूत्रपयसां मध्येऽन्यतममग्निसन्निभं क्वाथापादिताग्निस्पर्शदाहशक्तिकं कृत्वा पीत्वा सुरापो मरणाच्छुद्धिं प्राप्नोति। गोमूत्रसाहचर्याद् गव्ये एवं घृतपयसी ग्राह्ये, घृतपयःसाहचर्याच्च स्त्रैणमेव गोमूत्रम्, एतच्च पानमार्द्रवाससा कार्यम् । यतो हि पैठीनसिनामुक्तम् -

'सुराप आद्रवाासाश्चाग्निवर्णां सुरां पिबेत्' ।

पानपात्रविषयेऽपि प्रचेतसा निर्दिष्टं यत्- लौहेन प्रात्रेण सुरापोऽग्निवर्णा सुरामायसेन ताम्रपात्रेण वा पिबेत् ।

अत्रेदंचिन्तनीयम्- किं सुराशब्दो मद्यमात्रे रूढः ? उत तिसृषु एव गौडी-माध्वी-पैष्टीष्वाहोस्वित् पैष्ट्यामेवेति । तत्र केचिन्मद्यमात्रे रूढ इति वर्णयन्ति । ''अभ्यासे तु सरायाः'' (२०/२२) इति वासिष्ठे पैष्ट्यादित्रयव्यतिरिक्तेऽपि मद्यमात्रे सुराशब्दप्रयोगदर्शनात् । न चासौ गौणः प्रयोग इति शङ्कनीयम् । 'मदजननशक्तिमत्त्वोपाधिकतया सर्वत्र मुख्यत्वोपपत्तौ गौणत्वकल्पनाया अन्याय्यत्वादिति यः पक्षः, स नैवाद्रियते । तच्चायुक्तम् । पनसादिजन्यं मदकारणं द्रवद्रव्यं मद्यम् । यथाह पुलस्त्यः -

पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् ।
मधूत्थं सौरमारिष्टं मैरेयं नारिकेलजम् ।।

समानानि विजानीयान्मद्यान्येकादशैव तु ।

द्वादशन्तु सरामद्यं सर्वेषांमधनं स्मृतम् ।।

पुलस्त्येन मद्यविशेषत्वेन सुराया निर्दिष्टत्वात् । अनेन मद्यमात्रे सुराशब्दप्रयोगो गौण: । अन्ये केचन पुन: पैष्ट्यादिषु तिसृषु सराशब्दं रूढं मन्यन्ते । तथा हि यद्यप्यनेकत्र सुराशब्दप्रयोगो दृश्यते, तथापि कुत्रानादित्वमिति सन्देहे गुडमधुपिष्टविकारे तत्तनादित्वनिर्द्धारणात्तत्रैव मुख्यत्वं युक्तम् । न चानेकत्र शक्तिकल्पनादोषो मदशक्तेरूपाधित्वाश्रयणेन तस्य सुपरिहरत्वात् । न च तालादिरसेषु अप्युपाधेर्विद्यमानत्वादतिप्रसङ्ग:, पङ्कजादिशब्दवद्योगरूढत्वाश्रयणात् । अतश्च ''यथैवैका तथा सर्वा न पातव्या द्विजोत्तमै:'' इति तिसृणां सुराणां समानदोषत्वप्रतिपादनपरं न पुनरनयोर्गौडीमाध्वो: पैष्टीसुरासनत्वप्रतिपादनम् । अत्र द्विजोत्तमग्रहणं द्विजात्युपलक्षणम् । मनुना प्रतिपादितम् -

''सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । (मनु ११/१६)

अपि च अन्नविकारस्यैव सुरात्वनिर्देशादन्नशब्दस्य च 'अन्नेन व्यञ्जनम्' इत्यादिषु व्रीह्यादिविकार एव प्रयोगदर्शनात्, गुडमधुनोश्च रसरूपत्वात्तथा सौत्रामणिग्रहेषु चान्नविकार एव सुराशब्दस्य श्रुतत्वात् पैष्ट्यैव सुरामुख्योच्यते । अतो ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् । पैष्ट्यम् एव वर्णत्रयसम्बन्धित्वेन निषेध:, गौड्यादीनां तु मद्यानां ब्राह्मणस्यैव निषेध:, न तु क्षत्रियवैश्ययो:, यतो हि मनुना सुस्पष्टमुद्घोषितं-

यक्षरक्ष:पिशाचान्नं मद्यं मांसं सुरासवम् ।

न कदाचिदपि पातव्यं ब्राह्मणेनाश्नता हवि: ।।

अयं च सुरानिषेधोऽनुपनीतस्य अनूढायाश्च कन्याया भवत्येव ।

अत: 'ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्' इति जातिमात्रावच्छेदेन निषेधात्। पुनश्च प्रायश्चित्तविधिवाक्ये मनुना यद् द्विजग्रहणं कृतं तद् वर्णत्रयोपलक्षणार्थम्, निमित्तभूतनिषेधसापेक्षत्वान्नैमित्तिकविधेर्निषेधे च वर्णमात्रस्यावच्छेदकत्वात् ।

पादो बालेषु दातव्य: सर्वपापेष्वयं विधि: ।

इति वचनात् कामकारेऽपि न मरणान्तिकं किन्तु पादमेव द्विगुणीकृत्य षड्वार्षिकं देयम्, यतो हि- विहितं यदकामानां कामात्तद् द्विगुणं चरेत्' इति उक्तम्। एवंप्रकारेण वृद्धातुरादिष्वपि प्रायश्चित्तं योज्यम् । मद्यस्यापि जातिमात्रावच्छेदेन निषिद्धत्वादनुपनीतेनापि न पेयम् । अत्र कथं वानुपनीतस्य दोषः ? गौतमेन 'प्रागुपनयनात् कामचारकामवादकामभक्ष्यः' (२/९) इति प्रतिपादितम् । अनेन वचनेन कुमाराणामनुपनीतानां दोषाभावावगतिर्भवति । अस्या शङ्कायाः कृते- सुरामद्ययोर्निषेधवाक्ये जातिमात्रत्वावच्छेदकत्वश्रवणादप्रतिहतैव निषेधप्रवृत्तिः । अत एव स्मृत्यन्तरे दृश्यते -

सुरापाननिषेधस्तु जात्याश्रय इति स्थितिः ।।

अतः - पादो बालेषु दातव्यः सर्वपापेष्वयं विधिः ।। इत्यादि ।

बालानां पाद एव सुरापाने प्रायश्चित्तं समीचीनम् । परन्तु गौतमेन यत् कामभक्ष्यादि प्रतिपादितं तत् सुरादिव्यतिरिक्तशुक्तपर्य्यूषितादिद्रव्यविषयम् । अतः त्रैवर्णिकानामुत्पत्तिप्रभृति पैष्टीप्रतिषेधः । ब्राह्मणस्य मद्यमात्रनिषेधोऽप्युत्पत्तिप्रभृत्येव, राजन्यवैश्ययोस्तु न कदाचिदपि गौड्यादिपद्यप्रतिषेधः । शूद्रस्य न सुराप्रतिषेधो नापि मद्यप्रतिषेधः ।

एवं सुरापाने सुराम्बुघृतगोमूत्रपयसामन्यतमं द्रव्यमग्निवर्णं कृत्वा पीत्वा मरणाच्छुद्धिर्भवतीति प्रायश्चित्तं प्रतिपाद्य प्रायश्चित्तान्तरं द्वितीयपक्षं प्रतिपाद्यते । सुरापो बालवासजटी भूत्वा वने आश्रमे वृक्षमूले नदीतीरे वा स्थित्वा ब्रह्महत्याव्रतं कुर्यादितेन शुद्धो भवति । ब्रह्महत्याव्रतमोचरन्नपि सुरापो न शिरःकपालादिधारणं कुर्यात् । इदञ्च व्रतं जल बुद्ध्या योऽकामतः सुरां पिबति, तद्विषयम्; यतो हि -

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् । मनु. (११/८१)

इत्यकामोपाधित्वेन विहितस्यैव द्वादशवार्षिकस्यादिदेशादिति । अत्र च सुरापानस्य महापातकत्वात् सत्यप्यादिदेशिकत्वे सम्पूर्णमेव द्वादशवार्षिकं ब्रह्महत्याव्रतं कुर्यान्न पादोनम्, सुरापगुरुतल्पगौ चीरवल्कलवाससौ ब्रह्महत्याव्रतं चरेयातामिति

प्रचेत:स्मरणात् ।

वृद्धहारीतोऽपि- द्वादशभिर्वर्षैर्महापातकिन: पूयन्ते इति । एतच्च व्रतं गोच्छागादिलोमनिर्मितवस्त्रचीरवल्कलादि वा प्रवृत: जटाश्मशृनखानि व धारयित्वाऽमुण्डित: पूर्वकं वसेत् ।

अपि च प्रायश्चित्तानन्तरं दृश्यते यत्-पिण्याकं वर्षत्रयपर्यन्तं रात्रावेव भक्षयेत् । अथवा पिण्याकाभावे तण्डुलवान् वर्षत्रयं यावत् रात्रावेव सकृत् भक्षयेत् ।

कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ।
सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ।। (मनु ११/९२)

अस्य च पिण्याकादिभक्षणस्य भोजनकार्ये विहितत्वादशनान्तर परित्याग: कार्य्य: । एतच्च प्रायश्चित्तमुदकबुद्ध्या सुरापाने छर्दनोत्तरकाले वेदितव्यम् । तथा चाह व्यास: -

एतदेव व्रतं कुर्यान्मद्यपस्यार्दने कृते ।
पञ्चगव्यञ्च तस्योक्तं प्रत्यहं कायशोधनम् ।।

आपस्तम्बेनापि -

स्तेयं कृत्वा, सुरां पीत्वा, गुरुदारान् गत्वा ब्रह्महत्याञ्च कृत्वा चतुर्थकालं मितभोजनोऽभ्युपेयात्सवनानुकल्पं स्थानासनाभ्यां विहरंस्त्रिभिर्वर्षै: पापं व्यपनोदति । (१/२५)

अङ्गिरोऽपि -

महापातकसंयुक्ता वर्षै: शुद्ध्यन्ति ते त्रिभि: ।।

एतत् प्रायश्चित्तंतु अबुद्धिपूर्वकं सुराया: तालुमात्रसंयोगे करणीयम् । अस्मिन् प्रकरणे तत्रभगवता विज्ञानेश्वरेण प्रतिपादितं यत् द्रवद्रव्यस्याभ्यवहरणं पानमित्युच्चते । अभ्यवहरणञ्च कण्ठादधोनयनं न ताल्वादिसंयोगमात्रमिति । अत: कथं तत्र पाननिमित्तं प्रायश्चित्तमिति पूर्वपक्षशङ्कासमुत्पादयता भगवता विज्ञानेश्वरेणात्र समाधानं प्रदत्तं येन ताल्वादिसंयोगेन विना पानक्रिया न निवर्त्तते, सोऽपि पानक्रियाप्रतिषेधेन प्रतिषिद्ध: ।

अतो यद्यपि मुख्यपानाभावान्न महापातकत्वं तथापि तत्प्रतिषेधेन तदङ्गभूताव्यभिचारिता-ल्वादिसंयोगस्यापि प्रतिषिद्धत्वेन दोषस्य विद्यमानत्वाद् भवत्वेव प्रायश्चित्तम् ।

चरेद्व्रतमहत्त्वापि गतार्थश्चेत् समागतः (या.स्मृ. ३-२५२) तथा हननप्रतिषेधेन तदङ्गभूताध्यवसायादेरपि प्रतिषिद्धत्वात् प्रायश्चित्तविधानम् । यमः -

सुरां पीत्वा द्विजं हत्वा रुक्मंहत्वा द्विजन्मनः ।
संयोगं पतितैर्गत्वा द्विजश्चान्द्रायणं चरेत् ।।

यदा सुरासंसृष्टं शुष्करसमेवान्नं भक्षयति, तदा पुनरुपनयनम् । यथा-

अज्ञानात् प्राश्य विष्मूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ।। (मनु.११/१५०)

शुष्कसुराभाण्डस्थितोदकपानेपि भवति प्रायश्चित्तम् । शातातपेनाम्मातं यथा -

सुराभाण्डोदकपाने छर्दनं घृतप्राशनमहोरात्रोपवासश्च ।।

सुरापस्य मुखनिर्गतगन्धघ्राणेऽपि प्रायश्चित्तं कुर्यात् ।। यथाह मनुः -

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः ।
प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुद्ध्यति ।। (मनु.११/१४९)

यदि कश्चिदुदकबुद्ध्याऽज्ञानेन सुरापानं करोति, तर्हि सोऽपि पतितो भवति । तस्य द्विजातिकर्मभ्यो हानिर्भवति, अपि च ये द्विजातयः भ्रान्त्यारेतो विण्मूत्राणि प्राश्नन्ति, ते त्रयोऽपि ब्राह्मण-क्षत्रिय-वैश्यास्तप्तकृच्छ्रपूर्वकं पुनरुपनीताः सन्तः शुद्धाः भवन्ति । मद्यपाननिमितकः यः पुनः संस्कारः स ब्राह्मणस्यैव भवति । क्षत्रियविशोस्त-दभ्यनुज्ञानस्य दर्शितत्वात् न तयोः पुनः संस्कारः ।

गौडीमाध्वीमद्ययोः पुनरज्ञानतः पाने कृच्छ्रातिकृच्छ्रसहितः पुनः संस्कारो घृतप्राशश्च कार्यः । गौडीमाध्वीमद्ययोः मतिपूर्वकपाने पिण्याकं तण्डुललवान् वा वर्षत्रयं यावद्रात्रौ सकृद्भोजनपूर्वकं प्रायश्चित्तम् । तयोर्मतिपूर्वपानेऽभ्यासेऽग्निवर्णां सुरां पीत्वा मरणात्पूतो भवति । पैष्टीपाने तु सकृदपि मरणान्तिकं प्रायश्चित्तम् । द्विजातिस्त्रीणां मद्यपानदोषेऽपि प्रायश्चित्तं भवति । द्विजातीनां पुरुषाणां मद्यपाने यद्यत् प्रायश्चितं तस्य

प्रायश्चित्तस्यार्द्धं ताः स्त्रियः कुर्य्युः । शूद्रभार्यायास्तु शूद्रवदेव न प्रतिषेधः । या च द्विजातिभार्या सुरापानं करोति, सा कृतपुण्याऽपि सती पतिलोकं न याति; किन्तु इहैव लोके श्वगृध्रसूकरलक्षितां तिर्यग्योनिं क्रमेण प्राप्नोति । योगीश्वरेणोक्तम् -

पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् ।

इहैव सा शुनी गृध्री सूकरी चोपजायते ।। (या.स्मृ.३-२५६)

धर्मार्थकामेषु सहाधिकाराद्दम्पत्योरेकशरीरत्वमेव । अतो यस्य द्विजातेर्भार्य्या सुरां पिबति, तस्य भार्य्यारूपमर्धं शरीरं पतति । पतितस्य च भार्य्यारूपस्यार्धशरीरस्य निष्कृतिर्न विधीयते । यथाह मनुः -

पतत्यर्द्धं शरीरस्य यस्य भार्य्या सुरां पिबेत् ।

पतितार्धशरीरस्य निष्कृतिर्न विधीयते ।। इति ।

तस्माद् द्विजातिभार्यया ब्राह्मण्याद्यया कदाचिदपि न सुरा पेया । एवं सुरापानेषु समेष्वपि निषिद्धभक्षणादिषु सुरापानसमं प्रायश्चित्तं विधीयते इति ।

—०—

*अध्यापकः, धर्मशास्त्रविभागः,*

*श्रीश्री अनन्तनारायणसंस्कृतमहाविद्यालयः,*

*आयतपुरम्, केन्द्रापडा, ओडिशा '*

# प्रेतादिदेहसम्बन्धा:

डा.उमाराहुल

उत्क्रान्त: पृथगात्मा देहात् प्रेत:[१] परेतसंज्ञोऽसौ।
सम्बद्ध: पुनरेवं देहान्तरविक्रम: क्रमते।।१।।
प्रविशति साधु निविशते ह्याविशतीवान्यदेहसंक्रान्त:।
उपविशतीव सदेहोऽध्वनि वा स्थूणासु संकल्पै:।।२।।
कल्पविकल्पसुकल्प: परिकल्पो वा परागत: कल्पै:।
संकल्पितकल्पनया प्रकल्पकुल्याकलापीव।।३।।
मृतदेहात् पृथगात्मा ख्यात: क्षेत्रे सदैव संसारे।
ये जीवन्ति नु लोके तेषां चित्ते स वै प्रेत:।।४।।
प्रेतो निवसति नात्मा कुत्र कथं केन कस्य कस्मै वा।
कस्मात् कस्मिन् वर्त्मनि भावाभावौ सुझञ्झौ हि।।५।।
प्रेत: कथमिह निवसति चित्ते पित्ते नु जीवितानां क:।
योऽसौ मृतोऽथवाऽसौ जीवनकालेऽनुभावाढ्य:।।६।।
भावा: परिभवशून्या ये च विभावा : पराभवानन्दा:।
अरणिचरणरणनिकया ह्यनुभावा येऽनलास्ते हि।।७।।
प्रेतानां या संस्थाऽऽत्माऽटति कतिधा तया विधानेन।
मृगतृष्णाभयभीता मृगीव गङ्गातटेऽटन्ती।।८।।
आपन्न:[२] सम्पन्नो विपन्नजीव: कथं स्वयं प्रेत:।
कर्मभिरयं रथाशयदेहं गेहं विना विहग:।।९।।
आवर्तच्छलजालैर्नालङ्कुरुते तमालजम्बालम्।
तामालिकमलकेव प्रिये ममल्ले तमालं य:।।१०।।

देहेन हि सम्बन्धस्तुष्ट्यै पुष्ट्यै तथैव सन्तुष्ट्यैः।
आत्मान्तररचितदेहैर्भुजगं इवायं कथं जारः।।११।।
संस्थाप्रेतपरेयं स्वयं परेता सुबुद्बुदा जलजा।
संतिष्ठते न भीत्या केवल आत्मा स वै प्रेतः।।१२।।

---

**सन्दर्भाः**


१. भागवत.-७.१४.२६ ।
कूर्मपु. -३३.१६ ।
वामनपु.- ७९.२०,२१,३० ।
मत्स्यपु. -१८.१६,१७.२५,१९.३,८ ।
कठोप. १.१.२० ।
२. वामनपु.- ७९.५६ ।


—०—


*मार्फत - रोपितराहुल,*
*शास्त्रीनगर, मेरठ (यु.पी.)*

# गुरुतल्पगमनप्रायश्चित्तम्

डॉ. मानसीरथः

ब्रह्महत्यासुरापानं स्तेयं गुर्वाङ्गनागमः इति मनूक्तेः गुर्वङ्गनागमः एकं महापातकम् । यः गुरुपत्नीगमनं करोतिं स महापातकी । 'गुरुतल्पगमनम्' गुर्वङ्गनागमनमहापातकस्यापरा संज्ञा । तल्पशब्देन शय्याऽवबोध्यते, तत् साहचर्य्याद् गुरुपत्न्या साकं एकशय्याशयनमिति शब्दस्यार्थः । तच्च शयनं यः करोति, स गुरुतल्पगो भवति । तस्य प्रायश्चित्तं मनु-योगीश्वर-गौतमादिर्भिर्मरणान्तिकं प्रदर्शितम् । मरणान्तिक प्रायश्चित्तकाले गुरुतल्पगः स्वापापकर्म विख्याप्य 'मया गुर्वङ्गनागमनं कृतामिति प्रायश्चित्तं कुर्यात् । प्रायश्चित्तन्तु निष्कालको घृताभ्यक्तस्तप्तां तां सूमी मृन्मयीं वा परिष्वज्य मरणात् पूवो भवति । मनुनापि-

गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादपोमये ।<br>
सूर्मीज्वलन्तीं स्वाश्लिष्येन् मृत्युना स विशुद्ध्यति ।। (११/१०३)

योगीश्वरेणाप्यत्र-

तप्तेऽयःशयने सार्दमायस्था योषिता स्वपेत् ।<br>
गृहीत्वोत्कृत्य वृषणौ तैऋत्यां चोत्सृजेत्तनुम् ।।। (या.स्मृ.प्रा.२५९)

तप्तेऽयं शयने यथा मरणाक्षमं भवति तथा तप्तेऽग्निवर्णे कृते शर्ष्णायसे शयने अयोमय्या स्त्रीप्रतिकृत्या तप्तया सह गुरुतल्पगः स्वप्यात् । एवं सप्त्वा स्वदेहं त्यजेत्, म्रियतेति यावत् । अथवा सलिङ्गवृषणौ स्वयमुत्कृत्य च्छित्वाऽञ्जलिना गृहीत्वा नेऋत्वा नैऋत्यां दिशि देहपातान्तामुकुटिलगतिर्गत्वा तनुमुत्सृजेत् । यथाह मनुः -

स्वयं वा शिश्नवृषाणावुत्कृत्याधाय चाञ्जलौ ।<br>
नैऋतीं दिशमातिष्ठेदानिपातादजिह्मगः ।।(११/१०४)

गमनकाले च पृष्णतोऽनीक्षमाणेन कर्तव्यम् । क्षुरेण शिश्नवृषणावुत्कृत्यानवेक्षमाणो व्रजेदिति शंखलिखितस्मरणात् । एवं गच्छन् यत्र कुड्यादिना प्रतिबध्यते, तत्रैव मरणान्तं तिष्ठेत् । वसिष्ठेनापि (२०/१३) सवृषणं शिश्नमुत्कृत्याञ्जलावादाय दक्षिणाभिमुखो गच्छेद्यत्रैव प्रतिहतस्तत्रैव तिष्ठेदाप्रलयात् । गुरुतल्पपातकिनो दण्डविषये तत्रभगवता नारदेनाभिहितम् -

आसामन्यतामां गच्छन् गरुतल्पग उच्यते ।

शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते ।। (१२-७५)

एवं लिङ्गाद्युत्कर्त्तनं दण्डार्थं पापक्षयार्थमपि भवति । इदमेव मरणान्तिकदण्डमभिप्रेत्योक्तं मनुना - राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः ।

निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।। (८/३१८)

गुरुतल्पगः प्रयश्चित्तेन शुद्ध्येत् इति गुरुशब्दश्चात्र मुख्यं गुरुत्वं पितरि वर्त्तते इति मनुना प्रतिपादितम् । तन्मते -

निषेकादीनि कर्माणि यः करोति यथाविधि ।

सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ।। (२०१४२)

अस्मादेव वाक्याद् विज्ञायते निषेकादिकर्त्तुर्जनकस्यैव मुख्यं गुरुत्वं वर्तते । योगीश्वरेणापि मनुवचनं स्वीकृत्य प्रतिपादितम्, यथा-

स गुरुर्थः क्रियाः कृत्वा वेदमस्मै प्रयच्छति । (आ.३४)

एवं गुरुशब्दस्यान्यत्रापि प्रयोगो दृश्यते । मनुः -

स्वल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।

तमपीह गुरुं विद्याश्रुतोपक्रियया तया ।। (२/१४९)

अपि च गुरुशब्दस्य प्रवृत्तिनिमित्तभूतायाः पूजार्हतायाः सर्वत्रानुस्यूतेः तस्मात् सर्वे गुरुवस्तत् पत्नीगमनं गुर्वङ्गनागमनमिति नैव शङ्कनीयम् । यतो हि निषेकादिकर्मणः कर्त्ताऽनन्यपरत्वात् पिता एव भवति । अत एव पितुरेव मुख्यं गुरुत्वमिति स्थितम् । आचार्य्यपुत्रशिष्यभार्य्यासु चैवम् इत्याचार्य्यदारेष्वातिदेशिकं गुरुतल्पप्रायश्चित्तं वशिष्ठेनाभिहितम् । गुरुतल्पप्रसङ्गे गुरुपदेन संबर्त्तेन स्पष्टमेव पितृदारग्रहणं कृतम् -

पितृदारान् समारुह्य मातृवर्ज्यं नराधमः ।।

षट्त्रिंशन्मतेऽपि - पितृभार्य्यां तु विज्ञाय सवर्णा योऽधिगच्छति ।।

अतोऽपि निषेकादिकर्त्ता पित्तैव मुख्यो गुरुः ।

तच्च गुरुत्वं वर्णचतुष्टयेऽप्यविशिष्टम्, निषेकादिकर्तृत्वस्याविशेषात् । मनुना यः विप्रशब्दो गृहीतः, सोपलक्षणार्थकः । अतः पितृपत्नीगमनमेव महापातकम् । गमनं च चरमधातुविसर्गपर्य्यन्तं कथ्यते । अतस्ततोऽर्वाङ्निवृत्तौ न महापातकत्वम् । चरमधातुविसर्गरूपं गमनं यत्र तत्रेदं तप्तेऽयःशयने सार्धमायस्या योषिता स्वपेत् इत्याद्युक्तं मरणान्तिकं प्रायश्चित्तम् । एतत्तु मरणान्तिकं प्रायश्चित्तं जनन्यामकामकृते, तत् सपत्न्यां सवर्णयामुत्तमवर्णायां कामकृते मातव्यम् । यतो हि षट्त्रिंशन्मते -

पितृभार्य्यां तु विज्ञाय सवर्णां योऽधिगच्छति ।

जननीं चाप्यविमाय नामृतः शुद्धिमाप्नुयात् ।।

जनन्यां कामकृते गमने वसिष्ठेनाभिहितम्- निष्कालको घृताभ्यक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेत् । अकामतोऽभ्यासेऽप्येतदेव प्रायश्चित्तम् । तत्रोभयेच्छातः प्रवृत्तौ तप्तेऽयःशयने इति प्रथमं प्रायश्चित्तम् । स्वेन प्रोत्साहने तु गृहीत्वात्कृत्त्य वृषणौ इति द्वितीयं प्रायश्चित्तम् । तया प्रोत्साहितस्य तु (मानवं) तप्तलोहशयनज्वलत्सूर्म्यालिङ्गनयोरन्यतरं प्रायश्चित्तं द्रष्ट्व्यम् । अधःशायी जटाधारी एककालं पर्णमूलफलाशनो भूत्वा ब्रह्महा गुरुतल्पगः सुरापः सुवर्णस्तेयी द्वादशवर्षैः महापातकिनः शुद्ध्यन्तीति शंखेन परामृष्टम् । एतद्द्वादशवार्षिकं व्रतं समवर्णोत्तमवर्णः पितृदारगमने अकामकृते द्रष्ट्वयम्, कामतः प्रवृत्तस्य रेतः सेकात् प्राङ्निवृत्तौ षड्वार्षिकम्, अकामतस्तु त्रैवार्षिकम्, जनन्यां तु कामतः प्रवृत्तस्य रेतः सेकात् प्राङ्निवृत्तौ द्वादशवार्षिकम्, अकामतस्तु षड्वार्षिकमिति कल्प्यम् । अस्मिन्नेव प्रकारणे तत्रभगवता योगीश्वरेण प्रायश्चित्तान्तरमपि परिकल्पितम्, गुरुतल्पगः प्राजापत्यं कृच्छ्रं वर्षत्रयं चरेत् । एतच्च प्रायश्चित्तान्तरं ब्राह्मणीपुत्रस्य शूद्रजातीयगुरुभार्य्यागमने मतिपूर्वे द्रष्टव्यम् । यदा तु गुरुपत्नीं सवर्णां व्यभिचारिणीमबुद्धिपूर्वं गच्छति तदा वेदजपसहितं चान्द्रायणत्रयं कार्य्यम् । यथाह योगीश्वरः - प्राजापत्नयं चरेत् कृच्छ्रं समा वा गुचरुतल्पगः ।

चान्द्रायणं वा त्रीन्मासानभ्यसेद् वेदसंहिताम् ।।

(प्रा. २६०)

तत्र कामतो मरणान्तिकं प्रायश्चित्तमकामतो द्वादशवार्षिकं सुरापव्रतं गुरुतल्पगः कुर्यात्, क्षत्रियादिषु कामतोऽभ्यासे मरणान्तिकम् ।

यत्यागत्वा पुनर्भार्य्यां गुरोः क्षत्रसुतां द्विजः ।

अण्डाभ्यां रहितं लिङ्गमुत्कृत्य स मृतः शुचिः ।।

इत्येवं कण्वेनं प्रतिपादितम् । यदि गुरुतल्पगः प्रायश्चित्तं न चिकीर्षति तदा याज्ञवल्क्येन यः वधदण्डः प्रतिपादितः प्रायश्चित्तस्थाने स एव दण्डो विधेयः । यथा -

लिङ्गं च्छित्वा वधस्तस्य सकामायाः स्त्रिया अपि ।। (या.स्मृप्रा. २३३)

वैश्यायां गुरुभार्य्यायां कामतो गमने षड्वार्षिकं प्रायश्चित्तं कुर्य्यात् । ब्राह्मणीपुत्रस्य क्षत्रियायां मातुः सपत्न्यां गमने पादन्यूनं द्वादशवार्षिकम्, अर्थात् नववार्षिकं व्रतं कुर्य्यात् । तस्यैव वैश्यायां मातुः सपत्न्यां गमने षड्वार्षिकं व्रतं कुर्यात् । शुद्रायां तु त्रैवार्षिकं

प्रायश्चित्तम् । एवं क्षत्रियापुत्रस्य वैश्यायां मातरि गमने ननवार्षिकम्, शूद्रायां मातरि गमने षड्वार्षिकम् । एवमपि वैश्यापुत्रस्यापि प्रायश्चित्तं मेयम् । यानि गुरुतल्पसमानि तानि मन्वादिर्धशास्त्रकारैः प्रतिपादितानि -

सखि-भार्य्या-कुमारीषु स्वयोनिष्वन्त्यजासु च ।
सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ।।
पितुः स्वसारं मातृषु मातुलानिं स्नुषामपि ।
मातुः समत्नीं भगिनीमाचार्य्यतनयां तथा ।।
आचार्य्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ।। (या.स्मृ.प्रा. २३१-२३३)

अत्र एकरात्रादूर्द्ध्वं कामतोऽभ्यस्तेषु यथाक्रमेण षड्वार्षिकं नववार्षिकं च प्रायश्चितं विमेयम् । अस्मिन्नेव विषये कामतोऽत्यन्ताभ्यासे मरणान्तिकम् । तथा च बृहद्यमः -

रेतः सिक्त्वा कुमारीषु स्वयोनिष्वन्त्यजासु च ।
सपिण्डापत्यदारेषु प्राणत्यागो विधीयते ।।

एकरात्राभ्यासे तु वर्षत्रयं प्रायश्चित्तम् । यथाह मनुः -

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः ।
तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ।।(११/१७८)

अकामतः प्रवृत्तस्य रेतः सेकादर्वाङ्निवृत्ती तत्रान्ममातृजाभगिनी गमने मातुराप्ता च भगिनीगमने तप्तकृच्छ्रं व्रतं समाचरेत् । यदा पुनरेता एवात्यन्तव्यभिचारिणीर्गच्छति, तदापीदमेव प्रायश्चित्तं चान्द्रायणं तप्तकृच्छ्रात्मकं क्रमेण कामतोऽकामतश्च प्रवृत्तौ विज्ञेयम् । स्वयोनिष्वन्त्यजासु च इति एकवाक्यसमभिव्याहाराद् भगिन्यादिष्वपोयमेव व्यवस्था वेदितव्या । यथा- मरणान्तिकं प्रायश्चित्तम्, मरणान्तिक चाग्निप्रवेशनम् ।

जनन्यां च भगिन्यां च स्वसुतायां तथैव च ।
स्नुषायां गमनं चैव विज्ञेयमतिपातकम् ।।
अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनम् ।।

इति कात्यायनवचनात्जनन्यां सकृद्गमने भगिन्यादिषु चासकृद्गमने अग्निप्रवेश इति मरणान्तिकं प्रायश्चित्तं बोधव्यम् ।

—०—

*अध्यापिका:, धर्मशास्त्रविभाग:,*
*वाग्देवीसंस्कृतमहाविद्यालय:*
*डालिजी, केन्द्रापडा, ओडिशा*

# बृहदारण्यकोपनिषदि वह्निस्मरणम्

*महामहोपाध्यायः डॉ.द्वारिकानाथ त्रिपाठी*

संस्कृतवाङ्मये केचित् ईदृशाः विशिष्टाः ग्रन्थाः सन्ति, यत्र गभीराध्यात्मिकतथ्यानां मीमांसा प्राप्यते। इदं गहनं विशिष्टज्ञानं वानप्रस्थिनां कृते वर्त्तते। गृहस्थाश्रमस्य पूर्णतया दायित्वनिर्वहनानन्तरं यदा मानवः वानप्रस्थाश्रमं प्रविष्टवानासीत् तदा नगरवातावरणात् दूरे गहने वने अर्थात् शान्तिमयवातावरणे चैकान्तस्थले तेन परमात्मस्वरूपादि मननस्मरणपूर्वकं वसतिः स्वीकृता। अतः अरण्ये ब्रह्मविषयिण्याः विद्यायाः अध्ययन कारणात् तद्विषयकाः ग्रन्थाः [१]आरण्यकमिति उच्यते। मन्त्रब्राह्मणरूपवेदेसु यस्मिन् भागे परमब्रह्मणः प्रतीकोऽपासना वर्णिता अस्ति सः अंशः आरण्यकं कथ्यते। आरण्यकग्रन्थाः ब्राह्मणग्रन्थानां परिशिष्टभागः भवति। आरण्यकग्रन्थानां विषयवस्तूनि ब्राह्मणग्रन्थेभ्यः स्वतन्त्रतापूर्णानि भवन्ति। ब्राह्मणग्रन्थाः गृहस्थानां यज्ञविषयिणीं चर्च्चां विदधाति। किन्तु आरण्यकग्रन्थाः वनोपलब्धसामग्रीयुतयज्ञसंपादनार्थं ब्रह्मध्यानार्थञ्च समुपदिशति। आरण्यकयज्ञेषु भौतिकयज्ञापेक्षया आध्यात्मिकस्वरूपं प्रति विशेषतया ध्यानं केन्द्रितमस्ति। अत एव आरण्यकग्रन्थानां नामान्तरं रहस्यब्राह्मणमिति भवति। आरण्यकग्रन्थानां प्रमुखप्रतिपाद्यविषयः ब्रह्मविद्या एव। ब्रह्मस्वरूपं तेजोमयम्। तेजसः पर्यायत्वेन अग्निः अभिधीयते। अग्निशब्दे त्रयः भावा सन्ति। यतोऽहि अयमग्निशब्दः धातुत्रयेण निरुच्यते। इण् = गतौ इति धातोः ल्युट्प्रत्ययेन निष्पन्न-अयनशब्दस्य अकारेण सह दह = भस्मीकरणे इत्यस्माद्धातोः तप्रत्येन निष्पन्न दग्धशब्दस्य गकारेण सह तथा णीय् = प्रापणे इत्यस्माद्धातोः ह्रस्वीकरणेन अक्षरत्रयसंहितापूर्वकम् अग्निशब्दं निर्वक्तुं शक्यते। यतोहि अग्निः अज्ञानदाहकः सन्मार्गनायकः मोक्षदायकश्चास्ति। वैदिकवाङ्मये अग्निः सर्वमान्यः पृथिवीस्थानीय देवः अस्ति। ऋग्वेदे अग्निस्तवनमाश्रित्य सूक्तानि प्राप्यन्ते। अधिकांशतः प्रायः सर्वेषु मण्डलेषु यज्ञप्रधानकारणात् आरम्भिकसूक्तानि अग्निसम्बोधितानि भवन्ति । अत एव बृहदारण्यकोपनिषदि अग्निचिन्तनम् अत्र प्रस्तूयते । "अग्निमीडे

पुरोहितम्[1] इत्यादि श्रूयते [२]ऋग्वेदे । अन्यष्वपि वेदेषु अग्नि: आराधित: श्रूयते । अग्नि: अग्रणि: अग्रणी परमात्मा भवति ।

ब्रह्मविद्याप्रतिपादकारण्यकग्रन्थेषु प्रमुखतम: ग्रन्थ: शुक्लयजुर्वेदीय-बृहदारण्यकोपनिषदस्ति । अत्र अश्वमेधसम्बन्ध्यग्नेरुत्पत्ति: प्राप्यते । सृष्टे: पूर्वम् अत्र किञ्चिदपि न बभूव । इदं सर्वं मृत्युनैवाच्छादितम् । इदं सर्वं अशनात: अर्थात् क्षुधयाऽववृते । अशनैव मृत्युरस्ति । सा विचिन्त्येदम् अहमात्मा अर्थात् मन: तद्युक्तो भवानीति चिन्तयामास । सा अर्च्चनम् अर्थात् पूजनं कुर्वती आचचाम । तस्या: अर्चनात् आप: बभूवु: । अर्चन्त्यै मह्यं कम् अर्थात् जलं प्राप्तमस्ति । अत: इदमेव अर्कस्यार्कत्वमस्ति । य: अनेन प्रकारेण अर्कस्य इदमर्कत्वमवगच्छति तस्मै निश्चयेन कम् अर्थात् सुखं मिलति । "नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीत्[३]ठ इत्यादि बृहदारण्यकोपनिषदि अस्मिन् प्रसङ्गे श्रूयते । ऋग्वेद-दशममण्डलनवतितमपुरुषसूक्त-त्रयोदशे मन्त्रे अग्नेरुत्पत्ति: ब्रह्मण: मुखात् भवतीति प्राप्यते –"चन्द्रमा मनसो जात..." इत्यादिना ।

वेदान्तसारे तम:प्रधानविक्षेपशक्तिमदज्ञानोपहतचैतन्यादाकाश:, आकाशाद्वायु:, वायोरग्निरग्नेराप:, अद्भ्य: पृथिवी चोत्पद्यते इति सृष्टिक्रम: वर्णित: । एवमेव [४]सांख्यकारिकायां प्रकृतेर्महान् तस्मादहङ्कार: अहङ्कारात् षोडशसमुदायात्मक: सर्वो भवति । तत्रापि षोडशसमुदाये पञ्चतन्मात्राभ्य: पञ्चमहाभूतानि जायन्ते । तत्र रूपविषयात् तेजो जायते । परञ्च बृहदारण्यकोपनिषदि प्रथमाध्याये द्वितीयब्राह्मणे प्रथमायाम् उपर्युक्तायां श्रुतौ व्याख्यायाम् इदं प्रतिपादितं यत् यतोहि मृत्यु: ईदृगमन्यत यत् अर्चनम् अर्थात् पूजनं कुर्वते कम् अर्थात् जलम् अभूत्, अनेनैवहेतुना अर्के अर्थात् अश्वमेधयज्ञे उपयोगिन: अग्ने: अर्कत्वमस्ति, अर्थात् अयमेव तस्य अर्कत्वहेतुरस्ति । इयमेव अग्नेरर्कनाम्न: व्युत्पत्तिरस्ति । तात्पर्यमिदमस्ति यत् अर्चनमर्थात् सुखहेतुभुताया: पूजाया: करणात् च जलसम्बन्धकारणात् अग्ने: (अर्कम्) इदं गौणं नामास्ति । तदुक्तं यथा – "अर्चते पूजां कुर्वते वै मे मह्यं कुमुदकमभूदित्येवममन्यत..." इत्यादि ।

अश्वमेधसम्बन्ध्यग्नेरुत्पत्त्यनन्तरं बृहदारण्यकोपनिषदि द्वितीयब्राह्मणे द्वितीयां श्रुतौ व्याख्यात: प्राक् किमिदमर्कमिति प्रश्नमुत्थाप्य ऋषि: व्याचष्टे – आप: अर्थात् जलान्येव अर्काणि सन्ति । तज्जलानां य: शर: अर्थात् स्थूलभाग: आसीत् स: एकत्रीभूतोभूत् । तदनन्तरमेकत्रीभूत: शर: पृथिवीरूपेण परिवर्त्तित: । जातायां पृथिव्यां स: मृत्यु:

श्रान्तोऽभूत् । तच्छ्रान्तस्य तप्तस्य च प्रजापतेः शरीरात् तत्सारभूतस्तेजोग्निः प्रजायत । यथा – "आपो वा अर्कस्तद्यदपा शर आसीत्..." इत्यादि ।

जलाद्युत्पत्त्यनन्तरं तस्य अवयवे अर्थात् विराड्रूपाऽग्न्यवयवे प्राच्यादिदिग्दृष्टे द्वितीयब्राह्मणे तृतीयां श्रुतौ वर्णनमस्ति । तेन स्वं प्रकारत्रयं विभक्तम् । सः आदित्यं तृतीयं भागं चकार, तथा वायुमपि तृतीयमेव विदधौ । अनेनप्रकारेण प्राणः त्रिषु भागेषु विभक्तोऽभूत् । तस्य शिरः प्राच्यां दिशि आसीत् तथा तमुभयतः ऐशानी आग्नेयी च बाहू स्तः । अनेन प्रकारेण प्रतीचीदिशास्य पुच्छमस्ति तथा तमुभयतः वायव्यदिशा नैर्ऋत्यदिशा च तज्जङ्घौ वर्त्तेते । दक्षिणा चोत्तरा च दिशौ तस्य पार्श्ववर्त्तिन्यौ विद्येते । तस्य पृष्ठभागः द्युलोकऽस्ति, चोदरमन्तरिक्षम्, इयं पृथिवी तस्य हृदयम् अस्ति । अग्निरूपविराट्प्रजापतिरयं जले स्थितः । इमं विराट् पुरुषं यः मनुष्यः सुचारुरूपेण याथातथ्येन च जानाति सः मानवः सर्वत्र प्रतिष्ठितो भवति । तदुक्तं यथा – "स त्रेधात्मानं व्याकुरुतादित्यं तृतीयं वायुं तृतीयं स एष प्राणस्त्रेधा विहितः...ह्र इत्यादि । एतदनन्तरं द्वितीयाऽध्याये प्रथमब्राह्मणे सप्तम्यां श्रुतौ गार्ग्येण अग्निब्रह्मणः प्रतिपादनः कृतम् । तथा च अजातशतृणां तत्प्रत्याख्यानं कृतमिति प्राप्यते । तदुक्तं यथा – "स होवाच गार्ग्यो य एवामग्नौ पुरुषः एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा..." इत्यादि । यथा यत् मया पूर्वं ख्यातं अग्नेः बहवो भेदाः भवन्ति तथा अयमग्निः ब्रह्मवदस्ति । बृहदारण्यकद्वितीयेऽध्याये प्रथमब्राह्मणे विंशतितयां श्रुतौ आत्मनः जगदुत्पत्तौ ऊर्णनाभ्याः अग्निविस्फुलिङ्गस्य च दृष्टान्तं प्रस्तुवन् ऋषिराचष्टे – "स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः..." इत्यादि ।

पञ्चमाऽध्याये नवमब्राह्मणे प्रथमायां श्रुतौ पुरुषान्तर्गतवैश्वानराग्नि – तद्घोषः मरणकालसूचकाऽरिष्टञ्चेति विषयप्रतिपादनं मिलति । तदुक्तं यथा – "अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति..." इत्यादि । अनेनप्रकारेण ज्ञायते यत् ब्रह्मवदऽयमग्निः सर्वेषु कार्येषु स्वोपस्थितिं सूचयति । त्रिषु लोकेषु । यथा प्रतीयतेऽयं पञ्चमाऽध्याये एकादशब्राह्मणे प्रथमश्रुतौ – "एतद्वै परमं तपो यद् व्याहितस्तप्यते परमं हैव लोकं जयति य एवं वेदैतद् वै परमं तपः..." इत्यादि । एवमेव बृहदारण्यकोपनिषदि ज्ञानकर्मसमुच्चयकारिणः जनस्य जीवनस्य अन्तिमे क्षणे आदित्यरूपाग्निः निवेद्यते - इति श्रुतौ द्रष्टुं शक्यते । श्रुयते तद्यथा – "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पुषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यम सूर्यं प्राजापत्य

व्यूह रश्मीन् । समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तं शरीरम् । ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ।। अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूमिष्ठां ते नम उक्तिं विधेम ।।" इति ।

वागग्निजठराग्निसामान्याग्निक्रोधाग्निकामाग्नीनां तथा च जलाग्निसूर्योर्जा-पवनाग्नीनां चर्चा मया विहिता । ते सर्वे अग्नयः सांसारिकदृष्ट्या लोके उपयुज्यन्ते । परञ्चाध्यात्मिकदृष्ट्या चर्चा बृहदारण्यकोपनिषदः षष्ठाऽध्याय द्वितीयब्राह्मणस्य नवमीतः त्रयोदशीपर्यन्तं श्रुतिषु पञ्चाग्निविद्यानां नामानि क्रमशः अधुना प्रदीयन्ते - द्युलोकाग्निः पर्जन्याग्निः इहलोकाग्निः पुरुषाग्निः योषाग्निश्चेति । आसु श्रुतिषु अग्नेः पृथक् पृथक् रूपं वर्णितम् । यद्यपि अग्निः उष्णस्पर्शवान् भवति तथापि आध्यात्मिकदृष्ट्या पृथक् पृथगधिकरणेषु अग्निः पृथक् पृथक् तया प्रतिपादितः । यथा कुत्रचित् द्युलोकः एव अग्निः अभिहितः, पर्जन्याग्नौ मेघः एव अग्निः इति मतम् । कुत्रचित् इहलोक एव अग्निः कथितः, कुत्रचित्तु पुरुषः एव अग्निरभिहितः । एवमेव योषाऽग्निरित्यत्र स्त्री एव अग्निरूपेणा ख्याता । प्रकारेणाऽनेन बृहदारण्यकोपनिषदि बहूषु स्थलेषु अग्नेः बहुरूपाणि बहुकार्याणि बह्वधिकरणानि चाख्यातानि । अतः निश्चयेन अग्निः ब्रह्मस्वरूपोऽस्ति । अनेन सर्वेषां लोकानां समस्तकार्याणि सम्पाद्यन्ते । अत एव विभिन्नासु श्रुतिषु अग्निः विभिन्नैः ऋषिभिः निवेदितः स्वस्वसंकल्पपूर्त्यर्थं "स नः पितेव सूनवे अग्ने सूपायनो भव । सचस्वा नः स्वस्तये ।।"[५] इति शम् ।

---

**संदर्भाः —**


१. "अरण्याध्ययनादेतदारण्यकमितीर्यते ।ह्न इति सायणभाष्ये ।

२. ऋग्वेदे – १.१.१ ।

३. बृहदारण्यकोपनिषदि – १.२.१ ।

४. सांख्यकारिकायाम् – २२ ।

५. ऋग्वेदे – १.१.९ ।


— ० —


*अध्यक्षः, संस्कृतविभागीयः*

*धर्मसमाजस्नातकोत्तरमहाविद्यालयीयः, अलीगढस्थः (यू.पी)*

# श्रीमद्भगवद्गीतायाः सर्वदर्शनोपजीव्यत्वम्

डॉ. युधिष्ठिरसाहुः

१.०.०

विषयसुखसर्वस्वमन्यमान्याः मानवाः संसारानन्ददग्धीभूताः सन्तोऽपि तद्विरक्ताः न भवन्ति। तस्मात् विविधेषु योनिषु जन्ममृत्युचक्रेषु निपतन्तः दुःखानि प्राप्यन्ते। एवंभूतानां जनानां कल्याणसाधनार्थंपरमानन्दप्राप्तयेच मुक्तिकामिनां कृते भगवच्छ्रीकृष्णमुखानिः सृता वाणीगीतात्वेन अभिहिता विश्वप्रसिद्धा च। तत्र व्याख्याकारैः वेदः भगवतः निःश्वासरूपेण वाणी तस्य गीतात्वेन चाख्यातौ इति स्वीकृता। निःश्वासः स्वाभाविकतया निः सरति। परन्तु योगस्यावस्थायां गीता विविक्ता। अतो वेदात् गीतायाः महत्त्वं साधिकं वर्तते। तस्मादुच्यते महाभारतमहापुराणे यथा-

न शक्यं तन्मयाभूयस्तथा वक्तुमशेषतः।
परं हि ब्रह्म कथितं योगयुक्तेन तन्मया।।[१]

दृश्यते ज्ञायते अनेनेति दर्शनम् इति करणार्थे दृश्यते इति दर्शनमिति भापक्षे वा दर्शनपदं व्युत्पाद्यते। तद् यस्मिन् पक्षे भवतु नाम जगतः सृष्टिः जीवब्र्ह्मणोः सम्बन्धः सुकदुःखयोः चेत्यादीनां तत्त्वानि निगदितानि विविधेषु दर्शनशास्त्रेषु ।परन्तु गीतायां तानि नैव निरूपितानि, तानि तु अनुभूयन्ते एव। तस्मात् सर्वाणि दर्शनानि गीतायामन्तगीतानि । न तु गीता कस्मिन् दर्शने अन्तर्भूयते। एतादृशं भावमङ्गीकृत्यात्र शोधप्रबन्धे श्रीमद्भगवद्गीतायां सर्वदर्शनोपजीव्यत्वं विविच्यते।

अत्र सर्वदर्शनपदेन यद्यपि आस्तिक-नास्तिकानां बोधः सम्पस्यते। तथापि वेदास्तित्वस्वीकृतानमास्तिकानां दर्शनानां दृष्टिः गीतासम्भूता इति सम्पाद्यते सयुक्तिकम्। न त्वत्र सर्वपदेन नास्तिकानां ग्रहणं कृतं वर्तते।

**१.१.१. वैशैषिकदर्शनस्योपजीवत्वम्-**

कणादमहर्षिप्रणितस्य वैशेषिकदर्शनस्य सिद्धान्तानुसारेण द्रव्यादिसप्तपदार्थानां तत्वाज्ञानेन निःश्रेयसोऽधिगमः सम्भवेत् इति विचारः प्रकटितः। द्रव्य-गुण-कर्म-सामान्य-विशेष- समवाय- भावपदार्थाः प्राग्भाव-प्रध्वंसाभाव-अत्यन्ताभाव- अन्योन्याभअव इति अभावत्वेनाङ्गीकृत्य पदार्थाः विश्लेषिताः तत्र वैशेषिकदर्शने गूतायाः दशमाध्याये वर्णितं विभूतिवर्णनमाधारीकृत्य स्वीकृता इति विचारोऽङ्गीक्रियते चेन्न हानिः।

अणुकद्व्यणुकादिक्रमेण जगदिदं सृष्टिमति यदुक्तं वैशेषिकैः तत्तु जीतायं स्थितस्य

विभूतिवर्णनमवलम्ब्य । गीतायाः दशमाध्यायस्य विंशतिश्लोकतः ऊनचत्वारिंशत् श्लोकपर्यन्तं द्वि-अशीति विभूतिवर्णनायां प्राप्यते। तत्र सर्वत्रैव परमात्मस्वरूपः भगवान् श्रीकृष्णः विद्यते। तस्मादुच्यते- यच्चापिसर्वभूतानां बीजं तदहमर्जुन।

न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।।[२]

तत्र सर्वत्रैव विभूतिषु चराचरेषु भगवान् विद्यमानत्वात् दृश्यमानपदार्थासत्वेन सद्ज्ञानेन परंब्रह्म ज्ञाननैव मुक्तिरिति यद् गीतायां प्रोक्तं तदत्र वैशेषिकदर्शने वर्णितम्। अतः वैशेषिकदर्शनस्योपजीव्यत्वं प्रमाण्यते।

वैशेषिकदर्शने द्रव्यपदेन क्षित्-अप्-तेज्-मरुत-व्योम-काल-दिग-आत्म चेति नवद्रव्याणि उदिरीतानि तान्येव गीताधारेणावलम्बितानि। तदर्थं निम्नोक्तानि पदानि विविक्तव्यानि गीतावचनेषु । तद्यथा-

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।

मरीचिर्मरूतामस्मि नक्षत्राणामहं शशी।। (गीता.१०/२१)

मनः- इन्द्रियाणां मनश्चास्मि भूतानामस्ति चेतना। (गीता. १०/२२)

अत्रेन्द्रियाणां तथा च मनसः ग्रहणात्तद्ग्रहणम्।

कालः- मासानां मार्गशीर्षोऽहमृतानां कुसुमाकरः।। (गीता.१०/३५)

अत्र मासपदेन बाल्यस्य ग्रषणम्।

तेजः- द्युतं छलयतामस्मि तेजतेस्विनामहम्।। (गीता.१०/३६)

एवं क्रमेण द्रव्याणां ग्रहणप्रभृतीनां यद् ग्रहणमस्ति। तेषां ग्रहण गीतायामाधारीकृतैव विद्यते। अतः वैशेषिकदर्शनस्योपजीव्यता सिद्ध्यति।

**१.२.०. न्यायदर्शनस्योपजव्यता गीता-**

अत्र न्यायदर्शने गौतममुनिना 'दुःखजन्मपवृत्तिदोषमिथ्याज्ञानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः' इति अपवर्गस्योपायकथनावसरे[३] प्रमाण-प्रमेयप्रभृतीनां षोडशपदार्थानां ज्ञानेनैव मुक्तिरिति अभिहितम्।

**१.२.१. प्रमाणम्-**

प्रत्यक्षानुमानोपमानशब्दाख्यानां चतुर्णां प्रमाणानामाधारः गीतऽस्ति इति न संशयः। अर्जुनस्य यथार्थज्ञानमुत्पादयितुं भगवता श्रीकृष्णेन विविधैः दऋष्टान्तैः यद् प्रमाणमुपस्थापितं तदेव तेषामाधारत्वस्य प्रमाणम्।

**१.२.२. प्रमेयः-**

आत्मशरीरीन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रत्यभावफलदुःखापवर्गाः द्वादशप्रमेयाः। गीतामाधारीकृत्यैव उतेवाम् उपस्थापनं गौतमेन कृतमिति निम्नोक्तदिशा विश्लेषणेन प्रतिपाद्यते।

यथा-

**शरीर**:- शरीरविषये गीतायामुक्तं यथा-

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिधीरस्तत्र न मुह्यति।।[४]

अत्र देहशब्दः शरीरपर्यायवाचकोऽस्ति। शरीराणि जायन्ते वर्द्धते लीयन्ते चेत्यादयः अवस्थाभेदेन परिज्ञायन्ते। अन्तवन्तः इमे देहा..(२/१८) पदेन शरीराणि नाशशीलानि सन्ति। एतदाय न्यायदर्शने शरीरलक्षणं क्रियते तावत् - भोगायतनमन्त्यावयवि शरीरम्[५]

**आत्मा-** यदात्मा न्यायदर्शने प्रमेयत्वेन स्वीकृतः तस्य धर्मवर्णनायां गीतायामुच्यते। तथाहि-

नजायते म्रियते कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।[६]

अत्र शरीरपदेन अत्मनः बोधः। यद् न जायते , नवर्तते, नाम्रियते वा । परन्तु शरीरे तानि दृश्यते।।थः आत्मा जन्मरहितं, नित्यम्,शाश्वतम्, पुराणं, (अनादिः) च भवेत्। एवंरुपेण बहवः श्लोकाः अत्र गीतायां प्राप्यन्ते।

एतद् सर्वमादाय न्यायशास्त्रे आत्मनः लक्षणं क्रियते तावत्- "आत्मतत्त्वसामान्यवान् आत्मा। स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो नित्यो विभूश्च"[७]।

इन्द्रियम्- न्यायदर्शने घ्राण-रसन-चक्षु-त्वक-श्रोत-मनांसि इति षड् इन्द्रियाणि तेषाइ विषयाश्च वर्णिताः। तेषा माधारोऽपि गीतायां प्राप्यते। सर्वेषां प्रमेयप्रभृतीनां वर्णनं गीतायां प्राप्यते। अतः वैशेषिकदर्शनस्यापि आधारत्वेन गीता स्वीक्रियते।

**१.३.०. सांख्यदर्शनस्योपजीव्यता-**

भारतीयपरम्परायां कपिलमुनिविरचितस्य सांख्यदर्शनस्य महत्वां सर्वविदितमस्ति। तत्र गृहीतेषु पञ्चविंशतिपदार्थेषु प्रकृतिपुरुषयोर्भेदज्ञानमेव तत्त्वज्ञानं, तस्माद्धि मुक्तिः। प्रकृतिः जडपदार्थः। पुरुषः चेतनपदार्थः सच्चिदानन्दस्वरूपः। तस्मादुच्यते-

प्रकृतिं पुरुष चैव विद्यनादी उभावपि।
विकाराश्च गुणाश्चैव विद्धिः प्रकृतिसम्भवान्।।[८]
कार्यकरणकत्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरिच्यते।।[९]

अत्र आकाशः, वायुः, अग्निः, जलम्, पृथिवी, शब्द, स्पर्शः, रूपः, रसः, गन्धश्चेति दश कार्यम्। कर्ण-त्वक्- नेत्र-रसना-घ्राणं चेति अन्तः करणं वाक्, पाणि, पायुः, उपस्थश्चेति बहिकरणत्वेन एतानि एकूपाणि सन्ति। अपि च मन, बुद्धिः, अहङ्कारः चेति कारणं स्वीकृत्य करणत्रयं यद् नीतायां वर्णितं तत्सर्वं सांख्यदर्शने गृहीतम्।

अपि च सांख्यकारिकायां सत्त्वरजस्तमसां स्वरूपविषये प्रत्यप्रीतिविषादात्मकाः "प्रकाशप्रवृत्तिनियमार्थाः अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" [१०] इति यदुक्तं

तत्सर्वमेव गीतायामादौ उक्तम्। तथाहि-

तत्र सतत्वं निर्मलत्वात् प्रकाशकमनानयन्।
सुखसङ्गेन वध्नाति ज्ञानसङ्गेन चानघ।।[११]

'रजो रागात्मकं विद्धि' (१४/७) तमस्त्वज्ञम्जं विद्धि (१४/८) इत्यादिरूपेण गुणत्रयाणां स्वरूपं प्रोक्तम्।

इत्थमेव सांख्यकारिकाया: सर्वाणि तत्त्वानि गीताया: आगतानि इति कृत्वा गीताया: सांख्यदर्शनोपजीव्यत्वं सिद्ध्यति।

**१.४.०. योगदर्शनस्योपजीव्यता-**

महर्षिपतञ्जलिना 'चित्तवृत्तिनिरोध: योग:' [१२] इति योगदर्शने प्रोक्तं योगलक्षणम्। तत: षाड्विंशतिपदार्थानां तत्त्वज्ञाननैव मुक्ति: इति विचार: प्रकटित:। सांख्यदर्शनगृहीतै: पञ्चविंशतिपदार्थै: साकम् ईश्वरं समीप्य षाड्विंसतिपदार्था:। अत: मनस: निग्रह:, ईश्वरस्वरूपविषये योगदर्शनं यादशं वर्णनं प्राप्यते। तत्सर्वमेव गीतात: गृहीतमिति विचारे न हानि:।

ईश्वरविषये सांख्यदर्शने उच्यते यथा- "क्लेश-कर्म-विपाका-शयैरपरामृष्ट: पुरुषविशेष: ईश्वर:"[१३]।

गीतायाम् ईश्वरशब्द: वहुवार: उच्चारित:। गीतायां यथा-

कर्मण: सुकृतस्याहु: सात्त्विकं निर्मल फलम्।
रजसस्तु फलं दु:खज्ञानं तमस: फलम्।।(१४/१६)

पुनश्च- शरद्रं यदवाप्नोति यज्जाप्युत्क्रामतीश्वर:।।(१५/८)

एतेषां प्रयुक्तानां श्लोकानां मध्ये स्थितस्य ईश्वरशब्द: तदर्थवाचक:। योगदर्शने मनस: निग्रविषये यथा गुरुत्वं वर्तते। गीतायामपि तथा प्राप्यते। यथा-

चञ्चलं हि मन: कृष्ण: प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।
असंशयं महावाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।[१४]

वैराग्यपूर्वकम् अर्थात् निरासक्तपूर्वकं यदि अभ्यास: क्रियते चेत् मनस: निग्रह: सम्पद्यते। अत: योगदर्शने उच्यते यथा-

"अभ्यासवैराग्याभ्यां तन्निरोध:"[१५]।

एवमपि "यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टी अङ्गानि" [१६] इति वर्णितानि अष्टाङ्गिकमार्गा: अपि गीतायां [१७] प्राप्यते। एतत्सर्वमाकल्य योगदर्शनमपि गीताया: उपजीव्यत्वं भजते।

**१.५.०. मीमांसादर्शनस्योपजीव्यता-**

महर्षिजैमिनः मीमांसादर्शने 'कर्मैव ब्रह्म' इति उक्तवान्। अत्र कर्मपदेन यागयज्ञादिकर्मानुष्ठनस्य बोधः। यथा - एकः कविः साम्नीं (उपकरणम्) विना काव्यं लिखितुं समर्थो न भवति। तथैव मुक्तिकामिना पुरुषेण निष्कामकर्मानुष्ठानं करणीयम्। यद् एव यज्ञपदे नाभिधीयते।गीतायामपि कथ्यते। यथा हि-

गतसङ्गस्य मुक्तस्य ज्ञानवस्थितचेतसः।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते।।(गी.४/२३)

अर्थात् निःश्वार्थपरेण परहितार्थं कृतं कर्म नाम 'यज्ञ' इति प्रोच्यते। अपि चोच्यते गीतायाम्-

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानमयज्ञाश्च यतयः संशितव्रताः।।(गी.४/२८)

तत्र द्रव्ययज्ञः, तपोयज्ञः, ज्ञानयज्ञः, चेति संशितव्रतपदेन अवबोध्यते। अत्र प्रसङ्गे चतुर्थाध्यायस्य २४तः ३० श्लोकमध्ये १२ यज्ञाः प्रोक्ताः यथा-

| | |
|---|---|
| १. ब्रह्मयज्ञः | ७. द्रव्ययज्ञः |
| २. भगवदर्पणरपकः यज्ञः | ८. तपोयज्ञः |
| ३. शभिन्नतारूपकः यज्ञः | ९. योगयज्ञः |
| ४.संयमरूपकः यज्ञः | १०. स्वाध्यायरूपक यज्ञः |
| ५. विषयहवनरूपकः यज्ञः | ११. प्राणायामरूपकः यज्ञः |
| ६. समाधिरूपकं यज्ञः | १२. स्तम्भवृत्तिप्राणायामरूपकः यज्ञः |

अस्मात् विश्लेषणाज्ज्ञायते- मीमांसादर्शनस्य तत्वानि गीतायाः एव प्राप्यन्ते। तस्मात् दर्शनस्यास्योपजीव्यता गीता इति प्रामाण्यते।

**१.३.०. वेदान्तदर्शनस्योपजीव्यता-**

वेदान्तदर्शने व्यासदेवेन चिदचिद्भेदेन द्वौ पदार्थौ स्वीकृतौ। ब्रह्मैव चित्, तदातिरिक्ता ये ये पदार्थाः जडभूताः सन्ति। तत्र ईश्वरेण साकं योग एव मुक्तिः सा सायुज्यमुक्तिरिति उच्यते। यत्र मायात्नकेनाविद्यात्मकेन वा उपाधिना रहितः सन् केवलं परब्रह्मस्वरूपेणैवावस्थीयते। तामेव मुक्तिं कैवल्यमुक्तिरिति वदन्ति। ब्रह्म सत्यं जगन्मिथ्या इति तेषां सिद्धान्तः। माया नाम अज्ञानमेव जगत्कारणमस्ति। यअथ राजौ सर्प प्रतीतिवत्। मायापरसरितौ रज्जुज्ञानं यथअ जायते। तथैव मायापसरितौ जगत्- ज्ञान भावे सर्वमेव ब्रह्म एच्यते। एते सिद्धान्ताः गीता गृहीता ंति निम्नोक्तवचनप्रमाणामुत्पत्तिप्रसङ्गे भगवता उच्यते तथा-

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।।(गी.७/६)

अर्थात् परा-अपरा -प्रकृत्योः संयोगैव जगदुत्पत्तेः कारणं स्यात्. जगतः प्रतीतिः, प्रलयादिकश्च, तत्सर्वनेव वासुदेवसर्वमिति (७/१९)विचारवद् भवेत्। वेदान्तदर्शने वर्णितं

शमदमादिषट्सम्पत्तिविषयोऽपि गीताया: गृहीत:। निम्नोक्तश्लोकविश्लेषणेन तज्ज्ञायते।

तथाहि- सङ्कल्पप्रभावान् कामांस्त्यक्त्वा सर्वानशेषत:।
मनसैवेन्द्रियग्रामं विनियम्य समन्तत:।।(६/२४)

अत्र मनस: साहाय्येन इन्द्रियाणां निग्रह: कर्तव्यमिति यदुक्तम्... तदेव दमरूपेण गृहीतम्- "ब्राह्योन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्"।[१८]

अपि च- शनै: शनैरूपरमेद्बुद्ध्या धृतिगृहीतया।
अत्मसंस्थं मन: कृत्वा न किञ्चिदपि चिन्तयेत्।।(६/२५)

अत्र श्लोके संसारात् निगृहीतस्य मनस: परमात्मनि स्थापनं यदुक्तम्। तदेव वेदान्ते उपरिति पदेन गृहीतं दृश्यते। यथा - "निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणुमुपरिति: अथवा विहितानां कर्मणां विधिना परित्याग: उपरिति: इत्युव्यते"।[१९]

एवमेव सर्वाणि उपादानानि यानि यानि वेदान्तदर्शने स्वीकृतानि। तानि सर्वाणि श्रीमद्भगवद्गीतत: अगतानि इति विचार: फलित:।

**समीक्षा-**

सर्वोपनिषद्गाव: दोग्धा गोपालनन्दन: इत्यादि वचनानुसारे सर्वेषाम् उपनिषदां मूलभूता गीता यदि स्यत् । उपनिषदादि वचनगृहीतानं नाम आस्तिकदशीनानां आधार: श्रीमद्भगवद्गीता भवेत्। गीता दर्शनानां तत्र सर्वेषां दर्शनानां तत्वानिप्राप्यते। तावत् प्रमाणमत्र शोधप्रवन्धे सोदाहरणमालोचितम्। अत एव गीताया: सर्वदर्शनोपजीव्यत्वमनेन साधीयते इति दिक्।

---

**सन्दर्भा:**

१.महाभारतम्,आश्व.१६/१२-१३ २. गीता१०/३९
३. प्रमाण -प्रमेय- संशय- प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति -निग्रहस्थानरूपा- न्यायदर्शनम्।
४.गीता२/१३ ५. तर्कभाषा प्रमेयनिरूपणम्।
६. गीता- २/२० ७. तर्कभाषा प्रमेयनिरूपणम्।
८. गीता१३/१९ ९. गीता १३/२०
१०. सांख्यकारिका श्लो.१२ ११. गीता-१४/०६
१२. योगदर्शनम्। १३.योगदर्शनम्।
१४. गीता ६/३४-३५ १५. योगदर्शनम्।
१६. योगदर्शनम्। १७. गीता ४/२९-३०
१८. वेदान्तसार:। १९. वेदान्तसार:।

*सहायकाचार्य:, संस्कृतविभाग:,*
*रेभेन्साविश्वविद्यालय:, कटकम्*

# आनन्दवर्धनसूक्तिसारसौरभम्

डॉ. मेधाकुमारी

सूक्तिः नाम कविता । वाग्विदग्धताद्योतिका सा । संस्कृतप्राकृतनिबद्धा सा ध्वन्यालोकं समलङ्करोति । प्राकृतभाषायां निबद्धसुकविकवितां प्रशंसन् प्राह आनन्दमूर्त्तिः। यथा -

१. ण अ ताण घडइ ण अ ते दीसन्ति कह वि पुनरुत्ता ।
जे विब्भमा पिआनं अत्थावा सुकइवाणीणम् ।। ४.७। इति।

तस्य संस्कृतच्छाया यथा -

न च तेषां घटतेऽवधिः, न च ते दृश्यन्ते कथमपि पुनरुक्ताः ।
ये बिभ्रमाः प्रियाणामर्था वा सुकविवाणीनाम् ।। इति ।

व्यङ्ग्यार्थः लावण्यमिव, लज्जा इव, विभ्रम इव इति विवेकः अत्र ।

२. ताला जाअन्ति गुणा जाला दे सहिअएहिं घेप्पन्ति।
रइकिरणानुग्गहिआइँ होन्ति कमलाइँ कमलाइँ ।। २.१। इति ।
तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि।। इति अत्र संस्कृत च्छाया।

अत्र द्वितीयः कमलशब्दः सौन्दर्यादिरूपे लक्ष्यार्थे सौन्दर्यातिशयरूपे व्यङ्ग्यार्थे च वर्त्तते।

३. मह मह इति भणन्त उ वज्जति कालो जणस्स ।
तोई ण देउ जणद्दण गोअरी भोदि मणसो ।। ४.७।इति।

अस्य संस्कृतच्छाया यथा -

मम मम इति भणतो व्रजति कालो जनस्य ।
तथापि न देवो जनार्दनो गोचरो भवति मनसः । इति।४.७।

अत्र जगन्नाथ जगन्नाथ इति जपतः भक्तस्य जगन्नाथदर्शनं न भवति इति विरोधः ।

४. जगन्नाथः धरां दधार। किन्तु रुक्मिणीविरहे मृणालाभरणम् अपि भारसदृशं तस्य बभूव इति मनसि निधाय पद्यं रचयामास सहृदयशेखरः -

लीलादंष्ट्राग्रोद्धृतसकलमहीमण्डलस्यैवाद्य ।
कस्मान्मृणालाभरणमपि तव गुरु भवत्यङ्गे ।।३.१५। इति।

अस्य प्राकृतं यथा -

लीलादाढासुध्युड्डासअलमहिमण्डलसश्चिअ अज्ज ।
कीस्मसुणालाहर तुज्जआइ अङ्गम्मि ।। इति।

अत्र रुक्मिणीविरहे रुक्मिणीं प्रति जगन्नाथस्य अभिलाषरूपोऽभिप्राय: संलक्ष्यक्रमरूपव्यङ्ग्य: विप्रलम्भशृङ्गाररूपम् असंलक्ष्यक्रमव्यङ्ग्यं व्यनक्ति ।

५. यौवनस्य कामोपासकत्वं प्रसिद्धम् । तस्य पर्यवसानं शृङ्गाररसरूपम् असंलक्ष्यक्रमध्वनिं प्रति भवति इत्याह रसिकशिरोमणि: -

हुम्मि अवहत्थिअरे होणिरङ्कुसो अह विवेअरहिओवि ।
सिविणेवि तुमम्मि पुणो भन्तिं ण पसुमरामि ।।३.१५।इति।
भवाम्यपहस्तितरेखो निरङ्कुशोऽथ विवेकरहितोऽपि।
स्वप्नेऽपि तव पुनर्भक्तिं न प्रस्मरामि ।। इति अत्र संस्कृत च्छाया ।

६. तँ ताण सिरिसहोअररअणाहरणम्मि हिअअमक्करसम्।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेन ।।२.२७।इति।

अस्य संस्कृतं यथा -

तत्तेषां श्रीसहोदररत्नाहरणे हृदयमेकरसम्।
बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ।। इति।

अत्र कुसुमबाण: किं कृतवान्, कौस्तुभमणिहरणे तत्पराणाम् असुराणां मन: प्रियां प्रति आकृष्टवान् इति अतिशयोक्ति अलङ्कार: वाच्यतां गच्छति । प्रिया अधरविम्बं कौस्तुभमणि: इव इति उपमालङ्कार: तेन वाच्येन व्यज्यते। मम्मटाचार्य: अत्र पर्यायनामकम् अलङ्कारं वदति ।

७. श्लाघ्याशेषतनुं सुदर्शनकर: सर्वाङ्गलीलाजित -

त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरि:।
बिभ्राणां मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दधत्
स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात् ।। २.२१।इति।

अत्र व्यतिरेकच्छाया-अनुग्राही श्लेष: वाच्यतया एव प्रतीयते।

८. सर्वैकशरणमक्षयमधीशमीशं धियां हरिं कृष्णम् ।
चतुरात्मानं निष्क्रियमरिमथनं नमत चक्रधरम् ।। २.२१। इति।

अत्र हरिं कृष्णम् इत्यादौ विरोध: । य: हरित: वर्ण: स: कथं कृष्णवर्ण: इति विरोध:।

कृष्णः जगन्नाथ इत्यर्थे विरोधपरिहारः । शरणम् अक्षयं कथम् इति विरोधः। अक्षयं नाशरहितम् इति परिहारः। अधीशं कथं धीयाम् ईशम् इति विरोधः। अधीशम् अधिपतिमिति परिहारः। यः चतुरः स कथं निष्क्रियः इति विरोधः। चतुरः चतुर्मूर्त्तिरिति परिहारः। अरि (चक्रम्) मथनं कथं चक्रधरम् इति विरोधः। अरीणां शत्रूणाम् मथनम् इति परिहारः।

९. खं येत्युज्ज्वलयन्ति लूनतमसो ये वा नखोद्भासिनो
ये पुष्णन्ति सरोरुहश्रियमपि क्षिप्ताब्जभासश्च ये।
ये मूर्धस्ववभासिनः क्षितिभृतां ये चामराणां शिरां -
स्याक्रामन्त्युभयेऽपि ते दिनपतेः पादाः श्रिये सन्तु वः।।२.२१। इति।

अत्र दिनपतेः पादाः अर्थद्वययोगिनः किरणाः चरणाश्चेति । चरणाः शरीरधारिणः भवन्ति। चरणरूपपादेभ्यः किरणरूपपादानाम् आधिक्यं ध्वन्यते इति शब्दशक्तिमूलव्यतिरेक-व्यङ्ग्यध्वनिः।

१०. या व्यापारवती रसान् रसयितुं काचित् कवीनां नवा
दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती।
ते द्वे अप्यवलम्ब्य विश्वमनिशं निर्वर्णयन्तो वयं
श्रान्ता नैव च लब्धमब्धिशयन त्वद्भक्तितुल्यं सुखम्।।३.४३। इति।

अत्र विरोधालङ्कारस्य अर्थान्तरसङ्क्रमितवाच्यस्य च संकीर्णत्वम्।

गवादिवस्तुजातस्य निर्वर्णनम् अर्थात् दर्शनं चर्मचक्षुषा संभवति न तु प्रतिभया न वा पाण्डित्येन इति विरोधः, निर्वर्णनपदस्य सामान्यज्ञानरूपचाक्षुषज्ञानपरत्वे परिहार इति विरोधाभासोऽलङ्कारः। ज्ञानविशेषलक्षणे अर्थान्तरे सङ्क्रमणात् अर्थान्तरसंक्रमितवाच्यध्वनिरिति।

११. लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्
स्मेरेऽधुना तव मुखे तरलायताक्षि ।
क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव जलराशिरयं पयोधिः।।२.२७। इति।

अत्र जलस्य राशिः, जाड्यस्य राशिः इति अर्थद्वययोगी श्लेषः। पयोधेः जाड्यत्वेन संभावनात् उत्प्रेक्षा। तरुणीमुखे पूर्णिमाचन्द्रस्य आरोपरूपः रूपकालङ्कारः प्राधान्येन ध्वन्यते इति रूपकध्वनिः।

१२. अमी ये दृश्यन्ते ननु सुभगरूपाः सफलता
भवत्येषां यस्य क्षणमुपगतानां विषयताम् ।

निरालोके लोके कथमिदमहो चक्षुरधुना
समं जातं सर्वैर्न सममथवान्यैरवयवैः।।३.४१। इति।

अत्र अप्रस्तुतेन चक्षुषः रूपेण वाच्येन प्रस्तुतः कश्चित् महापुरुषः सूच्यते इति अप्रस्तुतप्रशंसायां वाच्यस्य विवक्षिततत्वम्।

एतेषु उदाहरणेषु आचार्यस्य आनन्दवर्धनस्य ध्वनिविषयकज्ञानं भक्तिविषयकज्ञानं च उन्मीलितम् अस्ति। भक्तितुल्यं सुखं नास्ति इति आनन्दस्य डिण्डिमघोषः। ध्वनिज्ञानतुल्यं सुखं नास्ति इति तु मादृशाः। भक्तिमन्तः यथा अमृताः भवन्ति तथैव ध्वनिमन्तः इति दर्शनात्।

---

**सहायकग्रन्थः -**

आनन्दवर्द्धनः, ध्वन्यालोकः, चौखम्बाविद्याभवनम्, वारणासी, संस्करणम् ११श, २०११।

—०—

*सहाचार्या, संस्कृतविभागः*
*सामसीकलेज, सामसी*
*मालदा, पश्चिमवङ्गः*

## स्मृतिवाङ्मये नैतिकशिक्षा

**डॉ. प्रियदर्शिनी मेकाप**

शिक्षा मानवसमाजस्य अभिन्नमङ्गं वर्त्तते । एतस्मात्कारणात् मानवनिर्माणस्यापि प्रमुखा घटिका विद्यते। शिक्षां विना किमपि गौरवपूर्णं स्थानं न प्राप्तुमर्हति। येन प्रकारेण शारीरिकविकासाय भोजनस्यावश्यकता भवति, तेनैव प्रकारेण चारित्रिकाध्यात्मिक-नैतिकविकासाय स्मृतिवाङ्मयस्य आवश्यकता भवति। आदर्शमानवानां निर्माणम्। आदर्शसमाजस्य स्थापना च शिक्षाद्वारा भवेत्। यथोक्तं सर्वपल्ली डॉ. राधाकृष्णमहाभागेन - "Education should be man making and society making" अर्थात् शिक्षा तादृशी स्यात् यथा आदर्शमानवस्य समाजस्य च निर्माणं स्यात्।

स्मृतिवाङ्मये प्रथमं संविधानं मनुस्मृतिः । अस्मिन् ग्रन्थे मानवजीवनस्य सम्बद्धानां सर्वेषामपि व्यवहाराणां वर्णनं विहितमस्ति।

"देशधर्मान् जातिधर्मान् कुलधर्माश्च शाश्वतात्
पाषाण्डगणधर्माश्च शास्त्रेस्मिन्नुक्तवान्मनुः।।" (म.स्मृ.२/११८) इति ।

वेदानामनन्तरं स्मृतीनां प्रामाण्यं स्वीक्रियते। यतः समयस्य परिवर्तनानुसारं सर्वस्य परिवर्तनत्वात् क्रमशः स्मृतिह्रासात् स्मृतीनां रचना सञ्जाता। कारणं वेदस्य चानेकशाखाभिरनेकवर्त्मतया ततो नैव सर्वेषां जनानां यथावद् ज्ञानं सुकरमिति वेदविद्भिः वेदानुगततत्तदर्थाभिधायकस्मृतय उपनिवद्धाः। तदुक्तम् -

"स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।
तामेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकाशिताः।।" इति ।

स्मृतिः भवति धर्मशास्त्रम्। मनुस्मृतेः पुनरुत्थानं गुप्तवंशीयमहाराजस्य समुद्रगुप्तस्य समये जातम्। भारतीयेतिहासात् प्रमाणितं भवति यत् ख्रीष्टीयपूर्वचतुर्थशताब्द्यां मौर्यवंशीय- महाराजचन्द्रगुप्तात्पूर्वं मगधस्य चन्द्रवंशीयराजानः स्वधर्मरक्षापूर्वकं राजत्वमकुर्वन्। तस्मिन् समये भारतस्य मुख्यसम्बिधानरूपेण मनुस्मृतिः गृहीता। मनुस्मृतिः मानवधर्मशास्त्रं मनुसंहिता च नाम्नाभिः प्रसिद्धिं लब्धा। धर्मशास्त्रे सदाचारः अन्तर्भुक्तः। शिक्षायाः सर्वेष्वपि लक्ष्येषु चरित्रं प्रधानलक्ष्यत्वेन अङ्गीक्रियते। आचारस्य धर्मत्वमपि तस्य प्राधान्ये भवति प्रमुखो हेतुः । यथोक्तं मनुना -

"आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।
तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः।।" (म.स्मु.१/१०८) इति।

अतः जीवने सदाचारस्य पालनमवश्यमेव करणीयम्। यतोहि सदाचारस्य अभावे मनुष्यः पशुतुल्यः भवति। आचारयुक्तः एव समग्रफलभागिति स्पष्टीभवति। नीतिशिक्षया विहीनो मानवः तदीयस्य यौवनस्य, सम्पदां, विवेकस्य चापि दुरुपयोगमेव सम्पादयेत्।

अस्माकं मनीषिण: चरित्रस्य परिभाषणे अवधारणे च ऐकमत्यमादद्यु:। वस्तुत: सच्चारित्र्ये शीलस्य नैतिकतायां च विद्यमानाया: भावनाया: इदमेव निहितत्वं यद् मानव: स्वीयं सुखं विहाय अपरस्मै सुखं प्रदद्यात्।

आचार्यो मनु: चरित्रशिक्षाया: प्रबल: पक्षधर:। मनुना उक्तम् -

"एतद्देशप्रसूतस्य सकाशादग्रजन्मन:।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवा:।।" (म.स्मृ.२/२०) इति।

व्यक्तित्वविकासे, सामाजिकविकासे च धर्मस्य महत्त्वपूर्णं योगदानम्। धर्मो व्यक्तित्वे नियन्त्रणं विदधाति। धर्मश्च समाजं न त्यजेत् न च समाजो धर्मम्। समाजे स्थित्वा वयं धर्मम् अनुतिष्ठाम:। धर्मस्य शिक्षा आवश्यकी। समाजे अर्थशास्त्रम्, समाजशास्त्रम्, राजनीतिशास्त्रम्, गृहविज्ञानं चेति विषयेषु यथा अस्माकं ज्ञानमावश्यकं तथैव धर्मे चापि शिक्षा अपेक्ष्यते।

धर्मशास्त्रे चित्तशुद्धये संस्काराणां महती आवश्यकता प्रतिपादिता। यथा मनुना उक्तम्-

"वैदिकै: कर्मभि: पुण्यैर्निषेकादिर्द्विजन्मनाम्
कार्य: शरीरसंस्कार: पावन: प्रेत्य चेह च।।" (म.स्मु.-२/२६) इति।

संस्कारा: अत्यन्तमहत्त्वपूर्णा: इति मन्यन्ते। धर्मशास्त्रेषु संस्कारस्य महनीयता वर्त्तते। संस्काराणां सामाजिकजीवनेन सह घनिष्ठ: सम्बन्धो वर्त्तते। संस्कारो नाम पवित्रीकरणम्। अस्य संस्कारस्य प्रयोगो भिन्नार्थेषु दृश्यते। मीमांसकमतानुसारं प्रोक्षणादिय-ज्ञाङ्गभूतपुराडाशादेर्विधिवदस्य आशयोऽवबोध्यते। मानव: भवति एक: सामाजिकप्राणी। सामाजिकजीवनाय अपेक्षिता: गुणा: तस्मिन् नूनं तिष्ठन्ति। मानवा: स्वभावतो निर्मल: पावनश्च भवति। परन्तु परिवेशवशात् संसर्गवशात् तस्मीन् बहवो दोषा: जायन्ते। एतेषां समस्तदोषाणां निवारणमपेक्ष्यते। प्राचीन कालीनशिक्षाया: इयमेव विशेषताऽऽसीत् यद् गुरुसेवैव केवलं विद्याप्राप्तेर्मूलमिति मन्त्रं शिष्य: सर्वदाऽवाधारयत्। मनुनाऽपि उक्तं यत्-

"सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्।
सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मन:।।" (मनु.स्मृ.२/१८५) इति।

प्राचीनशिक्षापद्धत्या: आसीत् स्तम्भद्वयम्। प्रथमत: गुरु:, द्वितीयत: शिष्यश्च। गुरु: शिक्षाप्रदाता शिष्यश्च शिक्षाग्रहीता। शिक्षा आसीत् गुरुशिष्ययो: मध्ये प्रचाल्यामाना अन्त:क्रिया प्रक्रिया । **"अस्योदाहरणं कठोपनिषद: शान्तिपाठे कथितमस्ति- ओँ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु। मा विद्विषावहै।"** इति। भारतीय शिक्षापद्धतौ गुरु: विशिष्टं स्थानं भजते। गुरु: सर्वदा शिष्यस्य अज्ञानावरणं दूरीकृत्य ज्ञानरूपप्रकाशेन शिष्यमालोकयति स्म। गुरुशिष्ययो: सम्बन्धो निविड: वर्त्तते। शिष्य: स्वभावतो विनयीदृश्यते ।

केवलं बाह्याचरणेन न, मनसा हृदयेन चापि । मनुना उक्तम् -

"न मांसभक्षणे दोषो न मध्ये न च मैथुने ।

प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ।।" (म.स्मृ.५/५६) इति।

ब्राह्मणादीनां वर्णानां यथाधिकारविहिताप्रतिषिद्धभक्षणादौ न कश्चिदोषः। यस्मात्प्राणिनां भक्षणपानमैथुनादौ प्रवृत्तिः । स्वभाविकोऽयं धर्मः। वर्जनं पुनर्महाफलम्। धार्मिकस्याध्यात्मिक- परायणस्य वा जनस्य कृतेऽऽमिषभक्षणमुचितं निरामिषभक्षणं वोचितमिति विषयमाधारीकृत्य अनेके विचाराः सिद्धान्ताश्च बहुप्राचीनकालादेव प्रचलिताः दृश्यन्ते। अपि तु परस्परविरुद्धसिद्धान्ताः एव तिष्ठन्ति। कैश्चिद्धार्मिकसम्प्रदायैरहिंसाया उपरि आमिषभक्षणं पापपुण्यरूपेण विवेचितम्। अपरैस्तु देवतोद्देश्येन पशुबलिं त्वा प्रसादग्रहणार्थम् उत्साहः प्रदर्शितः । अविहिताप्रतिषिद्धमद्यमैथुननिवृत्तेर्महाफल-कथनार्थोऽयमुक्तस्यैव मांसवर्जनमहाफलकथनस्यानुवादः।

संस्कृतवाङ्मये नीतिनिर्धारकैः शिक्षाविद्भिश्च नीतिशिक्षायाः प्रमुखस्रातोभूतं नूनम् अनुशीलनीयम्। यथा -

- "सा विद्या या विमुक्तये ।"
- "विद्या ददाति विनयम्।"
- "नास्ति विद्यासमं चक्षुः।"
- "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।" इत्यादि ।

एतत् प्रमाणयति यद् अमृतत्वं, मुक्तिः, विनयः, सम्यग्दृष्टिः, शुचिता, शान्तिश्चेति शिक्षाया एव सुफलम्।

इमे सद्गुणाः मनुष्यस्य नैतिकव्यवहारे अन्तर्भवन्ति।

वैदिकयुगे गुरोः गौरवम् आसीत्। अथर्ववेदानुसारम् आचार्यो हि ज्ञानस्यागाधसागरः, यः स्वशिष्यान् गूढान्तर्निहितशक्तीनां ज्ञानं कारयति। आचार्यस्तु समस्तान् संस्कारान् सम्पाद्य शिक्षां ददाति स्म। यथोक्तम् -

"विद्यादानात् परं दानं न भूतं न भविष्यति।
विद्यादानेन दानानि न हि तुल्यानि बुद्धिमान्।।" इति।

---

**सन्दर्भाः**

१. मनुस्मृतिः - चौखम्बाप्रकाशनम् ।
२. धर्मशास्त्रेतिहासः - महामहोपाध्यायः डॉ. पाण्डुरङ्गवामनवाणे, उत्तरप्रदेशहिन्दीसंस्थान, लखनऊ, १९९२।
३. संस्कृतवाङ्मय का इतिहास- पद्मभूषण आचार्य श्रीगजाननशास्त्री, मुललगंवकर, उत्तरप्रदेश संस्कृतसंस्थानम्, लखनऊ -१९९९ई।

—०—

**संम्विदाध्यापिका**
**राष्ट्रियसंस्कृतसंस्थानम्, एकलव्यपरिसर, अगरतला (त्रिपुरा)।**

# ध्वन्यालोकस्य अनुप्राणकता

**डॉ.शिवप्रसादवेहेरा**

महात्मानन्दवर्धनप्रणीतध्वन्यालोक: यथा भरतभामहवामनरुद्रटोद्भटप्रभावित: तथा गीतामहाभाष्यपतञ्जलिप्रभृतिभि:। वेदान्तेषु जगदात्मा ब्रह्मतया चर्चित: एवं ध्वन्यालोके ध्वनि: काव्यात्मतया दर्शित: । अत्र महाभाष्यगीताप्रभावो दृश्यते। आत्मा जगत: शरीरं सारश्च । एवं ध्वनि: काव्यस्य शरीरं सारश्च। दर्शनेषु आत्मा लावण्यप्रख्य: । तथैव ध्वनि: लावण्यप्रख्य: । आत्मा योगिनां प्रिय:, ध्वनिस्तु सुहृदां प्रिय:। पक्षद्वयवान् यथा पक्षी तथैव शब्दार्थद्वयवत् काव्यम् । तस्य आत्मा ध्वनिरिति वदन्ति आचार्यप्रवरा:।

१. आत्मसेवक: तत्त्वदर्शिपदेन उक्त: गीतायाम्। इत्थं ध्वनिसाधु: तत्त्वदर्शिपदेन ध्वन्यालोके। यथा -

**"नासतो विद्यते भावो नाभावो विद्यते सत:।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभि:।।" गीता २.६। इति।**

तत्त्वदर्शिभि: जगदात्मदर्शिभि: इत्यर्थ:। बुधै: काव्यतत्त्वविद्भि: काव्यस्यात्मा ध्वनिरिति संज्ञित:। ध्व.१.१।

२. योगी ब्रह्मविषये न क्वचित् विमुह्यति, एवं कवि: ध्वनिविषये। यथा -

"एषा ब्राह्मी स्थिति: पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्त:कालेऽपि ब्रह्मनिर्वाणमृच्छति।।" (गीता २.७२)। इति।

"विज्ञायेत्थं रसादीनामविरोधविरोधयो:।
विषयं सुकवि: काव्यं कुर्वन् मुह्यति न क्वचित्।।" (ध्वन्यालोक: - ३.३१)।।

३. वासुदेव: सर्वं सर्वात्मा यथा ध्वनि: सर्वं सर्वात्मा तथा ।यदुक्तम् -

"मत्त: परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।।" (गीता ७.७)। इति ।

अत्र ब्रह्म जगत: शरीररूपेण आत्मरूपेण च उक्तम्। एवं ध्वन्यालोकेऽपि - ध्वनिरेव काव्यम् इति (३.४३)। नास्त्येव ध्वनिव्यतिरिक्त: काव्यप्रकार: इति च तत्रैव उक्तम्। अर्थात् ध्वने: काव्यत्वं शरीरत्वम् आत्मत्वं सारत्वं चोक्तम्।

४. परधनहारी न कुवेर: भवितुमर्हति। तदुक्तं पातञ्जलयोगशास्त्रे -

"अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानमिति" ।(२.३७)।

ध्वनिकारमते तु सन्ति नवार्थाः । परार्थग्राहिणः चौराः भवन्ति इत्याहः ध्वनिकारः -

"परास्वादनेच्छाविरतमनसो वस्तु सुकवेः।
सरस्वत्यैषा घटयति यथेष्टं भगवती।।" (ध्वन्यालोकः ४.१७)।

परार्थग्रहणे कवयः सन्ति -

"साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः।
यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति।।
गृह्णन्तु सर्वे यदि वा यथेच्छं नास्ति क्षतिः कापि कवीश्वराणाम्।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः।।" (अलङ्कारसर्वस्वम्११८)

५. प्रतिपदपाठेन यथा न शब्दज्ञानं तथा न अलङ्कारज्ञानम् इत्याह ।

"अथैतस्मिन् शब्दोपदेशे कर्त्तव्ये सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः, गौरश्वः पुरुषो हस्ती शकुनिः मृगो ब्राह्मण: इति एवमादयः शब्दाः पठितव्याः ? न इत्याह। अनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्च अध्योता, दिव्यं वर्षसहस्रम् अध्ययनकालो न चान्तं जगाम। किं पुनरद्यत्वे यः सर्वथा चिरं जीवति स वर्षशतं जीवति" इति महाभाष्यम्। ध्वन्यालोकोऽपि आह -

एकैकस्य स्वरूपविशेषकथनेन तु सामान्यलक्षणरहितेन प्रतिपदपाठेन इव शब्दा न शक्यन्ते तत्त्वतो निर्ज्ञातुम्। आनन्त्यात्। अनन्ता हि वाग्विकल्पास्तत्प्रकाशः एव चालङ्कारः इति। (३.३७)।

६. गीता ब्रह्मसंस्पर्शिनः योगिनः इत्थं श्लाघते -

"युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।।" ६.२८। इति।

ध्वन्यालोकः तु व्यङ्ग्यांशसंस्पर्शिनः अलङ्कारान् निर्दिशति -

"व्यङ्ग्यांशसंस्पर्शे सति चारुत्वातिशययोगिनो रूपकादयोऽलङ्काराः सर्व एव गुणीभूतव्यङ्ग्यस्य मार्गः" इति। (३.३७)।

७. गीतायां रहस्यपदप्रयोगः कर्मयोगप्रसङ्गे दृश्यते। यथा-

"य एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।।" (४.३)।

ध्वन्यालोके (३.३७) तु व्यङ्ग्यसंस्पर्शं काव्यरहस्यम् उदितम् -

"सर्वथा नास्त्येव सहृदयहृदयहारिणः काव्यस्य सप्रकारो यत्र न प्रतीयमानार्थसंस्पर्श-नसौभाग्यम्। तदिदं काव्यरहस्यं परमिति सूरिभिः विभावनीयम्" इति । (३.३७)

८. गीतामहात्मा यथा योगिनाम् आत्मलाभं वदति तथा ध्वनिमहात्मा सुहृदाम्। तदुक्तम् -
"यं लब्ध्वा चापरं लाभं न मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते।।" इति गीता (६.२२)।

ध्वनेरात्मानम् उपनिबध्नाति सुकविः समाहितचेताः तदा तस्य आत्मलाभो भवति महीयान् इति ध्वन्यालोकः (२.१९)।

चराचरभूतेषु निगूढरमणीयार्थवत् रामायणादिषु ध्वनिः दृश्यते इति रहस्यम् अत्र ।

एतदेव महाकवित्वं महाकवीनाम् इति ओम्। ध्वन्यालोकः (४.१७)

९. ओं पदप्रयोगस्य रहस्यम् - ओम् इति पदं ग्रन्थान्तस्य सूचकम् इति केचित् । मङगलार्थम् इति अन्ये। ब्रह्मवाचकम् इति अपरे -

"ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्।।" इति (गीता८.१३)।

ओंकारजपी हि महात्मा आनन्दवर्धनाचार्यः प्रतीयते। इत्थं ध्वन्यालोकस्योपरि शास्त्राणां प्रभावः दर्शितः संक्षेपेण इति ओम् ।

---

**सहायकग्रन्थसूची -**

१. ध्वन्यालोकः - चौखम्बाविद्याभवनम्, वाराणसी २२१००१, संस्करणम् द्वितीयम् २०११।

२. पातञ्जलयोगसूत्रम् - गीताप्रेस्, गोरखपुरम् संस्करणम्- एकादश, सं२०३५।

३. महाभाष्यम् - मोतिलालवनारसिदास, वारणासी, संस्करणं - तृतीयम्, १९९८।

४. गीता, गीताप्रेस्, गोरखपुरम्, सप्तमं संस्करणम् २०५८।

—०—

**अध्यापकः, संस्कृतविभागः**
**सामसीकलेज, सामसी, मालदा, पश्चिमवङ्गः।**

# व्याकरणवाङ्मये अलङ्कारविवेचनम्

डॉ. हेमन्तकुमारमुदुलिः

रसवादी आचार्यः साहित्यदर्पणकारः श्रीविश्वनाथः स्वस्य प्रथमपरिच्छेदे स्पष्टं सूचयति यत्– 'उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः'[१] इति । अलङ्काराः 'कटके कुण्डलादिवत्' चेति। अतः अस्मादेव प्रतीयते यत् लोके कटककुण्डलादिवदलङ्कारः काव्यस्य उत्कर्षहेतुरिति । तर्हि को नाम अलङ्कारः किं वाऽस्य स्वरूपमिति जिज्ञासायामुच्यते तेन दशमपरिच्छेदे–

शब्दर्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गादिवत् ।।[२] इति ।

अर्थात् अलङ्काराः शब्दार्थयोः अस्थिराः धर्माः, काव्यशोभातिशायिनः । काव्यात्मभूतस्य रसस्य चोपकारकाः भवन्ति । अयमलङ्कारः भेददृष्ट्या त्रिविधः, तद्यथा– १. शब्दालङ्कारः, अर्थालङ्कारः, उभयविधालङ्कारश्चेति । आलङ्कारिकः विश्वनाथः सूचीकटाहन्यायमनुसृत्य सर्वप्रथमं पुनरुक्तवदाभास नामकमुभयविधम् अलङ्कारं निर्णयम् । अन्ते चोपमारुपकादि अलङ्कारं निर्णयति।

असौ आलङ्कारिकः विश्वनाथः सप्तसप्ततिसंख्याकालङ्कारान् वर्णयति [३]। तेषु द्वौ एवालङ्कारौ नवीनौ स्तः । तद्यथा– भाषा समः, अनुकूलश्च अस्यालङ्कारात्मकशेखरस्य स्वतन्त्रं वैशिष्ट्यं भवति । प्रायतः अलङ्काराणामुदाहरणानि स्वकीयानि एव ।

अलङ्कारशब्दस्यार्थः साहित्यशास्त्रे भूषणाऽर्थे च व्यवह्रियते । उक्तं च अमरसिंहेन– 'अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम्[४] । अलङ्कार इति पदस्य चतुर्षु भूषण–पर्याप्ति–भक्ति–वारणरूपे त्वर्थेषु व्यवहारः अस्तीति साम्प्रतिकाः विद्वांसः राधावल्लभादयः कथयन्ति । अमरसिंहेनापि एते चत्वारार्थाः अभिहिताः । तद्यथा– 'अलं–भूषण–पर्याप्ति–शक्ति–वारण–वाचकम्' नाट्यशास्त्रे अलङ्कारगुणो एव भूषणत्वे न कथितौ[५] । तत्र भूषणैव चित्रार्थे तद् भूषणमिति अभिहितम् । अलङ्करोतीति अलङ्कारः । आभूषितं करोतीति अलङ्कारः । अलंक्रियते अनेनेति वा अलङ्कार इति इत्थम् अलङ्करशब्दस्य विग्रहं कुर्वन्ति विद्वांसः । अलं□कृधातोः घञ्–प्रत्यययोगेन

अलङ्कारशब्दः निष्पद्यते । लाटिनभाषायाम् अलङ्कारशब्दस्यार्थः स्वर्णः अस्ति । आभूषितकरणमेव अलङ्कारः । अलङ्कारकाव्यस्य महत्त्वपूर्णमङ्गं भवति । अलंकृतः नाम अलङ्कारः । काव्ये सौन्दर्यस्य विधायकानां सम्पूर्णतत्त्वानां विवेचनशास्त्रमेव अलङ्कारशास्त्रम् । शब्दार्थः सौन्दर्याध्यायकं तत्त्वमलङ्कार भवति अलङ्कारसौन्दर्येन सह चमत्कृतिमपि आदधाति । सा एव चमत्कृति, कुत्रचित् उपमादिरूपेण क्वचिदस्ति योक्त्या, कुत्रचित् वक्रोक्त्या, कुत्रचित् केवलं शब्दभाष्यमूलकेन अनुप्रासेन प्रकाशिता भवति । अलङ्कार नाम सौन्दर्यम् । यथा कटक–कुण्डल–हारादिति अभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति तथैव अनुप्रास–उपमादिभिः अलङ्कारैः कविताकामिनी कुरूपे सत्यपि सौन्दर्यं लभते । अत एव अलङ्कार नाम 'काव्य शोभाकरः धर्मः' भाषायां व्युत्पत्तिविवर्द्धनाय व्याकरणशास्त्रमपेक्षते । तदवत्काव्ये निपुणता प्राप्तये अलङ्कारशास्त्रमपि प्राप्तं भवति । अलङ्कारशास्त्रं विना केवलं काव्ये नैपुण्येन सम्पद्यते। अपितु वाक्यदोषदृष्टिः अपि अपहृता भवति । भारतीयार्यानां प्रथमग्रन्थे ऋग्वेदे आलङ्काराणां समावेशः परिलक्षितुः भवति । तद्यथा– 'स नः पितेव सुनवे' अग्नेसुपायनोभयः स च श्वानः सस्तये[६] । अत्र उपमा अलङ्कार विद्यते । तद्यथा अग्नि उपमेय । पिता = उपमान । अपरञ्च–

प्रतद विष्णुस्तवते वीर्यण मृतो न भीमः कुचरो गरिष्ठा ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।[७]

अत्रापि उपमालङ्कारः विद्यते । अत्र सिंहेन सह विष्णु सादृश्यमस्ति । अपि च कुचर, गरिष्ठा चेति पदद्वये श्लेषस्य प्रयोग अस्ति । अत अत्र श्लेषालङ्कारः भवति । पाणिनिना अष्टाध्याय्यां बहुषु स्थलेषु उपमाप्रयोग कृतः । तद्यथा–१. 'तुल्यार्थै अनुलोपमाभ्यां तृतीयान्यतर स्याम् ।[८] २. 'उपमानानि सामान्यवचनैः'[९], ३. उपमितं व्याघ्रादिभिः सामान्यप्रयोगे'[१०] अलङ्कारशास्त्रस्योपरि व्याकरणशास्त्रस्य व्यापकः प्रभावः अस्ति । तत्र 'श्रौती' 'अर्थी' भेदेन उपमायाः विभागः पाणिनिसूत्रमवलम्ब्य क्रियते । 'तेन तुल्यं क्रिया चेद्वतिः'[११] 'तत्र तस्यैव'[१२] इति सूत्रबलेन प्रत्यय विधीयते । अतः अत्र तद्धितवता उपमा भवति । तटहात् इव पटस्य प्रयोगेण समासगा श्रौती उपमा भवति । तद्यथा इवेन सह नित्यसमास 'विभक्त्यलोपश्च' इति वार्तिकम् । काङ् प्रत्ययस्य विधानेन 'लुलोपमा' उत्पद्यते । तद्यथा– पुत्रवत् आचरति पुत्रायते । तत्र अलङ्कार–शास्त्रस्येतिहासे साहित्यदर्पणस्य कर्तृत्वेन सुविख्यातः विश्वनाथः कविरूपेण नाट्यकाररूपेण च प्रसिद्धिमवाप ।

बहूनां ग्रन्थानामपि रचयिता । तद्यथा– राघवविलास (महाकाव्य) कुवलयाश्व–चरित, प्रभावतीपरिणय (नाटिका), चन्द्रकला नाटिका, प्रशस्ति रत्नावली, नरसिंहविषयं च । कालस्य चतुर्द्दशशतकम् । भूयोऽपि इत्याख्यस्य काव्यप्रकाशटीकाया: अपि रचयिता । काव्यसमालोचनेन क्षेत्रे तदीय साहित्यदर्पण न केवलं रोचक: अपि तु अत्यन्तोपादेय: भवति विदुषामेव ।

---


**सन्दर्भा:**

१. साहित्यदर्पण: – प्रथमपरिच्छेद: ।
२. साहित्यदर्पण: – दशमपरिच्छेद: ।
३. साहित्यदर्पण: – दशमपरिच्छेद: ।
४. अमरकोश: २/०/२१
५. नाट्यशास्त्रम् ।
६. ऋग्वेद, प्रथममण्डल:, १/१/९
७. ऋग्वेद, प्रथममण्डल:, १/१५४/२
८. अष्टाध्यायी २/३/७२
९. अष्टाध्यायी २/१/५५
१०. अष्टाध्यायी २/१/५६
११. अष्टाध्यायी ५/१/११५
१२. अष्टाध्यायी ५/१/११६


—०—


*प्राध्यापक:*
*व्याकरणविभाग:,*
*विजयचान्दसंस्कृतमहाविद्यालय:,*
*समागोल, कुजङ्ग, जगत्सिंहपुर, ओडिशा ।*

# सुदर्शनाचार्य्यकृतश्रीजगन्नाथाष्टोत्तरशतकसमीक्षा

**मितालिमधुच्छन्दा सेनापतिः**

उत्कलीयपण्डितमूर्द्धन्यस्य वाग्मिप्रवरस्य ललितसंस्कृतकाव्यरचनाधुरन्धरस्य सुदर्शनाचार्यस्य अर्वाचीनसंस्कृतसाहित्यं प्रति विपुलं दानं वर्त्तते। सः उत्कलप्रदेशस्य जगत्‌सिंहपुरमण्डलस्य राहामासमीपस्थस्य गरेइशासनान्तर्गते लथाङ्गग्रामे ख्रीष्टीय२४.१२.१९२४ तमे दिनाङ्के अजायत। तस्य पिता चक्रधराचार्य्यः, माता ज्योतिर्मयीदेवी च।

काव्यकृतिः -

पण्डितसुदर्शनाचार्य्यस्य श्रीजगन्नाथाष्टोत्तरशतकम् एकं खण्डकाव्यं भवति। खण्डकाव्यस्य लक्षणम् -

"खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च।"[१] इति ।

महाकाव्यस्य एकं भागं नीत्वा यत् निर्माति तत् खण्डकाव्यं भवति। अस्मिन् काव्ये १०८ श्लोकाः भवन्ति। भगवन्तं जगन्नाथं तत्क्षेत्रं चाधारीकृत्य प्रवर्त्तितानामुत्सवानामुपरि इदं काव्यं लिखितमस्ति। अस्य ग्रन्थस्य प्रकाशिका श्रीमती सचलाकुमारी रायगुरुः। प्रकाशनसमयः १९९० ख्रीष्टाब्दः श्रीगुण्डिचायात्रादिवसः, मुद्राकरः नोवलप्रिण्टर्स, पुरी।

काव्यस्य विषयः -

श्रीजगन्नाथाष्टोत्तरशतककाव्ये अधोलिखिताः विषयाः वर्णिताः। नीलाद्रिविहारिणः श्रीजगन्नाथस्य आराधना। भक्तिमतां दर्शनार्थिनां श्रीक्षेत्रागमनम्। श्रीमन्दिर निर्मातॄणाम् उत्कलीयशिल्पिनां कलानैपुण्यम्। गजपतिवंशसम्भूतराज्ञां कुलपरम्पराक्रमेण महाप्रभोः सेवकत्वग्रहणम्। दारुब्रह्मरूपधारिजगत्पतिजगन्नाथस्य दशावताररूपग्रहणम्। श्रीक्षेत्रस्य माहात्म्यमिति । जगन्नाथस्य मानवप्रीतिप्रदर्शनाय मानवीयदशास्वीकरणम्। पवित्रपुरुषोत्तमधाम्नः सान्निध्यलाभेन साधारणवस्तुनः अनन्यसाधारणता। महाप्रभोः दर्शननिमित्तं कल्पतरोः रूपान्तरग्रहणम्। ज्येष्ठभ्रातुः बलरामस्य भगिन्या सुभद्रया सह एकत्रावस्थानात् जगन्नाथस्य सार्वजनीनसहावस्थानस्य आदर्शोद्घोषणम्। नानामतावलम्बिनां धर्माचार्याणामागमनम्। जगन्नाथसंस्कृतौ स्वसत्तानिमज्जनं चादयः विषयाः वर्णिताः सन्ति।

रसः -

काव्यस्य प्राणभूतपदार्थः रसः। अस्मिन् श्रीजगन्नाथाष्टोत्तरकाव्ये देवादिविषया

रति: भाव:। स एव अङ्गी इति स्वीक्रियते। यत: अत्र भावसाम्राज्यं वर्त्तते। यथा आचार्य शङ्करदेव: "जगन्नाथस्वामी नयनपथगामी भवतु मे" इति वाक्यान्वितं जगन्नाथाष्टकं रचितवान् तथा कवि: सुदर्शनाचार्य: स्वकीये शतककाव्ये चतुर्थपादे "स नीलाद्रिस्थायी विमलसुखदायी भवतु मे"[२] इति भणति। अस्मिन् खण्डकाव्ये सर्वस्मिन् श्लोके जगन्नाथस्य स्तुति: विद्यते। अत: काव्यमिदं भावप्रधानम् अस्ति।

अलङ्कारविवेचनम् -

अस्मिन् जगन्नाथाष्टोत्तरशतककाव्ये शब्दालङ्कारस्य अनुप्रासस्य, अष्टानाम् उपमा-रूपक-विरोधाभास-व्यतिरेक-अतिशयोक्ति - विरोध- प्रभृतीनाम् अलङ्काराणां प्रयोग: दृश्यते। काव्यशोभातिशायिनी भवति। अत्र कानिचन उदाहरणानि काव्यत: प्रस्तूयन्ते।

अनुप्रासालङ्कारस्य लक्षणम् -

[३]"अनुप्रास: शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।" इति।

अर्थात् वर्णानां विषमत्वेऽपि सति यदि व्यञ्जनवर्णानां साम्यं भवेत् तर्हि तत्र अनुप्रासालङ्कार: भवति।

"श्रीजगन्नाथाष्टोत्तरशतकम्" इति काव्ये कवि: सुदर्शनाचार्य: अनुप्रासस्य प्रयोगं करोति। तदर्थं तस्य काव्यं चेत: चमत्कारोति। अत्र तत् समीक्ष्यते। यथा -

"यदीयं पादाब्जं विबुधनिकराभक्तिविनता:<br>
सदा संसेवन्तेऽपरिमितयशोगाननिरता:।<br>
स्वयं देवाराध्यो मदनशमनो यत्स्तुतिपर:<br>
स नीलाद्रिस्थायी विमलसुखदायी भवतु मे।।"[४] इति।

अत्र स्वरवर्णस्य विषमता किन्तु व्यञ्जनवर्णस्य साम्यता दृश्यते। यथा - "व" कारस्य, "स" कारस्य, "न" कारस्य, "त" कारस्य चावृत्ति: असकृत् परिदृश्यते। अत: अनुप्रासालङ्कार:।

उपमालङ्कारस्य लक्षणम् -

"साम्यं वाच्यमवैधर्म्यं वाक्यैक्यमुपमा द्वयो:।।"[५]

अर्थात् यत्र उपमानोपमेययो: सादृश्यं एकस्मिन् वाक्ये प्रतिपादितं भवति, तत्र उपमालङ्कार:। इवादिवाचकशब्दा: साधारणधर्मा: अपि उपमालङ्कारे दृश्यन्ते।

कवि: सुदर्शनाचार्य: तस्य "श्रीजगन्नाथाष्टोत्तरशतकम्" इति काव्ये उपमालङ्कारप्रयोगं करोति यथा -

[६]"यथा पारावारे सकलसरितो लीनवपुष<br>
स्तथा पीठे यस्य प्रचुरमतवादाश्च मिलिता:।

पवित्रं यद्धाम प्रवरसमतामन्त्रकथकम्
स नीलाद्रिस्थायी विमलमतिदायी भवतु मे।। इति।

**रूपकालङ्कारस्य लक्षणम् -**

रूपकं रूपितारोपाद्विषये निरपह्नवे।
"तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा।।"[७] इति।

यत्र उपमानस्य उपमेये आरोपः भवति तत् रूपकं नाम अलङ्कारः।

कविः सुदर्शनाचार्यः तस्य "श्रीजगन्नाथाष्टोत्तरशतकम्" इति काव्ये रूपकालङ्कारस्य प्रयोगं करोति यथा -

"सुदूरादायान्ति प्रबलहृदयावेगचपला
जना नित्यं यस्याम्बुजवदनसन्दर्शनधिया।
कृपाकूपारो यस्त्रिभुवनपरिव्याप्तमहिमा
स नीलाद्रिस्थायी विमलमतिदायी भवतु मे।।"[८] इति।

अस्मिन् श्लोके "अम्बुजवदन" इति पदे रूपकम्। यतः अत्र वदने अम्बूजस्यारोपः । उपमानमम्बुजम्। उपमेयश्च वदनमिति। उपमानम् उपमेयश्च साक्षात् शब्देन उक्तमस्ति।

विरोधाभासालंकारस्य लक्षणम् -

"जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।
क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः।।"[९] इति।

"जतिः" यत्र "जात्या", "गुणेन", क्रियया, द्रव्येण च सह विरुद्धं करोति, यत्र वा गुणः गुणेन क्रियया द्रव्येण च सह तथा यत्र क्रिया, क्रियया द्रव्येण च सह, द्रव्यमपि द्रव्येण सह विरुद्धाचरणं करोति तत्र विरोधाभासालङ्कारः भवति।

कविः स्वकाव्येऽपि विरोधाभासं प्रतिपादयति यथा -

"तथाऽस्वप्नः शेते त्रिगुणरहितः सन्न गुणयुतः
विमुक्तः सन् बन्धादपि कनिनरज्ज्वानियमितः।
वदान्यः सन् भावानयि सपदि गृहणाति भुवि यः
स नीलाद्रिस्थायी विमलगतिदायी भवतु मे।।"[१०] इति।

अत्र भगवतः श्रीजगन्नाथस्य वर्णनाऽस्ति। सः प्रभुः त्रिगुणहीनः अपि अशेषगुणयुक्तः। वन्धबशून्यः अपि परन्तु कविनरज्वा स बन्धनयुक्तः, सः दानी अपि ग्रहणचतुरः इतीत्थं वर्णनात् विरोधाभासः। तत्र शयानः जनः स्वयं पश्यति, अत्र स्वयं न पश्यतीति कथनात् विरोधः। परिहारस्तु भगवान् योगनिद्रां कुरुते अथवा गाढनिद्राम्।

अत: कथं वा स्वप्न: ? तथा सत् - रजो-तमोगुणरहितोऽपि प्रभु: दयाक्षमादिगुणविभूपित: इति कथनात् विरोधाभास:। मायाबन्धनमुक्तोऽपि भक्तानां भक्तिरज्ज्वाऽऽबद्ध: इति कथनात् विरोधपरिहार:, स: दानी भवति इति सत्यं, परं भक्त्या भक्तेन यत् ज्ञायते तत् गृहणाति इति कथनात् विरोधपरिहार:।

व्यतिरेकालङ्कारस्य लक्षणम् -

"आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा।"[११] इति।

**व्यतिरेक: -**

यत्र उपमानात् उपमेयस्य आधिक्यम् अथव न्यूनता वर्ण्यते तत्र व्यतिरेकालङ्कार: भवति। कवि: स्वकाव्ये व्यतिरेकालङ्कारम् उदाहरति यथा -

"यदन्नं भुञ्जाना भुवि जनगणा: पावनतमम्
यथा पूता धन्या अभिनवमहानन्दथुभुज:।
सुधां शश्वद् भुक्त्वा दिवि दिविषदो नैव तु तथा
स नीलाद्रिस्थायी चिरकुशलदायी भवतु मे।।"[१२] इति।

अत्र सुधा भवति उपमानम् अन्नं (महाप्रसाद:) भवति उपमेय:, महाप्रसादस्य उत्कर्ष: अमृतात् अधिक: वर्त्तते इति वर्णनादत्र व्यतिरेकालङ्कार: स्पष्ट: ।

अतिशयोक्त्यलङ्कार: -

कवि: स्वकाव्ये अतिशयोक्त्यलङ्कारविषये वर्णयति यथा -

"श्रिया पूर्णं श्रीमन्दिरमनुपमं राजति चिरम्
समुद्यं गम्भीरं सुरकुलमहाविस्मयकरम्।
स्वं योऽत्र श्रीशो वसति सततं हृष्टमनसा।
स नीलाद्रिस्थायी विमलमतिदायी भवतु मे।।"[१३] इति।

अत्र श्रीमन्दिरस्य अतुलनीयसौन्दर्य्यविषयो भवति उपमेय:, मन्दिरस्य अतिशयवर्णनात् अतिशयोक्ति: मन्दिरमिदं सुरकुलस्य विस्मयकारम्। यद्यपि स्वर्गे स्त्रवो हि विषय: विस्मयोत्पादकोऽस्ति परमत्र मन्दिरमपि तेषु विषयेषु साम्यत्वं जनयतीति कथनात् सोऽयमलङ्कार:।

अर्थापत्ते: अलङ्कारस्य लक्षणम् -

"दण्डापूपिकथान्यायार्थागमोऽर्थापत्तिरिष्यते।"[१४] इति।

यत्र तदारन्यनीत्याभिन्नाऽर्थप्रतीति: भवति तत्र अर्थापत्ति अलङ्कार:।

कवि: स्वकाव्ये अर्थापत्ते: प्रयोगं करोति यथा -

"अवार्य्योऽयं स्वामिन् यदि च फलभोगो भुवि तदा

सुदाम्नो दारिद्र्यं सपदि भवता किं न विहितम्।
प्रदत्तं कृष्णायै वसनममितं किं न सदसि
प्रसादः संखिन्ने वनगजवरे किं न च कृतः।।"[१५] इति।

अत्र श्लोके कविः वर्णयति यदि कर्मफलम् अनिवार्य्यं तर्हि त्वं तव सुहृदः सुदाम्नः दुःखं तत्क्षणात् न हरति किम्? कुरुसभामध्ये कृष्णायै (द्रौपद्यै) कोटिवस्त्रं कथं न दीयते? अपिच मकरकवलात् गजं प्रति कथम् अनुग्रहं न करोति? अतः अस्मिन् श्लोके कर्मफलं यदि अनिवार्यं तथापि भगवत्कृपायोगेन तस्य खण्डनमपि भवेत्। अस्मात् कारणाद् अत्र अर्थापत्ति अलङ्कारः भवति।

एवमेव कविः सुदर्शनाचार्यः श्रीजगन्नाथाष्टोत्तरशतककाव्यं भावपूर्णरीत्या वर्णयति। तस्मिन् विषये अत्र संक्षेपेण उपस्थापितम्। काव्ये एतस्य पठनेन जगन्नाथसंस्वन्तौ अनभिज्ञस्य जनस्य पूर्णं ज्ञानं सुखपूर्वकं भवेदिति वक्तुं शक्यते।

---

**सन्दर्भाः -**

१. साहित्यदर्पणः षष्ठपरिच्छेदः ।
२. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः -१ ।
३. साहित्यदर्पणः- १०.३
४. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः-१ ।
५. साहित्यदर्पणः - १०.१४
६. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः-४।
७. साहित्यदर्पणः- १०.२८
८. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः-१२ ।
९. साहित्यदर्पणः- १०.६७
१०. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः-२६ ।
११. साहित्यदर्पणः- १०.५२ ।
१२. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः-३९।
१३. श्रीजगन्नाथाष्टोत्तरशतकम् -श्लोकः- ४१
१४. साहित्यदर्पणः-१०.८३
१५. श्रीजगन्नाथाष्टोत्तरशतकम् - श्लोकः -८२ ।

—०—

*अध्यापिका, मुकुन्दपात्रस्नातकमहाविद्यालयः,*
*बलरामपुरम्, याजपुरम् ।*

# निर्विवादमिदं वाच्यं रसः काव्यस्य जीवितम्

ड. जितेन्द्रकुमार दाशः

भारतीयसंस्कृतसाहित्य वाङ्मये 9रस" शब्दस्य ब्यवहारः विविधेषु अर्थेषु परिलक्ष्यते। न केवलं साहित्यशास्त्रे 9रस9 पदस्य व्यवहारः अपितु वेदोपनिषदब्राह्मणादिष्विपि 9रस" शब्दस्य व्यवहारोऽस्ति। तत्र हैमकोषे जल-सार-वीर्यादिष्वर्थेषु रसपदस्यप्रयोगः।

रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे।

वोले रोगे गृहे धातौ तिक्तादौ पारदेऽपि च।

"रसेन समगस्महिह्व इति मन्त्रांशे 9रस" शब्दः जलसारस्य वोधकः। "जम्भे रसस्य वावृधेह्व इति मन्त्रे 9रस" पदस्यार्थः गोदुग्धम्। "परिदाय रसं दुहेंह्व इति मन्त्रोंशे 9रस" पदस्य वीर्यार्थे व्यवहारः। "मध्वो रसो सुगमस्तिह्व इत्यत्र रस पदं सोमरसस्य वाचकम्। "सोम इन्द्रियोरसःह्व इति मन्त्रे अमृतमयेऽर्थे रस पदस्य प्रयोगः। "ऋषिभिः संभृतं रसम्ह्व इति मन्त्रे ऋषिभिः संपादितसूक्त संघः वेदरसः निगदितोऽस्ति। "धनञ्जयः पवते कृष्ण्यो रसो विप्रः कविः काव्येनह्व इति मन्त्रे काव्यप्रसङ्गे 9रस" पदस्य व्यवहारः। "यो वः शिवतमो रसःह्व इत्यत्र 9रस" पदस्य शिवमयत्वमानन्दमयत्वश्चेत्यर्थः। एतदेव काव्यरसजन्यानन्दमयतायाः वीजं भवति।

किं च "नमो वः पितरो रसायह्व इति मन्त्रे 9रस" पदेन षड्तूनां वोधः। "या रसस्य हरणायह्व इत्यत्र 9रस" पदस्यार्थः शोणितम्।

नाट्यवेदस्योत्पतिविषये भरतमुनिना लिखितं यत् - ऋग्वेदात् पाठ्यं, सामवेदात् गानं, यजुर्वेदात् अभिनयं, अथर्ववेदात् रसं संगृह्य प्रजापतिः नाट्याख्यं पञ्चमं वेदं रचितवान्। अतएव वेदा एव नाट्यरसस्याधारः।

ऐतरेयब्राह्मणे शतपथब्राह्मणे च काव्यरसस्यार्थे रसपदस्य व्यवहारः। तत्र रसः विश्वसृष्टेः मूलमित्युक्तमस्ति। रसादेव रश्मयः, दिशः, अग्निश्च समुत्पन्नाः। अतः उपनिषत्सु सृष्टेः कारणं परमात्मा एव रस इत्युक्तमस्ति। शतपथब्राह्मणे "यावानु वै रसस्तावनात्माह्व इति मन्त्रे रसान्मनोः परस्परं सम्बन्धः निगदितोऽस्ति। एतदाधारेण काव्यरसस्यात्मत्वमुक्तं साहित्यशास्त्रिभिः रसस्यापरिमितत्वं निर्णिते शतपथब्राह्मणे "रसो वै सःह्व इति संकेतितमस्ति।

कठ-प्रश्न - मुण्डकोपनिषत्सु पूर्वसूचितेष्वर्थेषु 9रस" पदस्य व्यवहारोऽस्ति। तैत्तरीयोपनिषदि "रसो वै सः। रसं हयेवायं लब्धवानन्दी भवतिह्व इत्यत्र परमात्मनः रसरुपत्वं आनन्दमूलत्वं च कथितमस्ति। ऋगवेदस्याश्वसूक्ते अश्व एव हिरण्यशृङ्गः

कथितोऽस्ति। अत्र शृङ्ग शब्दस्यार्थ देदीप्यमान: श्रेष्ठ: दर्शनीयश्च। शृङ्ग: शब्दस्य एतानर्थानाधारीकत्य भावप्रकाशने साहित्यदर्पणे च श्रेष्ठ:, दर्शनीय:, मन्मथरूपश्चेति अर्था:, नाट्यशास्त्रे शुचि:, मेध्य:, उज्ज्वल:, दर्शनीय श्चेत्यर्था: निरुपिता: सन्ति। शृङ्गार: एका कलेति वृहवृचोपनिषदि उक्तमस्ति। शिवोपनिषदि हास्यस्य स्पष्टोल्लेखोऽस्ति। इत्थं वेदोपनिषदस्वपि शृङ्गारादिरसाणां नामानि लभ्यन्ते। निरुक्ते, व्याकरणे, रामायणे, महाभारते च 9रस" शब्दस्य व्यवहारोऽस्ति। चरकसंहितायां रसस्य रसनेन्द्रियविषयत्वमुक्तमस्ति।

भारतीयास्तिकदर्शनेषु प्रतिष्ठितायां प्रस्थानत्रय्यां सिद्धान्तरूपेण आत्मन: श्रेष्ठत्वं प्रतिपादितमस्ति। पञ्चमहाभूतनिर्मिते शरीरे आत्मन: विशुद्धाजरामरनित्यानन्दमयत्वात् विज्ञानमयत्वात् च प्रधानत्वं प्रतिपादितमस्ति। अत: वृहदारण्यकोपनिषदि उक्तमस्ति यत् आत्मन: दर्शन-श्रवण-मनन-निदिध्यासनादिभि: अन्यत् सर्वं स्वत:विदितं भवति। अयमात्मैव रस इति तैत्तिरीयोपनिषदि कथितमस्ति। आत्मन: श्रेष्ठता विषयो उपनिषदि यथा चर्चितोऽस्ति तथा काव्ये रसस्य नित्यत्वं, एकत्वं, अखण्डत्वं, स्वप्रकाशत्वम्, आनन्दमयत्वं, विज्ञानमयत्वमुक्तमस्ति। रसस्य काव्यशरीर प्राधानत्वात् तस्यैवात्मरुपत्वम्। आत्मनि ज्ञाते यथान्यत्सर्वं ज्ञातं भवति तथा काव्यात्मनि रसे ज्ञाते गुणालंकारादय: ज्ञाता: भवन्ति। साहित्यशास्त्रे रससम्प्रदायस्य प्रवर्त्तकेन भरतमुनिना नहि रसादृते कश्चिदर्थ: प्रवर्त्तते इति निगदता रसस्य प्राधान्यमंगीकृतम्। यथा आत्मज्ञानी रसरूपपरमात्मन: साक्षात्कारेणानन्दितो भवति तथा सहृदय: काव्यरसास्वादनेन मोदं लभते। काव्येषु विभावानुभावसात्त्विकसंचारिभावै: सहृदयहृदये वासनात्मकतया स्थिता: स्थायिन: अभिव्यक्ता भवन्ति। ते परिपुष्टा: भावा: रसा: उच्यन्ते। अनेन रसस्याखण्डत्वं, स्वप्रकाशत्वं, आनन्दमयत्वं, चिन्मयत्वं, वेद्यान्तरस्पर्शरान्यत्वं ब्रह्मास्वादसहोदरत्वं, लोकोत्तरचमत्कारप्राणत्वं आस्वाद्यमानत्वं चोक्तमस्ति। विभावा: सहृदयहृदयगतान् स्थायिभावान् विभावर्यान्ति। तेषांमवलीम्वनेन रत्यादय: उद्‌वुद्धा भवन्ति त एवालम्बन विभावा उच्यन्ते। यथा रतिरूपस्थायिन: नायकनायिका: आलम्बनविभावा:। ये भावा: स्थायिभावानुद्दीप्यन्ति त एवोद्दीपनविभावा:। यथा स्थायिन: रते: चन्द्र-चन्दन-शलम्व-उपवनशून्यगृहादय: उद्दीपनविभावा:। एतै: आलम्बनोद्दीपनविभावै: सहृदयहृदयगता रति: उद्‌बुद्धा उद्दीप्ता च भवति। विभावोदवुद्धा: स्थायिभावा: यै: अनुभवविषया भवन्ति त एव अनुभावा उच्यन्ते। विभावोद्‌वुद्धानां स्थायिनां विकारा: याभि: कायिक-वाचिक-सात्त्विकचेष्टाभि: प्रकटिता भवन्ति ते कटाक्षादय: अनुभावा उच्यन्ते अनुभाव: स्थायिभावानां प्रतीतियोग्यत्वात् भरत मुनिना उक्तं यत् - वाचिकाङ्गिकाभिनयै: अर्थानुभवात् त एव अनुभावा उच्यन्ते। भोजराजेन शृङ्गारप्रकाशे उक्तं यत्-विभावै: नायक नायिकादीनां प्रवुद्धे संस्कारे मन:वचनवृद्धि-शरीराणां व्यापारा: प्रथमम् अनुभूयन्तेन तान् अनु उत्पन्ना: भावा: अनुभावा उच्यन्ते। स्तम्भ-स्वेदादय: अनुभावा अपि नाट्यशास्त्रे गोवलीवर्दन्यायेन

सात्त्विकभावा उच्यन्ते। तत्रान्येषां सुखदु:खादि भावनासु अनुकूलान्त:करणत्वं सत्त्वम्। सत्त्वात्पन्न भावा: सात्त्विका उच्यन्ते भरतस्यमतानुसारं मन:प्रभवं सत्त्वम्। समाहितेन मनसा सत्त्वं निष्पद्यते। ये भावा: विशेषरूपेण सर्वेषु अंगेषु व्याप्ता: सन्त: रत्यादि स्थायिभावान् शरीरे संचारयन्ति, वागङ्गसत्त्वै: स्थयिभावान् रसरूपतां नयन्ति ते व्यभिचारिण: उच्यन्ते। अतएव ये विशेषरूपेणाभिमुखा सन्त: स्वयं चरणशीला: भवन्ति त एव संचारिभावा:। धनञ्जयेन उक्तं यत् वारिधौ कल्लोला इव स्थायिभावेषु ये संचरणशीला: त एव संचारिभावा भवन्ति। अतएव ते भावा: स्थायिभावानुपकर्तुं जायन्ते पुन: उपकरणात् परं विलीयन्ते। भरतस्य मतानुसारं रसनिष्पत्तौ त्रयोत्रिंशत् व्यभिचारिण: भवन्ति। परन्तु रूपगोस्वामिना अन्ये केचन साधारण ब्यभिचारिण: केचनाचासाधारणव्यभिचारिण: निरुपिता:। तेन मात्सर्यस्यासूयायाम, उदवेगस्य त्रासे, दम्भस्य अवहित्यायाम्, ईर्ष्योया: असन, विवेकस्य दैन्ये, क्लैब्यस्य क्षमायाञ्च धैर्ये, उत्कण्ठाया: औत्सुक्ये, विनयस्य लज्जायाम्, संशयस्य तर्के, धृष्टताया: चपलतायाम् अन्तर्भाव: कृत:। शिंगभूपालेनापि अतिरिक्तसंचारिणां प्रसिद्धेषु अन्तर्भाव: कृत:।

भोजराजस्य मतानुसारं नाष्टौ स्थायिन:, नाष्टौ सात्त्विका: न च त्रयोत्रिंशत् व्यभिचारिण भवन्ति यत: उनपञ्चाशत् भावेषु एक: भाव: कदाचित स्थायी कदाचित् ब्यभिचारी कदाचित् वा सात्त्विको भवति। अतएवावस्थाविशेषेण सर्वे भावा: व्यभिचारिण: भवन्ति। श्रृङ्गारप्रकाशे –

"नन्वष्टौ स्थायिन:, अष्टौ सात्त्विका:, त्रयत्रिंशद व्यभिचारिण इति ब्रुवते न तत साधु। यतोऽमीषामन्यतमस्यैव परस्परं निवर्त्यमानत्वात् कश्चित् कदाचित् स्थायी, कदाचित्तुब्यभिचारी। अतोऽवस्थावशात् सर्वेऽप्यमी व्यभिचारिण: सर्वेऽपि स्थायिन: सात्त्विका अपि सर्व एव मन:प्रभवत्वात्। अनुपहतं हि मन: सत्त्वमित्युच्यते ।ह्व

भट्टलोल्लटपादा: स्थायि-सात्त्विक-व्यभिचारिणां नियतसंख्यां न स्वकुर्वन्ति। तन्मतानुसारं सर्वे भावा: अवस्थाविशेषण रसे परिणमन्ति। यदा कश्चित् व्यभिचारिभाव: रसमामेति तदा तस्य अन्ये भावा: व्यभिचारिण भवन्ति। यथा निर्वेदे चिन्ता, श्रमे च निर्वेद: व्यभिचारिणौ ।।

"अन्येतु - व्यभिचारिणामपि व्यभिचारिणो भवन्ति। यथा निर्वेदस्य चिन्ता, श्रमस्य निर्वेद इत्यादि निरुपयन्ति ।।ह्व

अभिनवगुप्तेन यद्यपि स्थायिन: व्यभिचारित्वमाम्नातम् किन्तु व्यभिचारिण: स्थायित्वं नाङ्गीकृतम्। तन्मतानुसारं पुरुरवस: उन्मादेऽपि तर्कचिन्तादीनां येषां ब्यभिचारिणां सम्भावना क्रियते ते वस्तुत: स्थायिन: रते: व्यभिचारिणो भवन्ति। किं च तत्वज्ञानजन्यनिर्वेदस्य स्थायित्वं स्वीकृतमभिनवगुप्तेन। तत्राभिनवगुप्तेन–

"स्थायिनो हि व्यभिचारिता भवति। ननु व्यभिचारिणां स्थायिता। यत्रापि व्यभिचारिणि व्यभिचार्यन्तरं संभाव्यते तद्यथापुरुरवस उन्मादेऽपि तर्कचिन्तादि तत्रापि रति स्थायिभावस्यैव व्यभिचार्यन्तरयोगः।

"भावशब्देन तावत् चित्तवृत्तिविशेषा एव विविक्षिताः। तेषां तु योग्यतावशात् यथायोगं स्थायिसंचारिविभावानुभावरूपता सम्भवति।

शान्तरसपसङ्गे अभिनवगुप्तेनोक्तं यत्-तत्त्वज्ञानं सर्वेषां भावानामाधारभूताः। तदेव सर्वाः चित्तवृत्तिः व्यभिचारित्वं प्रापयति। रुद्रटेनापि व्यभिचारिणां स्थायित्वमाम्नातम्। तत्र काव्यालंकारे–

"रसनात् रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः।
निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः ।।""

रुद्रभट्ट-महिमभट्टयोरपि मतमिदमभिप्रेतम्। भानुदत्तस्य मतानुसारं स्थायिनोऽपि व्यभिचारित्वं प्राप्नुवन्ति। यथा हासः शृङ्गारे, रतिःशान्त-करुणहास्येषु, भयशोकौ करुणशृङ्गारयोः, क्रोधः वीरे, जुगुप्सा भयानके, उत्साह विस्मयौ च सर्वेषु रसेषु व्यभिचारिणः भवन्ति। भावानां स्थायित्वं व्यभिचारित्वं च वदता शार्ङ्गदेवेनोक्तं यत् - यदा रत्यादयः समुपयुक्तविभावैः जायन्ते तदा ते स्थायिनः उच्यन्ते। यदा स्वल्पैः विभावैः जायन्ते तदा व्यभिचारिण उच्यन्ते तथा अन्येषां रसानां ते व्यभिचारिण भवन्ति। यथा हासः शृङ्गारे, रतिः शान्ते, क्रोधः वीरे, भयं शोके, जुगुप्सा भयानके, उत्साहविस्मयौ च सर्वेषां रसानां व्यभिचारिण भवन्ति। तत्र संगीतरत्नाकरे–

"रत्यादयः स्थायिभावाः स्युर्भूयष्ठ विभावजाः।
स्तोकैर्विभावैरुत्पन्नाः त एव व्यभिचारिणः ।।
रसान्तरेष्वपि तदा यथायोगं भवन्ति ते।
वीरे क्रोधः भयं शोके जुगुप्सा च भयानके ।।
उत्साहविस्मयौ सर्वरसेषु व्यभिचारिणौ ।।""

रस सम्प्रदायस्य प्रवर्त्तकेन श्रीमता भरतेन प्रप्रथमं रसभावादीनां साङ्गोपाङ्गविवेचनं कृतम्। तस्य रससूत्रमाधारीकृत्य साहित्यशास्त्र विविधवादाः प्रचलिताः। काव्य रसस्य प्राधान्यात् प्रथमं रसस्य विचारः कृतः। रसस्य स्वरुपं निरुपयितुकामेन तेनोक्तं यत् - यथा भोजनविशेषज्ञः विविधव्यञ्जनैः सह अन्नं खादयन् रसास्वादनं करोति तथा सहृदयः विभावादिभिः व्यञ्जितं स्थायिभावं आस्वाद्य आनन्दं लभते। नाट्यशास्त्रे–

"रस इति कः पदार्थः। उच्यते-आस्वाद्यत्वात। कथमास्वाद्यते रसः। तथाहि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमन सः पुरुषाः हर्षादीश्चाछिगच्र्चान्त तथा नानाभावाभिनयब्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभायवानास्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति। तस्मान्नाट्यरसा इत्यभिव्याख्याताः ।।

रसस्य काव्यात्मत्वं यद्यपि भरतेन कुत्रचिदपि नोक्तम् तथापि तस्य प्राधान्यं प्रकारान्तरेणाङ्गीकृतम्। यथा वीजात् वृक्ष: वृक्षात् पुष्पाणि फलानि च जायन्ते तथा रसा: मूलम्। तेभ्य: सर्वे भावा: व्यवस्थिता भवन्ति। अभिनबगुप्तेनास्मिन् प्रसङ्गे उक्तं यत्– कविहृदयगतवीजरूपरसात वृक्षरुपं काव्यं जायते। अग्निपुराणे रसस्य सनातनत्वं, व्यापकत्वं, अक्षरत्वं, परंब्रह्मत्वं, वेदान्तादिशास्त्रेषु प्रकाशमयत्वं चोक्त मस्ति। आनन्दरुपस्यास्याभिव्यक्ति: केवलं मुक्तात्मनां भवति। सैवानन्दाभिव्यक्ति: ज्ञानस्वरुपा चमत्कारपूर्णा च। सा एव रस इत्यभिधीयते। तस्य रसस्य प्रथमविकार: अहंकार एव। अहंकारोत्पन्नाभिमानात्। उत्पन्ना रति: व्यभिचार्यादिभि: परिपुष्टा सती शृङ्गारशब्देनोच्यते। तत्राग्निपुराणे–

"अक्षरं परमं ब्रह्म सनातनमजं विभुम् ।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योति शीश्वरम् ।।
आनन्द: सरसस्तस्य ब्यज्यते सा कदाचन ।
ब्यक्ति: सा तस्य चैतन्य चमत्कार रसाह्वया ।।
आद्यस्तस्य विकारो य: सोऽहंकार इति स्मृत:।
ततोऽभिमानस्तत्रेदं समाप्तं भुवन त्रयम् ।।
अभिधानाद रति: सा च परिपोषमुपेयुषी ।
व्यभिचार्यादि सामान्याच्छृङ्गार इति गीयते ।।

नाट्यशास्त्रे इव अग्निपुराणेऽपि उक्तमस्ति यत - भावहीनतायां रस: न भवति न च रसराहितभावस्य सत्ता अस्ति। भावा: रसान् भावयन्ति। रस एव काव्यस्य जीवितं भवति। तत्र–

"न भावहीनोऽस्ति रसो न भावो रसवर्जित:
भावयन्ति रसानेभिर्भाब्यन्ते च रसा इति ।।

वाग्वैदग्ध्य प्रधानेऽपि रस एवात्र जीवितम्। आनन्दवेर्धनेन रसध्वने: सर्वोत्कष्टत्वं स्वीकृतम्। गुण-रीति-वृत्त्यलंकारा: रसादीनामुत्कर्षका: भवन्ति। रसं विना नास्ति तेषां किमपि - विशेषमहत्वम्। अत: प्रतीयमानरसादिरुपोऽर्थ: काब्यस्यात्मा एव। भट्टनायकेनापि रसादीनां विस्तृतविवेचनं कृतम्। ध्वनिविरोधिन: तस्य मतं यत् - अनिर्वचनीयस्य धने: स्वरुपनिरुपणं सर्वथासम्भवम्। वस्तुध्वने: अलंकारध्वनेश्च तेन खण्डनं कृतम्। रसस्यात्मत्वमङ्गीकुर्वत: तस्य मतानुसारं काव्ये अभिधाव्यापारेण शब्दार्थयो: वोधो भवति। भावकत्ववप्यापारेण साधारणीकृतेषु विभावादिषु भोजकत्वव्यापारेण सहृदयै: रस: भुज्यते। तत्र भट्टनायकेन–

"अभिधा भावना चान्या तदभोगीकृतिरेव च।
अभिधा धामतां याते शब्दार्थालंकृती तत: ।।
भावना भाव्य एषोऽपि शृङ्गारादिगणो मत:।
तदभोगीकृतिरुपेण ब्याप्यते सिद्धिमान्नर: ।।

भट्टतौतस्य मतानुसारं आनन्दस्वरुपत्वात् रस: काव्यस्यात्मा एव। श्रव्यकाव्यवर्जितस्य वस्तुन: प्रत्यक्षमिवभासनेन सहृदय: रसास्वादं करोति। प्रतिहारेन्दुराजेन रसस्य काव्यात्मत्वं निर्णितम्। तन्मतानुसारं रसादीनां रसवदलंकार रूपत्वं न सम्भवम्। काब्यरसयो: अलंकार्य - अलंकारकभाव: असम्भव: अपितु शरीर-आत्मभाव: सम्भवति। रस:काव्यस्यात्मरूप:। शब्दार्थौ च शरीरम्। आत्माधिष्ठितशरीरमिव रसयुक्तं काव्यं सजीवमिति वक्तुं शक्यते। तत्र प्रतिहारेन्दु राजेन–

"न खलु काव्यस्य रसानां चालंकार्यालंकारभाव: किन्त्वात्मशरीरभाव:। रसा हि काव्यस्यात्मत्वेनावस्थिता: शब्दार्थौ च शरीररूपतया। यथा ह्यात्माधिष्ठितं शरीरं जीवतीति व्यपदिश्यते। तथा रसाधिष्ठितस्य काव्यस्य जीवद्रुपतया व्यपदेश: क्रियते। तदाहु:-

"रसाद्युधिष्ठितं काव्यं जीवद्रूपतया यत:।
कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम्।""

अभिनवगुप्तेन अभिनवभारत्यां रसस्य ध्वन्यमानतामंगीकुर्वता रसध्वनिविरोधिनां भट्टलोल्लट-शंकुक-भट्टनायकादीनां मतानि खण्डितानि। तेन रसस्यालौकिकतां प्रतीयमानतां च विवेचयता तस्यैव सर्वोत्कृष्टत्वं प्रतिपादितम्। रसस्य न कदापि वाच्यत्वं सम्भवम् अपितु ध्वन्यमानत्वात् आत्मत्वं सिद्धम्। रस: सर्वथा ब्यङ्ग्यरुप:। वस्त्वलंकाररसरूपेण त्रिविधोऽपि ध्वनि: केवलं रसध्वनिरेव काव्यस्यात्मा भवति। वस्तुध्वने: अलंकारध्वनेश्च पर्यवसानं रसध्वनौ भवति। अतएव रसध्वनि: काव्यस्यात्मा एव।
तत्राभिनवगुप्तेन–

"तेन रस एव वस्तुन आत्मा, वस्त्वलंकारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तावित्यभिप्रायेण ध्वनि: काव्यस्यात्मेति सामान्येनोक्तम् ।।ह्न

महिमभट्टेनापि रसस्य काव्यात्मत्वमुक्तम्। परन्तु रसादिध्वनिना सह तस्य विरोध: लक्ष्यते। तन्मतानुसारं रसस्य व्यङ्ग्यत्वं न कदापि सम्भवम्, परन्तु विभावादि द्वारा रसादीनामनुमितिर्भवति। भोज: समग्रं वाङ्मयं वक्रोक्ति - रसोक्ति - स्वभावोक्तिमयं मनुते। तन्मतेन रंसोक्तिरेव सर्वोत्कृष्टा भवति। रस-वस्तु-अलंकाररूपं ब्यङ्ग्यं काव्यसर्वस्वमित्यङ्गीकुर्वता गुणनिरूपणप्रक्रमे मम्मटेन रसस्यांगित्वं प्रत्यपादि। रसस्यात्मत्वमपितेनोदघोषितम्। रूय्यकस्य मतेन रसादि: काव्यस्य प्राणा: भवन्ति। अतएव रसादय: नालंकाररुपा: रस: प्रधानरूपेणोपकार्य: अलंकाराश्च तस्योपकारका: भवन्ति। अत: वाक्यार्थरूप: रस: काब्यस्य जीवितं भवति। तत्रालंकारसर्वस्वे–

"रसादयस्तु जीवितभूता नालंकारत्वेन वाच्या:। अलंकाराणामुपकारकत्वात् रसादीनां च प्राधान्येनोपकार्यत्वात्। तस्माद व्यङ्ग्य एव वाक्यार्थीभूत: काव्य जीवितमिति।ह्न

अतएव रसस्यानन्दरूपत्वात् प्राधान्य त्वात् च न केवलं काव्यशास्त्रिभि: अपितु महाकविभिरपि तस्य महत्वमुदधोषितम्। कालिदासेन रसे सहृदयानां तन्मयता अंगीकृता। भवभूतिना रत्यादिभाव: चित्तस्य द्रवीभावत्वमुदघोषितम्। अत। रस: काब्यस्यैकं सर्वोत्तमं तत्वम्। स: एव आत्मा इति निश्चप्रचं वक्तुं शक्यते। महिमभट्टेन "काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचित् विमति:ह्व इति निगद्य रसस्यात्मत्वमुद्घोषितम्।

**सहायकग्रन्था:**


१. हैमकोष:

२. ऋग्वेद: - १/२३/२३

३. ऋग्वेद: - १/३७/५

४. ऋग्वेद: - १/१०५/२

५. ऋग्वेद: - ५/४३/४

६. ऋग्वेद: - ८/३/२०

७. ऋग्वेद: - ९/९७/३

८. ऋग्वेद: - ९/८४/५

९. अथर्ववेद: - १/५/२

१०. यजुर्वेद: - २३/३२

११. अथर्ववेद: - १/२६/३, ४/१७/३

१२. जग्राह पाठ्यं ऋग्वेदात् सामेभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।। - नाट्यशास्त्रम् - १/१७

१३. ऐतरेयब्राह्मण: - ७/३, ५/१९, ८/८

१४. शतपथब्राह्मणम् - १/२/२/२, १/३/१/२५, २/३/१/१०

१५. शतपथब्राह्मणम् - ७/२/३/४

१६. शतपथब्राह्मणम् - ८/७/२/१७

१७. कठोपनिषत् - २/३/१५, २/१/३

१८. प्रश्नोषनिषत् - ४/२, ४/८, ४/९

१९. मण्डुकोपनिषद - २/९

२०. तैत्तरीयोपनिषत् - २/७

२१. ऋग्वेद - १/१६३/९

२२. भोवानामुत्तमं यत्तु तच्छृङ्गं श्रेष्ठमुच्यते। - भावप्रकाशनम् - पृ.४८

२३. शृङ्गो हि मन्मथोद्भेद:। - साहित्यदर्पण: - ३/१८९

२४. यथा यत्किंचित्श्लोके शुचि मेध्यं दर्शनीयं वा तच्छृङ्गरणोपमीयते। - नाट्यशास्त्रम् - अध्या - ६

२५. बृहवृचोपनिषत - १
२६. शिवोपनिषत् - ७/३
२७. □निरुक्तम् - पृ - २/९
२८. पाणिनिसूत्रम् - ३/५६
२९. रामायणम् - १/२/१५
३०. महाभारतम् - आश्र्वमेधिकपर्व - अध्या - ६१
३१. चरकसंहिता - १/६३
३२. बृहदारण्यकोपनिषत् - ४, ५, ६
३३. वहवोऽर्था: विभाव्यन्ते वागङ्गाभिनयाश्रिता:।
अनेन यस्मात्तेनायं विभाव इति संज्ञित: ।। - नाट्यशास्त्रम् - ७/४
३४. वागङ्गसत्त्वाभिनयैर्यस्मादर्थो विभाव्यते । - नाट्यशास्त्रम् - ७/५
३५. विशेषादाभिमुख्येन चरन्तो व्यभिचारिण:।
स्थायिन्युन्मग्नर्निमग्ना: कल्लोला इव वारिधौ ।। - दशरूपकम् - ४/७
३६. उदवेग - स्नेह-दम्भेर्ष्या-प्रमुखाश्चित्तवृत्तय:।
उक्तेष्वन्तर्भवन्तीति न पृथग्त्वेन दर्शिता: ।। रसार्णवसुधाकर: - २/९४
३७. शृङ्गारप्रकाश: - पृ - ११
३८. अभिनवभारती - पृ - ३४५
३९. अभिनवभारती - पृ - ३४५
४०. अभिनवभारती - पृ - ३४२
४१. अभिनवभारती - पृ - ३३९
४२. काव्यालंकार: (रुद्रट:) - १२/४
४३. रसतरङ्गिणी - ५/१/४८
४४. नाट्यशास्त्रम् - ६/३२-३३ (वृत्ति:)
४५. यथा वीजाद भवेद वृक्षो वृक्षात् पुष्पफलं यथा।
तथा मूलं रसा: सर्वे तेभ्यो भावा व्यवस्थिता: ।। - नाट्यशास्त्रम् - ६/३८
४६. अग्निपुराणम् - ३३९/१-४
४७. अग्निपुराणम् - ३३९/१२
४८. हृदयदर्पणम् - उद्धृत (अभिनवभारती - पृ - २७९)
४९. काव्यालंकारसारसंग्रह: - पृ - ८३
५०. ध्वन्यालोक (लोचन:) - पृ - ६१
५१. व्यक्तिविवेक: - पृ - १
५२. वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्
सर्वानुग्राहिणी तासु रसोक्ति: प्रतिजायते ।। - सरस्वतीकण्ठाभरणम् - ५/८
५३. ये रसस्याङ्गिनो धर्मा: शौर्यादय इवात्मन:। - काव्यप्रकाश: - उल्ला - ८
५४. अलंकारसर्वस्वम् - पृ - १०

प्राध्यापक:, संस्कृत विभाग:
अभिमन्यु सामन्तसिंहार उच्चमाध्यमिकविद्यालय:
वालिआ, याजपुरम्, ओड़िशा

# नारदीयोत्क्रान्तिः

*डॉ. सन्तोषकुमारी*

गुरुं प्रणम्य प्रथमं सभापतिं ततो हि सन्तोष इयं स्वसंज्ञया ।
व्यनक्ति चोत्क्रान्तिमिमां मितामितां मिताक्षरां मृत्युपदेन वर्णिताम् ।।१।।
न नारदीयं हि पुराणकीर्त्तितं परं मुदोत्क्रान्तिपदं पदेरितम् ।
पदे पदे या ह्युपपादिता पदैर्विभाति सा मृत्युचरी चरोऽचरे ।।२।।
इयं न साक्षात् क्रमते पुराणजा चकास्ति सा मृत्युपदेन कल्पिता ।
पदे पदे लुण्ठति लुष्ठिनीव सा स्वयं चरन्ती घटकैर्दशापरैः ।।३।।
क्रिया समुत्क्रान्तिरियं श्रुता ध्रुवं सदैव मृत्योर्गतिमापिता भुवि ।
विभेति यस्या मनुजो भयाकुलः पुरः पुरन्ती धुवतीह सा धियम् ।।४।।
विभिन्नसन्दर्भचरी प्रपञ्चिता विशिष्टरुद्रैर्घटकैरतन्द्रिता ।
पले पले प्राणचये पतत्यहो क्रमैर्भ्रमन्ती भुवि जृम्भितानना ।।५।।
विभाति [१]कर्त्ता [२]करणं [३]ह्याधिष्ठितं [४]सचेष्टितं भाति च [५]कालकीलितम् ।
[६]गतिश्च [७]दैवं च तथेन्द्रयाणि[८] च क्रमादवस्था[९] च विभाति कर्मजा[१०] ।।६।।
शुभे पुराणे घटकेषु घट्टितं विहाय मार्गं सरतीह सा कथम् ।
ससर्ति नित्यं नितरां पुरस्सृतं स्वयं समस्या विबिभेति मृत्युनः ।।७।।
कथं पुराणी निजलक्ष्यलक्षितां सृतिं विना सा क्रमते हि सत्वरम् ।
कथं हि तां व्यास इमां प्रियां जहौ प्रमाणिता कापि कथा पिकप्रथा ।।८।। इति शम् ।।

---

**सन्दर्भसूची –** सर्वे सन्दर्भाः नारदीयपुराणतः —

१. १.३१.६, १.३२.३७ ।
२. १.३१.४, १.३१.६, १.३१.७, १.३१.१२, १.३१.३८, १.८.५४, १.८.५५, १.८.६५ ।
३. १.३१.३७, १.८.५५, १.७.५८ ।
४. १.३१.५, १.३१.६, १.३१.१५, १.३१.१२, १.३१.३२, १.३१.३७ ।
५. १.७.६२ ।
६. १.३१.४, १.३१.६, १.३१.१२, १.३१.१४, १.३१.१५ ।
७. १.७.६१, १.७.६५ ।
८. १.३१.१३, १.३१.१४, १.३१.३२, १.३१.३७ ।
९. १.३१.५, १.३१.११, १.३१.३७, १.८.६५ ।
१०. १.३१.५, १.३१.६, १.३१.३७, १.३१.१७, १.७.६१, १.७.६३ ।
११. १.७.६२, १.७.५९ ।

—०—

*अध्यापिका, संस्कृतप्राच्यभाषाविभागः*
*चौ.चरणसिंहविश्वविद्यालयः, मेरठ, (यू.पी.)*

# अग्निपुराणे मोक्षावधारणा

*तरणीकुमारपण्डा*

**मुख्यशब्दाः —** उपोद्घातः - मुक्तेः संज्ञा - अर्चनेन मुक्तिः - देवगृहनिर्माणेन मुक्तिः - तीर्थसेवनेन मुक्तिः - पुत्रोत्पादनेन मुक्तिः - आत्मज्ञानेन मुक्तिः – योगमाध्यमेन मुक्तिः – दानेन मुक्तिः – जपेन मुक्तिः – राजधर्मपालनेन मुक्तिः – सेवामाध्यमेन मुक्तिः – प्रणतिज्ञापनेन मुक्तिः – उपसंहारः च ।

**उपोदघातः —**

भारतीयसंस्कृतवाङ्मये पुराणानां विशेषसम्मानम् अस्ति । भारतीयसभ्यताचार-विचाराणां जनतायां येन साहित्येन प्रचारः कृतः तत्तु पौराणिकं साहित्यम् एव । वस्तुतस्तु वेद-विहितानां धर्माणां सुबोधभाषायां वर्णनं प्राप्यते अस्मिन् साहित्ये । तस्मात् धार्मिकदृष्ट्या पुराणानामस्ति अधिकं महत्त्वम् । उच्यते – "पुरा नवं भवति इति पुराणम् ।" संसारारण्येऽस्मिन् बंभ्रम्यमाणानां जीवानां कृते पुराणम् अस्ति सरलः आलोकमार्गः । परमतत्त्वदृष्ट्या पुराणं हि अवश्यमेव मोक्षशास्त्रम् । अष्टादशपुराणेषु अग्निपुराणं विशिष्टस्थानं धत्ते । अग्निपुराणं लोकशिक्षायै उपयोगिनीनां विद्यानां प्रस्तोतृ पुराणमस्ति । सर्वासां विद्यानां समावेशादेवेदं भारतीयसमस्तविद्यानां कोशः प्रोच्यते । तथा चोक्तम् –

"तस्मात् परतरं भूमौ विद्यते वस्तु दुर्लभम् ।
आग्नेये हि पुराणेऽस्मिन् सर्वा विद्या प्रदर्शिताः ।।[१]"इति ।

अत्र अनेकविधमन्दिरनिर्माण-गृहशिल्पकलानां निरूपणेन सह मूर्त्तिप्रतिष्ठा पूजाविधानञ्च विस्तृतम् उपदिष्टमस्ति । अत्र च चतुर्णामुपवेदानां वेदाङ्गानां दार्शनिकविषयाणां पशुचिकित्सा-रत्नपरीक्षा-वास्तुविद्या-ज्योतिष-धर्मशास्त्र-राजनीति-आयुर्वेदादिशास्त्राणां वर्णनं विशेषरूपेण कृतं विद्यते । अपि च अस्मिन् महापुराणे मुक्तितत्त्वं रम्यभावेन प्राप्यते । जीवः अविद्यावशात् पापं करोति । तदर्थं स पुनः पुनः जन्ममरणचक्रं याति । संसारपाशेन आवद्धः सन् जीवः बहुविधं दुःखं सहते । अग्निपुराणनिर्देशितमार्गेण तद्दुःखं सुखकरभावेन निराकृतं भवति अर्थात् जीवः मुक्तिभाक् भवति । तस्मात् अस्य पुराणस्य उपदेशः सर्वथा पालनीयः । देवार्चन-देवालयनिर्माण-तीर्थगमन-पुत्रोत्पादन-आत्मज्ञान-योग-जप-सेवा-राजधर्मादिभिः सुकरोपायैः जीवः कथं मुक्तिं लभते तदत्र शोधसन्दर्भे मया उपस्थाप्यते ।

**मुक्तेः संज्ञा —**

धर्मादिषु चतुर्वर्गेषु मोक्षः श्रेष्ठः । मोक्षशब्दस्य पर्यायवाचकशब्दः भवति मुक्तिः । यदा जीवः भोगासक्तिसम्पन्नं जडदेहं त्यक्त्वा आत्मस्वरूपं जानाति तदा तस्य मुक्तिर्भवति । उच्यते भागवतपुराणे –

"मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ।।"२ इति ।

अपि च निरालम्बिउपनिषदि कथ्यते –

"नित्यानित्यवस्तुविचारादनित्यसंसारसमस्तसङ्कल्पक्षयो मोक्षः ।" इति ।

अर्थात् यदा वस्तुविचारेण नित्यं वस्तु निर्णितं भवति तदा अनित्यसंसारस्य समुदयसंकल्पस्य विनाशो भवति । सकलकुसंकल्पनाशात् जीवस्य मुक्तिर्भवति । पुराणे पञ्चविधाः मुक्तयः उल्लिखिताः सन्ति । ताः खलु यथा – सालोक्यमुक्तिः, सामीप्यमुक्तिः, सायुज्यमुक्तिः, सार्ष्टिमुक्तिः, सात्मतामुक्तिश्च । अग्निपुराणे एतादृश्यः मुक्तयः परिलक्ष्यन्ते ।

**अर्च्चनेन मुक्तिः —**

अष्टाक्षरादिभिः मन्त्रैः यः खलु देवार्चनं करोति तस्य नरस्य मुक्ः निश्चितरूपेण भवति । सोपचारेण परमभक्तिपूर्वकं "अहं ब्रह्म हरिस्त्विति" चिन्तयित्वा हदयन्यासं कुर्यात् । अनेन चिन्तनेन यावत् मनः स्थिरं भवति तावत् तम् आत्मरूपेण ध्यात्वा क्रमशः शङ्ख-चक्र-गदा-धनु-पद्म-कुण्डल-श्रीवत्स-पीतवसन-गरुड-सनकादीनां चिन्तनं कुर्यात् । भक्त्या श्रद्धापूर्वकोपहारदानेन आत्मानं समर्प्य "क्षमस्व" इत्युक्त्वा विसर्जनं कुर्यात् । अनेन कर्मणा अष्टाक्षरादिभिः मन्त्रैः पूजयित्वा मानवः मुक्तिभाक् भवति । उच्यते पुराणेऽस्मिन् –

"हृदये विन्यासेद्ध्यात्मा अहं ब्रह्म हरिस्त्विति ।
आगच्छावाहने योज्यं क्षमस्वेति विसर्ज्जने ।।
एवमष्टाक्षराद्यैश्च पूजां कृत्वा विमुक्तिभाक् ।३ इति ।

अग्निः स्वयं मुक्तिदः अर्थात् मुक्तिकारणरूपेण उल्लिखितो भवति अत्र –

"विमुक्तेः कारणं वह्निः परमात्मा च मुक्तिदः ।।४" इति ।

**देवगृहनिर्माणे मुक्तिः —**

वित्तवान् मानवः उत्तमदेवगृहनिर्माणेन यत् फलं प्राप्नोति धनहीनोऽपि सामान्यदेवगृहनिर्माणेन समनुरूपं फलं लभते । दैवयोगेन स्वीयपुरुषकारप्रभावेन वा सहसा यदि धनप्राप्तिर्भवति तर्हि सत्वरं देवोद्देश्येन नियोगं कुर्यात् । नोचेत् तद्धनं ब्राह्मणाय सम्प्रयच्छेत् । तेन सह हरिनामसंकीर्त्तनं, विष्णुमन्दिरनिर्माणम् आवश्यकं कर्तव्यम् । कालत्रयमपि स्थूल-सूक्ष्मतः आरभ्य आब्रह्मस्तम्भं यावत् सर्वमेव विष्णोः सम्भूतः । देवेशगृहनिर्मातुः पुनर्जन्म न कदापि भवति । शिव-ब्रह्म-सूर्यादीनां देवानामपि समनुरूपं फलं भवति – नास्ति अत्र संशयः ।५

ब्रह्मज्ञानं, गयाश्राद्धं, गोगृहे मरणं, कुरुक्षेत्रे वासः – चतुर्विधं कार्यमिदं मोक्षप्रदायकम् । अनेन कर्मणा पुरुषस्य मुक्तिर्जायते ।६

**तीर्थसेवनेन मुक्तिः —**

ब्रह्मतीर्थकूपविधिपूर्वकं स्नानं, तर्पणं, श्राद्धप्रदानम् अतीव पुण्यप्रदायकं कर्म ।

मोक्षलाभार्थम् एवं धर्माचरणम् अवश्यमेव कर्तव्यम् । अस्मिन् स्थले कूपस्थिते यूपे श्राद्धदानेन अनुष्ठातुः शतकूलस्य उद्धारः भवति । तत्रस्थं महाबोधवृक्षम् उद्दिश्य यः खलु प्रणामं निवेदयति स धर्मात्मा निश्चितेन स्वर्लोकभाक् भवति । ब्रह्मसारूप्यलाभार्थं तत्रस्थिते ब्रह्मसरोवरे तर्पणं, श्राद्धदानं, पिण्डदानं कुर्यात् । तत्रस्थिते आम्रमूले कुशाग्रहस्ते यः सलिलप्रदानं करोति, तस्य पितृगणः नूनमेव परितृप्तः भवति । तत्र ब्रह्माणम् उद्दिश्य यः प्रणमति तस्य शतकूलोद्धारः भवति । दशाश्वमेधे स्नानेन, देवदेवस्य पितामहस्य दर्शनेन, रुद्रपादस्य स्पर्शनमाध्यमेन च मुमुक्षुजनस्य मुक्तिर्भवति । गयाणिःक्षेत्रे शमीपात्रसमं पिण्डप्रदानेन नरकस्थपुरुषगणः स्वर्गं याति, स्वर्गस्थपुरुषगणोऽपि सुदुर्लभं मोक्षं प्राप्नोति ।[७] ब्रह्मलोके प्राप्ते सति पुनरपि पुरुषः संसारे न पुनः जायते। उच्यते –

"अपुनर्म्मारिका यत्र ब्रह्मलोको हि स स्मृतः ।।[८]"

**पुत्रोत्पादनेन मुक्तिः —**

अष्टविधेषु विवाहेषु ब्राह्मविवाहः अन्यतमः । अस्मिन् उद्वाहे यत् अपत्यं जायते स पितृगणोद्धारस्य कारणं भवति अर्थात् सवर्णः सकुलजः पुत्रः कुलस्य मुक्तेः कारणं भवति । तस्मात् ब्राह्मविवाहेन कृतदारः मुमुक्षुजनः पुत्रोत्पादनेन स्वकुलस्य रक्षणं करोति, पापमोचनं करोति । उच्यते अस्मिन् महापुराणे –

"पुरुषांस्तारयेत् तज्जो नित्यं कन्याप्रदानतः ।।[९]"

**आत्मज्ञानेन मुक्तिः —**

आत्मज्ञानादेव मुक्तिर्भवति । तदर्थं वेदशास्त्रार्थम् अवगम्य कस्मिंश्चिदाश्रमे कालयापनेन अपि इहलोकस्थः मानवः ब्रह्मसारूप्यं प्राप्नोति । यः आत्मानं विहाय न द्वितीयं पश्यति स आत्मरतः निर्मलस्वभावसम्पन्नः योगी मानवः ब्रह्मभूतः भवति ।[१०] यः खलु कविगणग्राह्यः, यः ज्ञानस्य द्योतनस्वरूपः, यश्च अर्थक्रियाकारी सह हि यथार्थतः सत् । विष्णुः हि स्वर्गादीनां हेतुस्वरूपः, स च शब्दालङ्कारः, रूपवान्, परापरविद्यारूपश्च । तस्य स्वरूपज्ञानलाभेन मानवः भवबन्धनात् मुक्तो भवति ।[११] अद्वितीयः, व्यापी, समः शुद्धः, निर्गुणः, प्रकृतिपरस्थः, जन्मवध्यादिरहितः, अव्ययः, परमः, ज्ञानमयः, विभूश्च भवति आत्मा । गुणजात्यादीनाम् असङ्गी आत्मा एव सर्वगतः । ज्ञानमिदमवश्यमेव अर्जयितुं शक्यते । उदिते परमज्ञाने सर्वाणि भूतानि अभेदं पश्यन्ति । अनेन दर्शनेन जीवस्य मुक्तिर्भवति । यथा राजा भरतः ज्ञानसारेण मुक्तिं प्राप्नोति स्म । तस्मात् संसाराज्ञानवृक्षस्य अरिस्वरूपं तं ब्रह्म सदैव ध्यानयोग्यम् । अस्मिन् पुराणे उच्यते –

"मुक्तिं ह्यवाप भरतज्ञानसारेण भूपतिः ।
संसाराज्ञानवृक्षारिज्ञानं ब्रह्मेति चिन्तय ।।[१२]" इति ।

**योगमाध्यमेन मुक्तिः —**

आत्ममनसोः सम्यग्भावेन मिलनं हि योगः । यदा मनः वृत्तिहीनं क्षेत्रज्ञञ्च

परमात्मनि मिलितः भवति तदा पुरुषः बन्धनात् मुक्तो भवति । अयमेव उत्तमयोगः । अनेन अनुष्ठानेन मुमुक्षुः मोक्षलाभे समर्थो भवति –

"वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञपरमात्मनि ।
एकीकृत्य विमुच्येत बन्धाद् योगोऽयमुत्तमः ।।[१३]"

परमपुरुषः हि परमा गतिः । स हि अन्तिमसीमा । सर्वेषु भूतेषु गूढात्मरूपेण स्थित्वापि स कदापि प्रकाशितः न भवति । सूक्ष्मदर्शिगणः सूक्ष्माग्रबुद्धिबलेन तं महान्तं पुरुषं पश्यति । प्राज्ञजनोऽपि वचसा मनसा च संयमितः भवति । जीवात्मनि ज्ञानं संयमितं, ज्ञानश्च महात्मनि, तत्परं शान्तात्मनि च आत्मानं नियमितं कुर्यात् । ब्रह्मणा सह आत्मनः संयोगः ज्ञातः सन् सद् ब्रह्मस्वरूपो भवति । शुभप्रदायकविषये चिन्ताधारणम् आवश्यकं कार्यम् । धीमान् मानवः धारणां कुर्यात् । तद् तद् विषये पुनः पुनः यो धारणा सा समाधिः । अनेन कर्मणापि जीवस्य मुक्तिर्भवति । यथा आकाशं नभोमण्डलात् अभिन्नं तथैव ब्रह्मापि आत्मनि संघटनं भवति । मुक्तजीवः ब्रह्मणा सह अभिन्नः सन् ब्रह्मत्वं लभते । जीवः ज्ञानेन आत्मानं ब्रह्म मन्यते । तस्माद् जीवः अज्ञान-विमुक्तः सन् अजरः अमरः भवितुम् अर्हति । अग्निपुराणे उल्लिखितम् अस्ति –

"घटध्वंसाद् यथाकाशमभिन्नं नभसा भवेत् ।
मुक्तो जीवो ब्रह्मणैवं सद् ब्रह्म ब्रह्म वै भवेत् ।।
आत्मानं मन्यते ब्रह्म जीवो ज्ञानेन नान्यथा ।
जीवो ह्यज्ञानताकार्य्य-मुक्तः स्यादजरामरः ।।[१४]"

**दानेन मुक्तिः —**

दानं भवति सर्वोत्तमं पुण्यप्रदायकं कर्म । अनेन कर्मणा मुमुक्षुजनः मुक्तिपदं प्राप्तुं शक्नोति । गो-भू-हिरण्य-कृष्णाजिनं यः यच्छति स दाता ब्रह्मसायुज्यं लभते । न केवलं सदाचारी मानवः दुष्टकृतकर्मापि अनेन दानकार्येण तद्पदं प्राप्तुम् अर्हति ।[१५]

**जपेन मुक्तिः —**

जपः मनसा नामसंकीर्त्तनं भवति । अनेन कार्येण जीवः मुक्तिभाक् भवति । अजपा नाम्नी गायत्री हि ब्रह्मा-विष्णु-महेश्वरी च । अस्य अजापात्रयस्य जपमाध्यमेन अपि पुरुषः पुनर्न जायते । तस्मात् मुमुक्षुजनेन अस्य देवतात्रयस्य जपः अवश्यमेव कर्त्तव्यः ।[१६] त्रिपदा सावित्री साक्षात् ब्रह्मणः आननस्वरूपा । अष्टोत्तरशतं गायत्रीजपेन पुरुषः संसारसागरात् उत्तीर्णः भवति । उच्यते –

"अष्टोत्तरशतं जप्त्वा तीर्णः संसारसागरात् ।।[१७]"

"शुनःशेफमृषित्" इति ऋङ्मन्त्रस्य सदा जपेन पुरुषः संसारबन्धनात् मुक्तो भवति । तेन सह आध्यात्मिक्य "कः" इत्यादि मन्त्रजपेनापि मोक्षलाभः सुनिश्चितः भवति ।[१८] "नमः स्वाहा" इति मन्त्रः त्रिकृत्वजपेन बन्धनात् मुक्तिर्भवति –

"नम: स्वाहेति त्रिर्जप्त्वा बन्धनान्मोक्षमाप्नुयात् ।[१९]" इति ।

**राजधर्मपालनेन मुक्तिः —**

राजा सम्यग्भावेन यदि राजधर्मं पालयति तर्हि तस्य मुक्तिः अवश्यमेव भवति । संग्रामात् अपलायनम्, प्रजापालनं, ब्राह्मणाय दानं च नृपाणाम् आवश्यकं कार्यम् । अनेन कर्मपालनेन राजा मुक्तिभाक् भवति । कथ्यते अस्मिन् पुराणे –

"संग्रामेष्वनिवर्त्तित्वं प्रजानां परिपालनम् ।
दानानि ब्राह्मणानाञ्च राज्ञो निःश्रेयसं परम् ।।[२०]" इति ।

**सेवामाध्यमेन मुक्तिः —**

सेवा हि परमधर्मः, सेवा हि परमन्तपः । अनेन कर्मणा जीवः प्रभूतफलं प्राप्नोति । यथा सेवया विद्यार्थिगणः विद्यां, राज्यार्थिगणः राज्यं, अपुत्रिकगणः पुत्रम्, अनाश्रयिगणः आश्रयं, सौभाग्यार्थिगणः सौभाग्यं, मोक्षार्थिगणश्च मोक्षं लभते। अतः मुमुक्षुजनस्य सेवा कर्तव्या । उच्यते –

"मोक्षं मोक्षार्थिनो गताः ।[२१]" इति ।

**प्रणतिज्ञापनेन मुक्तिः —**

भक्तिपूर्वकं प्रणतिनिवेदनं मुमुक्षुजनस्य मुख्यकर्त्तव्यम् । भक्तजनः प्रत्यहं पूजनात् अनन्तरं एतत् कार्यं निर्मलचित्तेन साधयति । उच्यते अस्मिन् पुराणे भगवति विष्णौ भक्तिपूर्वकं प्रणतिज्ञापनेन जीवस्य मुक्तिर्भवति –

"विष्णौ नते भवेन्मुक्तिः ।[२२]" इति ।

**उपसंहारः —**

परिशेषे उच्यते यत् अग्निपुराणं हि प्राचीनतमं प्रक्षेपविहीनं स्वस्वरूपेण सुरक्षितं च पुराणमस्ति । अपि च पुराणमिदं विश्वकोशस्य सम्माननीयपदम् अलङ्करोति । अस्य महापुराणस्य पुणोदकेन सिक्तः सन् मुक्तिकामी मानवः सुदुर्लभं मोक्षपदं प्राप्तुं शक्यते । पुराणेऽस्मिन् देवगृहनिमार्णं, तीर्थस्नानं, प्राणायामः, जीवप्रेमः, सत्यधर्मपालनं, देवताप्रतिष्ठा, तर्पणं, पिण्डदानं चेत्यादि उपायमाध्यमेन जीवस्य बन्धनपाशमोचनवार्त्तात् उद्घोषयते । अत्र च वर्ण्यविषये श्राद्ध-दान-मूर्त्तिपूजादीनां विशेषवर्णनं प्राप्यते । मुमुक्षुमानवैः एते उपायाः अनुकरणीयाः । अतः जीवः मोक्षप्रदायकस्य अग्निपुराणस्य समीपे अधमर्णः वर्त्तते इत्यत्र नास्ति संशयः। मुक्तिविषयकम् आलोचनमिदं दिग्विस्मृत-मुमुक्षुजनस्य सकाशे दीधीतीस्वरूपम् । इति ।

**पादटीकाः –**

१. अग्निपुराणम् – ३८३.५९ । २. भागवतपुराणम् – २.१०६ ।

| | |
|---|---|
| ३. अग्निपुराणम् – २३.१९, २० । | ४. तदेव – ३४.३५ । |
| ५. तदेव – ३९.२९, ३० । | ६. तदेव – ११५.५ । |
| ७. तदेव – ११५.४५, ४६ । | ८. तदेव – १२०.११ । |
| ९. तदेव – १५५.९ । | १०. तदेव – १३५.७, ८ । |
| ११. तदेव – ३३७.४९ । | १२. तदेव – ३८०.६६ । |
| १३. तदेव – १३५.१० । | १४. तदेव –३८२.३५, ३६ । |
| १५. तदेव – २११.१४ । | १६. तदेव – २१४.२३ । |
| १७. तदेव – २१५.७ । | १८. तदेव – २५९.२१ । |
| १९. तदेव – २६०.४० । | २०. तदेव – २२५.२४ । |
| २१. तदेव – ३८३.४२ । | २२. तदेव – ३५४.२३ । |

**अनुशीलिता: ग्रन्था:–**


१. अग्निपुराणम्, सम्पा.पञ्चानन तर्करत्न, नवभारत पब्लिशर्स, कलकता, १४१९, मुद्रित ।

२. उपाध्याय बलदेव, पुराणविमर्श:, चौखम्बाप्रकाशन, वाराणसी, १८९७ (तृतीय संस्करण) मुद्रित ।

३. वसु गिरीन्द्रशेखर, पुराण प्रवेश, विवेकानन्द बुक् सेन्टर, कलकता, २०१२ मुद्रित ।

४. शास्त्री माधवाचार्य:, पुराण दिग्दर्शन, माधवपुस्तकालय, दिल्ली, १९५८ ख्रीष्टाब्द मुद्रित ।


—०—


*शोधच्छात्र:*

*संस्कृत-पालि-प्राकृतविभाग:, विश्वभारती शान्तिनिकेतनम्*

*चलद्वाणी:*7797063543

Email : taranikumarpanda@gmail.com

IMPACT FACTOR: 2.815 PRACI SUDHA ISSN : 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

# DECLARATION

| | |
|---|---|
| Name of the Jounal : | PRACI SUDHA |
| Language : | Sanskrit |
| Period of Publication : | Half-Yearly |
| Time of Publication : | March(October - March)<br>September (April - September) |
| Name of the Publisher :<br>Address : | Prof. Biswanath Swain<br>General Secretary,<br>Purusottam Research Academy<br>of Indology, Puri, Odisha<br>Email : biswanathpuri@yahoo.com<br>pracisudha2013@gmail.com |
| Name of the Printer : | Prof. Biswanath Swain |
| Nationality : | Indian |
| Owner : | Prof. Biswanath Swain, General Secretary,<br>Purusottam Research Academy of Indology,<br>Sarvodaya Nagar, Puri - 752002, Odisha |
| Name of the Editor : | Prof. Biswanath Swain, (Retd.Principal)<br>General Secretary, Purusottam<br>Research Academy of Indology,<br>Sarvodaya Nagar, Puri - 752002, Odisha<br>Mob.: +91 9438134700<br>E.Mail : biswanathpuri@yahoo.com<br>pracisudha2013@gmail.com |
| Nationality : | Indian |
| Name of the Sub-Editors : | Dr. Judhisthir Sahu, Revenshaw University<br>Dr. Bighneswar Mishra, KCG (A) College<br>Dr. Laxminarayan Behera, SJSV |
| Nationality : | Indian |
| Printing Press : | Sri Narayan Press, Bali Sahi, Puri-752001 |
| Annual Subscription : | Rs. 100/- |
| Price of the each issue : | Rs. 50/- |

The above particulars are true to the best of my knowledge and belief.

**Dt - 30.09.2019** **Sd - Biswanath Swain**